CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदान्त ८५८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यो पनि

BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH, M. A., C. I. E.

AND

G. THIBAUT, PH. D.

No. 91.

ब्रह्मसूत्रदीपिका

श्रीमच्छङ्करानन्दभगवद्विरचिता ।

BRAHMASUTRADIPIKA

BY

SRI SANKARÂNANDA

EDITED BY

Râma Sâstri Tailanga,

PROFESSOR, GOVT. SANSKRIT COLLEGE, BENARES.

Fasciculus I,

BENARES.

Published by the Proprietors Messrs. Braj B. Das & Co.,

AND SOLD BY H. D. GUPTA,

Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ vilâs Press & Tara Printing Works,

BENARES.

1904.

मू. रु. ६३।—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

~~शिवराज आचार्य कौण्डिन्न्यायन~~

अथ ब्रह्मसूत्रदीपिका ।

ॐ नमः परमात्मने ।

नमस्तुभ्यं महामाये वरदे कामरूपिणि ।
विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा ॥ १ ॥
शङ्करस्य नमस्कारं कृत्वा शङ्करभाष्यगा ।
सूत्रव्याख्या हिरुक् श्रोतुः सुखार्थं क्रियते मया ॥ २ ॥

वेदान्तमीमांसा शास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्रम् । अधीतस्वाध्यायेनाऽकर्तृत्वादिरूपस्यात्मनोऽवधारणम्, तदवधारणाच्चाऽविद्यानिवृत्तेर्मोक्षस्य सिद्धिरित्यात्मनो ब्रह्मणो विचारस्य कर्त्तव्यतामाह—

अथातो ब्रह्मजिज्ञासा ॥ १ ॥

अथशब्दः साधनचतुष्टयसंपत्त्यानन्तर्य्यमाह । अतःशब्दो हेत्वर्थः । ज्ञातुमिच्छा जिज्ञासा । ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा । यस्मादग्निहोत्रादिकर्माऽनित्यफलं ब्रह्मज्ञानं चाऽनन्तफलं तस्माच्छमदमादिसाधनचतुष्टयसंपत्त्यनन्तरं ब्रह्मणो वक्ष्यमाणलक्षणस्य जिज्ञासा कर्त्तव्येति वाक्यशेषः ॥ १ ॥

पूर्वाऽधिकरणे ब्रह्म जिज्ञास्यमित्युक्तं, किंलक्षणं पुनस्तद् ब्रह्मेत्यत आह भगवान्सूत्रकारः—

जन्माद्यस्य यतः ॥ २ ॥

जन्मोत्पत्तिरादिर्यस्य तदिदं जन्मस्थितिभङ्गं जन्मादि अस्य प्रत्यक्षाद्युपस्थापितस्य विचित्रस्य जगतो यतो जन्मादि यस्मात्सर्वज्ञात्सर्वशक्तेः कारणाद्भवति तद् ब्रह्मेति वाक्यशेषः ॥ २ ॥

पूर्वाधिकरणे सत्यज्ञानादिरूपस्य ब्रह्मणो विलक्षणजगज्जन्मादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारणत्वं तटस्थलक्षणमुक्तम्, अर्थात्सर्वज्ञता च,इदानीं वेदस्याऽऽज्ञायमानत्वेन तामाक्षिप्य 'अस्य महत' इत्यादिवाक्याद्वेदजन्मनः प्रतीतेरुक्तां सर्वज्ञतां समाधत्ते—

शास्त्रयोनित्वात् ॥ ३ ॥

विचित्रस्य ऋग्वेदादेः शास्त्रस्य योनिः कारणं तस्य भावस्तत्त्वं तस्मात् ।

प्रवृत्तिश्च निवृत्तिश्च पुंसां येनोपदिश्यते ।
तद्धर्माश्चोपदिश्यन्ते शास्त्रं शास्त्रविदो विदुः ॥

अथ वा पूर्वाधिकरणे यतो वेत्यादिशास्त्रं न विचारितं किन्तु क्षित्यादिकं सकर्तृकमित्यनुमानमुक्तमिति शङ्कां निवर्त्तयितुमक्षाद्यगम्यत्वेन ब्रह्मणः शास्त्रैकप्रमाणतामाह—शास्त्रेति । यथोक्तमृग्वेदादि शास्त्रं योनिः कारणमिति प्रमाणगम्यत्वमुक्तं, साक्षादेव शास्त्रकर्तृत्वेन चाऽर्थात्सिद्धम् ॥ ३ ॥

तदिदानीं सिद्धार्थे शास्त्रस्य सङ्गतिग्रहणाद्यभावाद् जैमिनीयवचनविरोधाच्चाऽऽक्षिप्य समाधत्ते—

तत्तु समन्वयात् ॥ ४ ॥

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । त्वदुक्तं न । कुतः ? तद्यथोक्तं ब्रह्म वेदान्तशास्त्रादवगम्यते । कथं ? समन्वयात् । सम्यगन्वयः समन्वयः षड्विधतत्पर्यलिङ्गं तस्मात् । पूर्वाधिकरणे पुत्रस्ते जात इत्यादौ सङ्गतिग्रहणस्य रज्जुरियं नायं सर्प इत्यादौ प्रयोजनस्य च दर्शनात् जैमिन्यादिवचनानां कर्माऽभिप्रायकत्वात् सर्वज्ञे सर्वशक्तौ ब्रह्मणि शास्त्रं प्रमाणमेव ॥ ४ ॥

समन्वयादित्युक्तं, न च ब्रह्मणः सर्वज्ञत्वं सर्वशक्तिमत्वञ्च, ज्ञानस्वभावादद्वितीयत्वाच्च । तस्मादुपचारात्प्रधानादिकमेव सर्वज्ञं सर्वशक्ति च, अतस्तत्रैव समन्वय इति प्राप्ते इदं सूत्रम्—

ईक्षतेर्नाशब्दम् ॥ ५ ॥

न सांख्यादिपरिकल्पितं प्रधानादि वेदान्तशास्त्रेषु प्रतिपाद्यते । कुतः ? अशब्दं हि तत् । कथम् ? ईक्षतेः चेतनत्वश्रवणात् इत्यर्थः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'तत्तेज ऐक्षत' 'ता आप ऐक्षन्ते'त्यादौ तेजआदिवत् उपचारादयमीक्षणशब्द इति प्राप्ते इदं सूत्रम्—

गौणश्चेन्नात्मशब्दात् ॥ ६ ॥

गुणयोगादुपचारात्प्रवृत्तो गौणश्चेद्यदि प्रधानादीनामिति ब्रूषे, तन्न । कुतः ? आत्मशब्दात् । आत्मेति शब्दस्तस्मात् । तथाहि—'अनेन जीवेनात्मने'ति देवतायामात्मशब्द इति ॥ ६ ॥

नन्वात्मशब्दो ममात्मा भद्रसेन इतिवद् भृत्यवाची भूतात्मेन्द्रियात्मेति चेतनाऽचेतनवाची वा ज्योतिःशब्दो यथा क्रतुज्वलनवाचीत्यत आह—

तन्निष्ठस्य मोक्षोपदेशात् ॥ ७ ॥

नेत्यनुवर्त्तते । त्वदुक्तं न । कुतः? तस्मिन् प्रकृते सदणिमादिगुणे निष्ठा तादात्म्यबुद्धिर्यस्य सोयं तन्निष्ठस्तस्य श्वेतकेतो'स्तत्त्वमसी'ति वाक्यात्सत्त्वशुद्धस्य चेतनस्य मोक्षो ऽविद्यातत्कार्यनाशः 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये ऽथ संपत्स्ये' इत्युपदेशः श्रुत्या कथनं तस्मात् ॥ ७ ॥

अरुन्धतीदर्शनन्यायेन तन्निष्ठतेत्यत आह—

हेयत्वावचनाच्च ॥ ८ ॥

यद्ययं हानयोग्यं हेयं तस्य भावो हेयत्वं, नायमात्मेति ब्रूयात् न च तस्य वचनमभिधानं, तस्मान्नाऽरुन्धतीनयः । चकारस्त्वन्यदोषार्थः ॥ ८ ॥

'संयोगा विप्रयोगान्ता' इति न्यायेनाऽवचनमित्यत आह—

स्वाप्ययात् ॥ ९ ॥

एतत्कारणं प्रकृत्य यत्रैतदित्युपक्रम्य स्वपितिनामनिर्वचनेन 'स्वं ह्यपीतो भवती'ति स्वस्मिन्नात्मनि चेतनस्याप्ययो लयः, तस्मात् ॥ ९ ॥

कस्मिंश्चित् कल्पे प्रधानादि जगत्कारणं स्यादित्यत आह—

गतिसामान्यात् ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यादेव यदि कश्चिद्वेदान्तेषु तदप्यवगम्येत, न त्ववगम्यते, सर्वेष्वपि वेदान्तेषु गतिरवगतिश्चेतनकारणत्वस्यैव सामान्यं समानस्य भावः सामान्यं तस्मात् न त्वयुक्तम् ॥ १० ॥

नन्वस्तु चेतनं कारणं, मा भूत् सर्वज्ञमित्यत आह—

श्रुतत्वाच्च ॥ ११ ॥

श्रुतस्य भावः श्रुतत्वं तस्मात्सर्वज्ञं कारणं साक्षाद्वेदेनोक्तत्वादित्यर्थः । चकारस्तु रचनाऽनुपपत्त्यादिकं समुच्चिनोति ॥ ११ ॥

पूर्वाधिकरणे ऽन्नजसोर्गौणत्वे तत्प्रायपठितस्यापि ब्रह्मणो मुख्यमीक्षणमुक्तमात्मशब्दादिभ्यः, अत्र तु मयटो विकारे प्राचुर्ये च तुल्यत्वात् प्रायदृष्ट्या विकारार्थतैवेत्यानन्दमयो जीवः । प्रत्युदाहरणेनाक्षिप्य प्रथममेकदेशिनां मते समाधानं ब्रूमः—

आनन्दमयो ऽभ्यासात् ॥ १२ ॥

'अन्यो ऽन्तर आत्मा आनन्द मय' इत्यत्रानन्दमयः परमात्मा । कुतः? तं प्रकृत्य 'यद्येष आकाश आनन्दो न स्यात्' इत्यादिना बहुकृत्वो ऽभिधानमभ्यासस्तस्मात् ॥ १२ ॥

विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥ १३ ॥

विकारवाची मयट्शब्दो विकारशब्दः, तस्मान्नानन्दमयः परमात्मेति चेत्, एवं यदि तन्न । प्राचुर्यात्तत्प्रकृतवचने मयड् इति सूत्रात् प्राचुर्यार्थताप्यवगम्यते । ततश्चानन्दविकारो नानन्दमयः सः किन्तु आनन्दप्रचुर इत्यर्थः ॥ १३ ॥

मयट उभयसाधारण्ये प्राचुर्यं एवायमित्यत्र को हेतुरित्यत आह—

तद्धेतुव्यपदेशाच्च ॥ १४ ॥

तस्य हेतुः कारणम् 'एष ह्येवानन्दयाती'ति श्रुत्या व्यपदेशो ऽभिधानं तस्मात् । चकार आनन्दमयस्य कारणश्रवणमाह ॥ १४ ॥

ननु जीवो वा प्रधानं वा आनन्दस्य कारणमस्तिवत्यत आह—

मान्त्रवर्णिकमेव च गीयते ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्त्रवर्णे प्रतिपाद्यं मान्त्रवर्णिकं सत्यज्ञानादिरूपं गुहाप्रविष्टं यत्तदेवानन्दमयशब्देन गीयते । चकार उक्तदूषणान्तरसमुच्चयार्थः ॥१५॥

अस्तूपक्रमादिना जीव एवेत्यत आह—

नेतरोऽनुपपत्तेः ॥ १६ ॥

इतरो जीव इह न ग्राह्यः,कुतः? 'इदं सर्वमसृजते'त्याद्यनुपपत्तेः । न उपपत्तिरनुपपत्तिः तस्याः ॥ १६ ॥

नन्वस्तु इदं संकुचितमित्यत आह—

भेदव्यपदेशाच्च ॥ १७ ॥

भेदो लब्धलब्धभावः । 'रसं ह्येवायं लब्ध्वाऽऽनन्दी भवती'ति श्रुत्या तस्य व्यपदेशस्तस्मात् । चकारः संकोचानुपपत्त्यर्थः ॥१७॥

प्रकरणादिकमपि जीवस्य प्रधानस्य वाऽस्त्वित्यत आह—

कामाच्च नाऽनुमानापेक्षा ॥ १८ ॥

'सोऽकामयते'ति श्रुत्या योऽभिहितः कामस्तस्माच्चेतन एवानुमीयते इत्यनुमानं प्रधानं तस्याऽनपेक्षाप्रसङ्ग इति यावत् । चकारः पूर्ववत् ॥ १८ ॥

नन्वस्तूपचरित इत्यत आह—

अस्मिन्नस्य च तद्योगं शास्ति ॥१९॥

अस्मिन् प्रकरणे अस्य चेतनस्य तेन योगस्तादात्म्यं शास्ति उपदिशति शास्त्रं 'यदा ह्येवैष 'इत्यादिना । चकारः परिहारसमुच्चये ।

अथवा पुच्छशब्दस्य लाङ्गूले रूढस्याऽवयवे आधारे च लाक्षणिकत्वस्य तुल्यत्वे ऽवयवप्रायपाठात् 'ब्रह्मपुच्छ' मित्यत्रापि ब्रह्मानन्दस्यावयव इति प्रत्युदाहरणेनाक्षिप्य समाधत्ते सिद्धान्तेन—

आनन्दमयोऽभ्यासात् ॥

'अन्योन्तर आत्मानन्दमय' इत्यत्र 'ब्रह्मपुच्छं प्रतिष्ठे'ति स्वप्रधानमेव ब्रह्म । कुतः ? 'असन्नेवे'त्यादिना ब्रह्मणो ऽभ्यासात् ॥

विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विकारो ऽवयवः पुच्छं तस्य शब्दः, तस्मान्न स्वप्रधानमिति चेत्, एवं यदि तन्न। प्राचुर्यात् विकारप्रायपाठात्। विकारशब्दो न ब्रह्मणः स्वप्राधान्यं निवर्तयतीत्यर्थः ॥

तद्धेतुव्यपदेशाच्च ॥

तस्यानन्दमयादेर्जगतो हेतुः कारणं, भावप्रधानो निर्देशः। तद्धेतुत्वव्यपदेशः श्रुत्याऽभिधानं तस्मात्। शेषेष्वानन्दपदस्थानेषु ब्रह्म स्वप्रधानमिति पठित्वा पूर्ववद्व्याख्यानम् ॥ १९ ॥

पूर्वाधिकरणे मयटो विकारे आनन्दस्यानन्दमात्रे ब्रह्मणो देशकालवस्त्वपरिच्छिन्नवस्तुनि मुख्यार्थत्वेन पुनः प्राचुर्यानन्दमयाऽवयवेषु अतः प्रायपाठो बाधितः। पुनरिहापि मर्यादाधाररूपाणां श्रवणाज्जीव एव प्राप्तैश्वर्यविशेषः कश्चित्स्यादित्यत आह—

अन्तस्तद्धर्मोपदेशात् ॥ २० ॥

अथ य एषोन्तरादित्ये स परमेश्वरः। कुतः? तद्धर्मोपदेशात्। तस्य धर्मास्तद्धर्मा अपहतपाप्मत्वादयस्तेषाम्। 'उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदे'त्यादि श्रुत्युपदेशाभिधानं तस्मात् ॥ २० ॥

नन्वादित्यादिभ्यो नान्य ईश्वर इत्यत आह—

भेदव्यपदेशाच्चाऽन्यः ॥ २१ ॥

अस्ति देवतादिभ्यो ऽन्य ईश्वरः। कुतः? 'यआदित्ये तिष्ठ'न्नित्यादिना आधाराधेयभेदस्य व्यपदेशात्। चकार उक्तव्यावृत्त्यर्थः ॥ २१ ॥

पूर्वाधिकारणे ऽनन्यथासिद्धलिङ्गवशादनन्यथासिद्धरूपवस्त्वादि नीतम्, अत्र त्वाकाशश्रुत्यारूढसर्वभूतोद्गमादेर्लिङ्गस्य सङ्कोच इति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

आकाशस्तल्लिङ्गात् ॥ २२ ॥

'आकाश इति होवाचे'त्याकाशशब्दः परमात्मा। कुतः? तस्य परमात्मनो लिङ्गं सर्वभूतोत्पत्त्यादि तस्मात् ॥ २२ ॥

पूर्वाधिकारणे'ऽस्य लोकस्य का गति'रिति सर्वकारणस्य प्रदर्शनात् उत्तरेपि सर्वकारणमाकाशं श्रुत्या निरूप्य व्यवस्थापितम्, अत्र तु न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तादृक् किञ्चिदस्ति, प्रत्युत सुषुप्ताविन्द्रियाणां सर्वभूतसाराणां प्राणलयोत्पत्त्योः श्रवणात्प्रस्तावदेवता मुख्यप्राण इति प्रत्युदाहरणेनाक्षिप्याऽतिदेशेन समाधत्ते—

अत एव प्राणः ॥ २३ ॥

'प्राण इति होवाचे'त्यत्र प्राणशब्दः परमात्मा । कुतः ? अत एव सर्वभूतोद्गमादिलिङ्गादेव ॥ २३ ॥

पूर्वाधिकरणे तल्लिङ्गादाकाशप्राणश्रुत्योर्ब्रह्मपरत्वमुक्तं,नात्र ज्योतिर्वाक्ये तदस्तीति रूढमेव ज्योतिरिति प्रत्युदाहरणेन ज्योतिर्लिङ्गश्रवणादिति दृष्टान्तेनाक्षिप्य समाधत्ते—

ज्योतिश्चरणाभिधानात् ॥ २४ ॥

'अथ यदतः परो दिवो ज्योति'रिति ज्योतिःशब्दवाच्यं ब्रह्मैव । कुतः ? चरणाभिधानात् । पूर्वस्मिन् गायत्रीवाक्यपादोत्पत्त्यादिना चरणानां पादानामुक्तत्वात् ॥ २४ ॥

छन्दोऽभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात्तथा हि दर्शनम् ॥२५॥

पूर्वस्मिन्वाक्ये 'गायत्री वा इदं सर्वमेवे'त्यादिना गायत्र्याख्यस्य छन्दसो ऽभिधानात् न ब्रह्मण इति चेत्,एवं यदि तन्न । तथा चेतोर्पणनिगदात् चेतसो मनसो गायत्र्याख्ये छन्दसि ब्रह्मदृष्ट्या समर्पणं निगद्यते कथ्यते ऽनेनेति निगदस्तस्मात्। तथा हि दर्शनं हि यस्मात् यथात्र चेतसोर्पणस्य दर्शनमवलोकनं तथा ऽन्यत्रापि दर्शनम् । एतमेव बह्वृचा महत्युक्थ्ये मीमांसन्ते एत्यादि । अथवा चेतसोपर्णनिगदादिति चेतसोर्पणं यथा हि गायत्रीशब्दाऽभिधेये ब्रह्मणि निगद्यते तथाहि दर्शनम् । अन्यत्रापि छन्दोऽभिधायिना शब्देन 'सैषा विराडन्नादी'ति ब्रह्माऽभिधानस्य ॥ २५ ॥

ब्रह्मण्येव गायत्रीदृष्टिः किं न स्या ? दित्यत आह—

भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥ २६ ॥

भूतमिदं सर्वमादिशब्देन पृथ्वी शरीरं हृदयानि तान्येव पादा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विभागास्तेषां व्यपदेशः कथनं तस्योपपत्तिः सम्भवः तस्मात् । एवं गायत्र्यां ब्रह्मदृष्टिः गायत्रीशब्दाभिधेये ब्रह्मणि नाऽक्षरमात्रं गायत्री भूतादिपादवत् । चकारः पूर्वपक्षिणोऽपि पूर्ववाक्यब्रह्मण्यनुपपत्तिमाह ॥ २६ ॥

उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥ २७ ॥

उपदिश्यते इति वाक्यं परोदिवः अमृतं द्वितीयं, पञ्चमीसप्तम्यन्तत्वेन एतस्य पूर्वस्य च भेदात् । एवं यदि तन्न । कुतः ? उभयस्मिन्नपि पक्षद्वयेपि प्रातिपदिकार्थस्यैकत्वात् ब्रह्मप्रत्यभिज्ञानान्न विरोधः । तस्मात् । अथवा पञ्चम्यन्तत्वेन सप्तम्यन्तत्वेन वा व्यपदेश उभयस्मिन्नपि वृक्षाग्रे श्येनः वृक्षाग्रात्परतः श्येन इति च प्रत्यभिज्ञानान्न विरोध इति ॥ २७ ॥

पूर्वाधिकरणे दिवि दिव इति च प्रकृत्यभेदमाश्रित्य प्रत्यभिज्ञानेन ब्रह्मप्रतीतौ यच्छ्रुतेः प्रसिद्धार्थप्राधान्यात् ब्रह्मैव युक्तम्, अत्रापि पदार्थस्य प्राणादेः प्रधानत्वात् उपक्रमोपसंहारादिवाक्यार्थस्तदनुसारेण नेय इति देवता जीवो वा मुख्यप्राणो वा एकं वा द्वयं वा त्रयं वा ब्रह्मापि वा न तु ब्रह्मैवेति दृष्टान्तेनाक्षिप्य समाधत्ते—

प्राणस्तथाऽनुगमात् ॥ २८ ॥

'प्राणोऽस्मि प्रज्ञात्मे'ति प्राणशब्दः परमात्मा । कुत ?स्तथानुगमात् । तथाहीन्द्रप्रतर्दनाख्यायिकायां 'यं त्वं मनुष्याय हिततमं मन्यसे' इत्यादिलिङ्ग वाक्यपर्यालोचनया परमात्मनोऽनुगम उपगमो यस्मात् ॥ २८ ॥

न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् ॥ २९ ॥

नात्र परमात्मोपदेशः । कुतः ? वक्तुरिन्द्रस्यात्मन उपदेशः । कुतः? 'तं मामायुरमृतमुपास्वे'त्यादिना तस्मात् इति चेत्, एवं यदि नेति पूर्वस्मादनुवर्तते । त्वदुक्तं न । कुतः ? अध्यात्मसम्बन्धभूमा ह्यस्मिन्, हि यस्मात् अस्मिन् प्रकरणे आत्मानमधिकृत्य वर्तत इत्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्यात्मं तस्य सम्बन्धः। नन्वात्मप्रतिपादकानि 'यावदस्मिन् शरीरे प्राणी वसति तावदायुर्न वाचं विजिज्ञासीत वक्तारं विद्या'दित्युपक्रम्य तद्यथा 'रथस्यारेषु' इत्यादीनि तस्य भूमा बाहुल्यम् ॥ २९ ॥

कथं तर्हि 'मामायु'रित्यादिना वक्तुरिन्द्रस्यात्मोपदेशः ?—

शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ ३० ॥

शास्त्रस्य 'तत्त्वमसी'त्यादेर्दृष्टिरर्थाऽवगतिः, तया उपदेशो ऽभिधानं वामदेववत्। यथा वामदेवो 'ऽहं मनुरभव'मित्याद्युक्तवानेवमिति॥३०॥

जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥ ३१ ॥

जीवश्च मुख्यप्राणश्च तयोर्लिङ्गं 'वक्तारं विद्या'दिति जीवस्य 'प्राण एव प्रज्ञात्मेदं शरीरं परि गृह्य'त्यादि प्राणस्य। तस्मान्न परमात्मन एव ग्रहणमिति चेदेवं यदि तन्न। उपासात्रैविध्यात् उपासनमुपासा त्रिस्रो विधाः यस्याः सा त्रिविधा। तस्या भावस्त्रैविध्यम् उपासात्रैविध्यं तस्मात्। जीवमुख्यप्राणग्रहणे वाक्यभेदः स्यात्, न ब्रह्मग्रहणे इत्यर्थः। प्राणशब्दः कथं ब्रह्मणि?त्यतआह–आश्रितत्वात् अन्यत्रापि 'प्राण इति होवाचे' त्यादौ ब्रह्मणि च स्वीकारात्। तत्तल्लिङ्गादिति चेत्तत्राह–इह तद्योगात् इहास्मिन्नध्याये तेषां लिङ्गानां योगात् विद्यमानत्वात्। तत्र आचार्यैकदेशीयास्तु एवं व्याचक्षते–जीवमुख्यप्राणलिङ्गैश्च ब्रह्मण एव उपासायास्त्रैविध्यं विवक्षितमुक्तं तथापि जीवब्रह्मदेवतामुख्यप्राणानां लिङ्गसन्निपाते ब्रह्मलिङ्गं बलीय इति तेनोक्तम्। यच्च'प्यन्तस्तद्धर्मोपदेशात्, इत्यत्रैतदप्युक्तं तथाप्यत्र च कार्यकारणधर्मयोः [सन्नि]पाते कारणमेवाश्रयणीमिति विशेषः ॥ ३१ ॥

इति ब्रह्मसूत्रदीपिकायां प्रथमाध्यायस्य प्रथमः पादः ॥

——— o-o-o ———

पूर्वपादे स्पष्टब्रह्मलिङ्गानि वाक्यानि विचारितानि,
द्वितीयपादे ऽस्पष्टब्रह्मलिङ्गानि वाक्यान्युपासनाप्रचुराणि रूढिविषयाणि विचार्यन्ते—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वत्र प्रसिद्धोपदेशात् ॥ १ ॥

सर्वेष्वपि वेदान्तेषु यत्प्रसिद्धं ब्रह्म सिद्धेरालम्बनेन इह सर्वं खल्विदं ब्रह्मैवेत्युक्तमाह ॥ १ ॥

विवक्षितगुणोपपत्तेश्च ॥ २ ॥

वक्तुमिष्टा विवक्षिता उपासनायाम् उपादेयत्वेनोपदिष्टाः सत्यसङ्कल्पप्रभृतयः, विवक्षिताश्च ते गुणाश्चेति तेषाम्। यस्मिन् ब्रह्मण्युपपत्तिः सम्भवः तस्याः। चकार उभयसाधारण्यनिवारणार्थः ॥ २ ॥

जीवेऽपि केषां चित्सद्दशत्वाज्जीव एवेह स्या दित्यत आह—

अनुपपत्तेस्तु न शारीरः ॥ ३ ॥

शारीरो जीव इह न ग्राह्यः। कुतः? सत्यसङ्कल्पादीनां तस्मिन्ननुपपत्तेरसत्त्वादेव ॥ ३ ॥

ननु अणुत्वादीनां जीवधर्माणां ब्रह्मण्यसम्भवः समः, अतो जीवो न स्या ? दित्यत आह—

कर्मकर्तृव्यपदेशाच्च ॥ ४ ॥

'एत'मिति ब्रह्मणः कर्मत्वस्य 'अभिसम्भवितास्मी'ति जीवस्य कर्तृत्वस्य व्यपदेशस्तस्मात्। चकारो ऽणुत्वादेर्ब्रह्मणि सद्भावसमुच्चयार्थः ॥ ४ ॥

ननु मामहं जानामीतिवदयं कर्मकर्तृव्यपदेशः स्यादित्यत आह—

शब्दविशेषात् ॥ ५ ॥

शब्दाज्जीवस्याऽभिधायिनः शाखान्तरे ऽन्तरात्मेति सप्तमीतत्पुरुषे हिरण्मयत्वादिगुणाभिधायको विशेषो यस्तस्मात्। सति चान्यस्मिन्नेकस्मिन् कर्मकर्तृभाव इत्यभिप्रायः ॥ ५ ॥

शब्दोऽपि 'यजमानः प्रस्तर' इत्यादिवदप्रासिद्धार्थ इत्यत आह—

स्मृतेश्च ॥ ६ ॥

स्मरणं स्मृतिः 'ईश्वरः सर्वभूताना' मित्यादिः। चकारः प्रसिद्ध्यन्तरसमुच्चयार्थः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॥ ७ ॥

अर्भकमल्पमोको नीडं यस्याः सा ऽर्भकौकाः तस्या भावस्तत्त्वं तस्मात्। 'एष आत्मान्तर्हृदय' इति परिच्छिन्नायतनत्वात्। न केवलमेवं तस्य जीवस्य व्यपदेशो ऽभिधानम्। 'अणीयान् व्रीहेर्वा यवाद्वा' इत्यादि। तस्मात् चकार उक्तसमुच्चयार्थः । न ब्रह्मग्रहणं न्याय्यमिति चेदेवं यदि तन्न। कुतः ? निचाय्यत्वात्। एवमणीयस्त्वं गुण ईश्वरो निचाय्यो द्रष्टव्यः । तस्य भावस्तत्त्वं तस्माद्व्योमवच्च । यथा सर्वगतमपि व्योम सूचीपाशाद्यपेक्षया ऽर्भकौका अणीयश्च एवम् । चकारो ब्रह्मणः सर्वात्मत्वसमुच्चयार्थः ॥ ७ ॥

संभोगप्राप्तिरिति चेन्न वैशेष्यात् ॥ ८ ॥

सम्यग्भोगः संभोगः सुखदुःखादिस्तस्य प्राप्तिः । सर्वात्मत्वे ईश्वरस्य भोक्तृत्वादिप्रसङ्ग इति चेत् एवं यदि तन्न। कुतः? वैशेष्यात्। 'अनश्नन्न्योऽभिचाकशीती'त्यादिना ऽवगतरूपस्य भोगाभावस्तस्मात् ॥८॥

पूर्वाधिकरणे 'सर्वं खल्विदं ब्रह्मे'त्यपरादपि वाक्यान्मनोमयवाक्ये ब्रह्म स्वीकृतं, तस्य च वैशेष्येण हेतुना भोक्तृत्वं समर्थितं, तस्मादेव जीवो भोक्ता अत्ता यस्येत्यस्मिन् वाक्ये ऽप्युपसंहर्तृत्वं तथाप्यग्निरन्नाद इति श्रुतिलोकप्रसिद्धिभ्यामग्निरेवाऽत्ता तद्वत्समासप्रसिद्धिभ्यां मनोमयं ब्रह्मेति दृष्टान्तेनाक्षिप्य समाधत्ते—

अत्ता चराऽचरग्रहणात् ॥ ९ ॥

अत्ता संहर्त्ता परमेश्वरः । कुतः ? चराऽचरग्रहणात् 'यस्य ब्रह्म च क्षत्रं चे'त्यादिना चराचरस्य जङ्गमस्थावरस्य ग्रहणं स्वीकरणं तस्मात् ॥ ९ ॥

नन्वग्निजीवयोरपि साधारण्ये कुतः परमात्मैवात्ते?त्यत आह—

प्रकरणाच्च ॥ १० ॥

प्रकरणं महावाक्यं 'न जायते म्रियते' इत्यादि तस्मात् । चकारः 'क इत्था वेदे'त्यादि दुर्विज्ञानत्वादिसमुच्चयार्थः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वाधिकरणे मृत्युसन्निपातात् ब्रह्मक्षत्रादिविश्वमित्याश्रित्येश्वरः संहर्त्तेत्युक्तम्, इहापि तच्छब्दस्य सन्निहितगुहाप्रविष्टादिशब्दानुसारेण बुद्धिजीवपरत्वदृष्टान्तेनाक्षिप्य समाधत्ते—

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥११॥

गुहा बुद्धिर्हृदयं वा तां प्रविष्टौ तस्या अन्तःस्थितौ जीवपरमात्मानौ, हि यस्मात्तस्य जीवस्य दर्शनं प्रत्यक्षेण तस्य परमात्मनश्च, दर्शनश्रुत्या 'गुहाहित'मित्यादिकया तस्मात् ॥ ११ ॥

ननु बुद्धेरप्यस्ति दर्शनमित्यत आह—

विशेषणाच्च ॥ १२ ॥

'सोऽध्वनः पारमाप्नोति' इति गन्तृत्वेन जीवस्य 'तद्विष्णोः परमं पद'मिति गम्यत्वेन परमात्मनो विशेषणं तस्मात् । चकारो बुद्धेः प्रकृतिविशेषणाभावं समुच्चिनोति ॥ १२ ॥

पूर्वाधिकरणे प्रथमं पिबन्ताविति सहशयोर्जीवपरमात्मनोर्ग्रहणानुसारेण गुहाप्रवेशादिं चरमं नीतं यथा तद्वदेव एव प्रथमं छायात्मनः प्रतीतिरमृतत्वदीनां नयनं तस्मिन् । अत्राप्यत्यन्ताऽरुचिः, स किं जीवो वा देवतात्मा वेति दृष्टन्तेनाक्षिप्य समाधत्ते—

अन्तर उपपत्तेः ॥ १३ ॥

'य एषोऽक्षिणी'ति चक्षुषोऽन्तरः पुरुषः स परमेश्वरः । कुतः? अमृतत्वाऽभयत्वादीनां तत्रोपपत्तेः संभवात् ॥ १३ ॥

कथं परमेश्वरः सर्वगतोऽक्षिणीत्यत आह—

स्थानादिव्यपदेशाच्च ॥ १४ ॥

सर्वगतस्याप्युपासनार्थः स्थानस्य पृथिव्यादेः, आदिशब्देन रूपस्य हिरण्मयश्मश्र्वादेर्नाम उदितत्वादे'र्यः पृथिव्यां तिष्ठ'न्नित्यादिना व्यपदेशात्तस्मात् । चकारोऽन्यस्य स्थानाद्यभावसमुच्चयार्थः ॥ १४ ॥

मा भूदयमक्षिणि, सुखविशिष्टेऽस्त्वित्यत आह—

सुखविशिष्टाऽभिधानादेव च ॥ १५ ॥

वाक्योपक्रमे प्रक्रान्तस्य सुखविशिष्टस्य 'प्राणो ब्रह्म कं ब्रह्मे'त्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिना ब्रह्मण एव न त्वन्यस्याऽभिधानं, तस्मादत्र ब्रह्मण एव ग्रहणम् । चकारोपदेशः सहसिद्धं चक्षुस्थानम् अस्ति च कश्चिज्जीवस्याऽनुपास्यस्याऽव्यापिनो ऽक्षिस्थानाऽसम्भवसमुच्चयार्थः ॥ १५ ॥

उपक्रमो ऽप्यन्यस्य किं न स्या?दित्यत आह—

श्रुतोपनिषत्कगत्यभिधानाच्च ॥ १६ ॥

श्रुता उपनिषत् येन श्रुतोपनिषत्कस्तस्य या गतिरीश्वरश्रुतिस्मृतिप्रसिद्धो देवयानाख्यो मार्गस्तस्य 'ये उच्चैर्वास्मिन् शरव्यं कुर्वन्ति' इत्यादिना ऽभिधानात् । चकारो ब्रह्मशब्दादन्यत्राऽनुपपत्तिसमुच्चयार्थः ॥ १६ ॥

छायात्मविज्ञानात्मदेवतात्मपरमात्मनां कथंचिदुपपत्तिसाम्ये कुतः परमात्मैव गृह्यते नेतर? इत्यत आह—

अनवस्थितेरसंभवाच्च नेतरः ॥ १७ ॥

न अवस्थितिरनवस्थितिः सर्वदा अवर्तमानत्वं छायात्मनः पुरुषान्तरस्य समीपे ऽसत्यविद्यमानत्वं, विज्ञानात्मनो रसादिग्रहणे सुषुप्तिसमये वा ऽविद्यमानत्वं, देवतात्मनो नियामकाऽभावादविद्यमानत्वं, तस्याः । न केवलमेतदमृतत्वादीनां त्रयाणामप्यसंभवः समानः जन्मादिमत्त्वात् । तस्माच्चकार उक्ताऽनुक्तदूषणसमुच्चयार्थः ॥ १७ ॥

न ईश्वरादन्यश्छायात्मा विज्ञानात्मा देवतात्मेति च पूर्वाधिकरणे स्थानादिव्यपदेशादिना ऽन्तराक्षिणीश्वर इत्युक्तं, स्यात्जीवस्याप्यमृतत्वादिवत् प्रधानस्यापि स्यादित्याक्षिप्य समाधत्ते—

अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥ १८ ॥

'यः पृथिवीमन्तरो यमयती'त्यादावन्तर्यमयति नियमयतीत्यन्तर्यामी उद्दिष्टः स परमेश्वरो ऽधिदैवादिषु दैवमधिकृत्य वर्ततइत्याधिदैवम् । आदिशब्देनाऽध्यात्ममधिभूतमित्यादि तेष्वधिदैवादिषु । कुतः? तद्धर्मव्यपदेशात् तस्य परमेश्वरस्य धर्मास्तद्धर्माः 'यं पृथिवी न वेदे'त्यादिना दुर्विज्ञानत्वादयः तेषां व्यपदेशादभिधानात् ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अदृष्टत्वादिगुणेभ्यः प्रधानं किं न स्या?दित्यत आह—

न च स्मार्तमतद्धर्माऽभिलापात् ॥ १९ ॥

न च स्मृत्या प्रतिपाद्यं स्मार्तं प्रधानं, कुतः? अतद्धर्माऽभिलापात् । तस्य प्रधानस्य धर्मास्तद्धर्मा न तद्धर्मा अतद्धर्माः 'अदृष्टो द्रष्टे'त्यादिनोक्ता द्रष्टृत्वादयस्तेषामभिलापो ऽभिधानं तस्मात् ॥ १९ ॥

शारीरस्तर्हि स्यादित्यत आह—

शारीरश्चोभयेऽपि हि भेदेनैवमधीयते ॥२०॥

शरीरे भवः शारीरो जीवः । चकारो नकारानुवृत्त्यर्थः । शारीरोऽपि न । कुतः ? हि यस्मात् उभयेऽपि काठका माध्यन्दिनाश्च परमात्मना भेदेन 'यो विज्ञाने तिष्ठन्नात्मनि तिष्ठ'न्नित्येवं शारीरमधीयते पठन्ति ॥ २० ॥

पूर्वाधिकरणे द्रष्टृत्वादिश्रवणात् न प्रधानं य आत्मनि इति भेदश्रवणात्,न जीवोप्यन्तर्यामीत्युक्तं,तद्वदत्राभानादिति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

अदृश्यत्वादिगुणको धर्मोक्तेः ॥ २१ ॥

यत् तदद्रेश्यमित्यादिनोक्तः न दृश्यो ऽदृश्यः तस्य भावस्तत्त्वं तदादिर्येषामग्राह्यत्वादीनान्ते अदृश्यत्वादयः ते गुणा यस्य सोयमदृश्यत्वादिगुणको भूतयोनिः परमेश्वरः । कुतः?'धर्मोक्तेः । सर्वधर्मा सर्वज्ञ' इत्यादिनोक्ताः तेषामुक्तेरभिधानात् ॥ २१ ॥

जीवप्रधानपदार्थयोरपि केषां चिद्धर्माणां संभवात् कुतो न स्वीकार? इत्यत आह—

विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥२२॥

विशेषणं 'दिव्यो ह्यमूर्त्तःपुरुष' इति जीवाद्यतिरिक्तत्वेन भूतयोनेर्व्यपदेशः । अक्षात्परतः परप्रधानाख्यपदार्थात्पञ्चमीनिर्दिष्टात्परइति प्रथमान्तत्वेन भूतयोनेः परमेश्वरस्य भेदेन व्यपदेशः । विशेषणं च भेदव्यपदेशश्च विशेषणभेदव्यपदेशौ ताभ्यां नेतरौ जीवप्रधानाख्यपदार्थौ ॥ २२ ॥

परशब्देन भूतयोनेरेवाऽवगमः कुतः? इत्यत आह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूपोपन्यासाच्च ॥ २३ ॥

रूपस्य भूतयोनेः स्वरूपस्याऽनन्तरमुपन्यासादभिधानात् 'पुरुष एवेदं विश्वकर्मे'त्यादिना। चकारोन्यस्य तदसंभवार्थः ॥ २३ ॥

पूर्वाधिकरणे सर्वज्ञत्वं न प्रधानस्य सार्वात्म्येन च पुरुषस्य न ग्रहणं किं त्वीश्वरस्यैवेत्युक्तं,तदिदं सार्वात्म्यं जाठरे वा सर्वात्मनि वा जीवेपि वा भूताग्नौ वा ऽनैकान्तिकमित्याक्षिप्य समाधत्ते—

वैश्वानरः साधारणशब्दविशेषात् ॥ २४ ॥

'आत्मानमेवेमं वैश्वानर'मित्यादिनोक्तो वैश्वानरः विश्वश्चासौ नरश्च विश्वानरः विश्वे वा नरा अस्येति वैश्वानरः परमेश्वरः। कुतः? साधारणशब्दविशेषात्। साधारणशब्दयोर्विशेषः साधारणशब्द-विशेषः वैश्वानरशब्दो ऽग्न्यादित्यात्मनां साधारण आत्मनश्च जीव-परमात्मनोर्यद्यपि तथाप्यस्ति विशेषः 'तस्य ह वा एतस्ये'त्यादिनो-क्तो द्युमूर्धत्वादिस्तस्मात् ॥ २४ ॥

द्युमूर्धत्वादिकमपि परमेश्वरस्यैव कुत? इत्यत आह—

स्मर्यमाणमनुमानं स्यादिति ॥ २५ ॥

'यस्याग्निरास्य'मित्यदिना स्मर्यमाणं रूपमस्य परमेश्वरस्याऽनु-मीयते ऽनेनेत्यनुमानं लिङ्गं स्यात् भवेत् इति यस्मात् तस्मात् वैश्वा-नरः परमात्मैवेत्यर्थः ॥ २५ ॥

शब्दादिभ्योन्तःप्रतिष्ठानान्नेति चेन्न तथा दृष्टयुपदेशादसम्भवात् पुरुषविदमपि चैन मधीयतएके ॥ २६ ॥

शब्दादिभ्यः परेभ्यः परमेश्वराग्निशब्दौ आदिशब्दाद्धृदयं गा-र्हपत्याद्यग्नित्रेताकल्पनादिशब्दौ च तदादयश्च तेभ्यः। न केवलमेव-मन्तः प्रतिष्ठानादपि 'पुरुषोन्तःप्रतिष्ठितं वेदे'त्यादिना पुरुषस्यान्तरव-स्थानाच्च न परमेश्वरो वैश्वानर इति चेत् एवं यदि तन्न। कुतः?जाठरा-परित्योगेन दृष्ट्युपदेशात्परमेश्वरो जाठरीकारणीय इति कथनात्। अथवा जाठरवैश्वानरोपाधेः परमेश्वरस्य द्रष्टव्यत्वोपदेशात् दृष्ट्यु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पदेशः कुत? इत्यत आह-अस्मिन् द्युमूर्धत्वादेरसंभवात् असत्त्वात्। न केवलमेतस्य पुरुषस्यापि अधीयते चैनमग्निं पुरुषं वाजसनेयिनः। अयमेवाऽपि चेत्यस्याऽभ्युच्चयस्यार्थः । तथा हि पठन्ति'च एषोऽग्नि-वैश्वानरो यत्पुरुषविदमपि चैनमधीयते। इति सूत्रविषयं पठन्ति, तेषामेषोर्थः केवलजाठरपरिग्रहे पुरुषे ऽन्तःप्रतिष्ठितत्वं केवले स्यात् न तु पुरुषविदमपि चैन मधीयते वाजसनेयिनः पुरुषविदं पुरुषो ऽन्तः-प्रतिष्ठितं वेदेति ॥ २६ ॥

मा भूज्जाठरः, अस्तु देवता भूतं चेत्यत आह—

अत एव न देवता भूतं च ॥ २७ ॥

अत एव उक्तहेतुभ्यो द्युमूर्धत्वादिभ्यः न देवता आदित्यादिः न च भूतं भौमोऽग्निः ॥ २७ ॥

साक्षादप्यविरोधं जैमिनिः ॥ २८ ॥

उक्तेभ्यो जाठरप्रतीको जाठरोपाधिर्वा वैश्वानर उपास्य इत्युक्तं, जैमिनिस्त्वाचार्यः साक्षादपि प्रतीकोपाधिनापि वैश्वानरस्येश्वरस्योपासनमविरुद्धं मन्यते ॥ २८ ॥

अस्मिन् पक्षे कथं प्रादेशमात्रश्रुति?रित्यत आह—

अभिव्यक्तेरित्याश्मरथ्यः ॥ २९ ॥

'यस्त्वेनमेवं प्रादेशमात्र'मिति श्रुतिरतिमात्रस्यापीश्वरस्याऽविरुद्धेत्याश्मरथ्य आचार्यो मन्यते। कुतः?अभिव्यक्तेः। अतिमात्रोपीश्वरो भक्तानां प्रशदेशमात्र एवाऽभिव्यज्यते प्रकटीभवति,यतः प्रदेशेषु वा उपलब्धिस्थानेषु विशेषेणाऽभिव्यज्यते। इतिशब्दः प्रकारवचनः॥२९॥

अनुस्मृतेर्बादरिः ॥ ३० ॥

बादरिराचार्यः प्रादेशमात्रे हृदये प्रतिष्ठिते वसति स सर्वत्र प्रतिविषयं प्रसन्न्यायेन प्रादेशमात्रश्रुतेरविरोधं मन्यते। प्रादेशमात्रत्वे चायमप्रादेशमात्रोप्यनुस्मरणीयः प्रादेशमात्रश्रुतेरर्थावबुद्धये ॥ ३० ॥

संपत्तेरिति जैमिनिस्तथा हि दर्शयति ॥३१॥

सम्पत्तिनिमित्ता वा स्यात्प्रदेशमात्रश्रुतिरिति जैमिनिराचार्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्यते । कुतः ? तथा हि-समानप्रकरणे वाजसनेयिब्राह्मणे मूर्धादिष्वनुक्रान्तेषु जठरादीनवयवान् प्रादेशमात्रश्रुतिः परमेश्वरस्य दर्शयति 'प्रादेशमात्रमिह वै देवाः सुविदिता' इत्यादिना ॥३१॥

नन्वत्राऽविद्यमाने परमेश्वरे कथं सरूपत्तिरपीत्यत आह—

आमनन्ति चैनमस्मिन् ॥ ३२ ॥

आमनन्ति चैनं परमेश्वरमस्मिन् चिबुकान्तराले जाबाला 'य एषोऽनन्त'इत्युपक्रस्य'वरणायां नास्यां च मध्ये प्रतिष्ठित'इत्यादिना । चकारः सर्वगतस्याऽत्रात्यन्ताऽसत्त्वस्य शङ्काया अनुदयमाह ॥ ३२ ॥

इति ब्रह्मसूत्रदीपिकायां प्रथमाध्यायस्य द्वितीयः पादः ।

———:o:o:o:———

तृतीये पादे स्पष्टब्रह्मलिङ्गानि वाक्यानि निर्विशेषप्रचुराणि विचार्यन्ते ।

द्युभ्वाद्यायतनं स्वशब्दात् ॥ १ ॥

द्यौश्च भूश्च द्युभुवौ द्युभुवावादिर्यस्य तदिदं द्युभ्वादि जगत् तस्याऽऽयतनमाश्रयः 'यस्मिन्द्यौः पृथिवी चान्तरिक्ष'मित्यस्मिन् सन्दे प्रतिपाद्यं ब्रह्म । कुतः? स्वशब्दात् । स्वस्यात्मनो वाचकः शब्दः स्वशब्दः 'तमेवैकं जानथ आत्मान'मित्यत्रात्मशब्दः, तस्मात् ॥ १ ॥

ननु प्रधानमेव कुतो न स्यादित्यत आह—

मुक्तोपसृप्यव्यपदेशात् ॥ २ ॥

मुक्ता अविद्यातत्कार्यशून्यास्तैरुपसृप्यं तद् ब्रह्म यतस्तस्य तथा हि 'तथा विद्वा'नित्यादिना ऽस्मिन् प्रकरणे व्यपदेशो विशेषेणाऽपदेशोऽभिधानं तस्मात् ॥ २ ॥

नन्वस्तु मुक्तोपसृप्यं ब्रह्म जगत्कारणं, प्रधानञ्च स्यादित्यत आह—

नाऽनुमानमतच्छब्दात् ॥ ३ ॥

अनुमीयते इत्यनुमानं प्रधानं नात्र । कुतः ? अतच्छब्दात् । न तस्य शब्दः तस्मात्प्रधानप्रतिपादकशब्दाऽभावादित्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्तु तर्हि चेतन इत्यत आह—

प्राणभृच्च ॥ ४ ॥

चकारो ऽनन्तरहेतोरनुकर्षणार्थः । प्राणान् बिभर्तीति प्राणभृ-जीवः सोपि न । कुतः ? 'यः सर्वज्ञ' इत्याद्यतच्छब्दात् ॥ ४ ॥

जीवब्रह्मणोरभेदात् जीवः स्यादित्यत आह—

भेदव्यपदेशात् ॥ ५ ॥

भेदस्य 'तमेवैकं जानथ आत्मान'मिति ज्ञेयज्ञातृभावेन व्यपदेशात् जीवब्रह्मणोर्व्यपदेशात् ॥ ५ ॥

कुतो ब्रह्मैवाऽस्याश्रय? इत्यत आह—

प्रकरणात् ॥ ६ ॥

ब्रह्मण इति वाक्यशेषः । 'कस्मिन्' इत्युपक्रमस्यैकविज्ञानेन सर्वविज्ञानादिकं श्रूयमाणं ब्रह्मण्येवोपपन्नमित्यर्थः ॥ ६ ॥

ननु प्रकरणादिना जगत्कारणमेव प्रतीयते नेश्वर इत्यत आह—

स्थित्यदनाभ्यां च ॥ ७ ॥

स्थितिरेवस्थितिरनशनमिति यावत् । 'अनश्नन्नन्यो ऽभिचाकशीती'ति श्रुतेः । अदनं भक्षणं 'पिप्पलं स्वाद्वत्तीति'श्रुतेः । स्थितिश्च अदनं च ताभ्यामीश्वरो जीवादन्यः सिद्धः । न चेश्वरादन्यत् जगत्कारणमिति चकारार्थः । फलाचिन्त्येयम् ॥ ७ ॥

पूर्वाधिकरणे आत्मशब्दात् द्युभ्वाद्यायतनं ब्रह्मेत्युक्तं, तत्रात्मशब्दः प्राणे ऽनेकान्त इत्याक्षिप्य समाधत्ते—

भूमा संप्रसादादध्युपदेशात् ॥ ८ ॥

बहोर्भावो भूमा 'भूमे'त्यादौ परमात्मैव स्वीकरणीयः । कुतः ? सम्प्रसादादध्युपदेशात् । सम्यक् प्रसीदत्यस्यामवस्थायामिति सुषुप्तिः सम्प्रसादः तया तस्यामवस्थायामवस्थितः प्राणी लक्ष्यते । सम्प्रसादात्प्राणात् अधि उपरि 'एष'त्वित्यादिना उपदेशादभिधानात्॥८॥

ननु 'प्राणो ह पिते'त्यादिना प्राणोपि भूमा श्रुत इत्यत आह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धर्मोपपत्तेश्च ॥ ९ ॥

धर्माणां 'यत्र नाऽन्यत्पश्यति नाऽन्यत् शृणोती'त्यादीनां तास्मन् परमात्मन्युपपत्तेः । चकारस्तेषां प्राणे ऽनुपपत्तिं चाह ॥ ९ ॥

पूर्वाधिकरणे प्राणसार्वात्म्यं गौणमित्युक्तं तन्न, अब्रह्मणोऽपि प्रणवस्य सार्वात्म्यदर्शनादित्याक्षिप्य समाधत्ते—

अक्षरमम्बरान्तधृतेः ॥ १० ॥

अक्षुतइत्यक्षरं न क्षरतीति वा । 'एतद्वै तदक्षर'मित्याद्युक्तम् अक्षरं ब्रह्मैव । कुतः ? अम्बरान्तधृतेः । अम्बरमाकाशमव्याकृतं तदन्ते यस्य तदिदमम्बरान्तं तस्य धृतिर्धारणं तस्याः ॥ १० ॥

धृतिरपि चेतनस्य न स्यादित्यत आह—

सा च प्रशासनात् ॥ ११ ॥

सा धृतिः परमेश्वरस्यैव कर्म । कुतः ? प्रशासनात् । प्रकर्षेण शासनम् 'एतस्याऽक्षरस्य प्रशासने'इत्यादिना श्रुतं तस्मात् ॥ ११ ॥

अस्तु प्रशासनमप्यौपचारिकमित्यत आह—

अन्यभावव्यावृत्तेश्च ॥ १२ ॥

अन्यस्याऽचेतनस्य भावो ऽन्यभावः अचेतनत्वं, तस्माद्व्यावृत्तिः पृथक्करणम् 'अक्षरस्य प्रशासितुरिदं दृष्टम्' इत्यादिना । चकार उपचारनिवारणार्थः ॥ १२ ॥

पूर्वाधिकरणे ऽक्षरशब्दवाच्यं ब्रह्म प्रशासनादित्युक्तम्, इदानीं 'तदपरमेव ब्रह्म ध्यायीते'ति ब्रह्मलोकफलदर्शनादिति बुद्धिसन्निधानादाक्षिप्य समाधत्ते—

ईक्षतिकर्मव्यपदेशात्सः ॥ १३ ॥

'परं पुरुषमभिध्यायीते'ति परः पुरुषः परमात्मा । कुतः ? 'ईक्षतिमीक्षते'इत्यन्तेन ईक्षतिकर्मणो व्यपदेशः । तस्य कर्म तद्व्याप्यं तस्य व्यपदेशः तस्मात् । स एव चेह परपुरुषो ऽभिध्यातव्यः प्रत्यभिज्ञायते ॥ १३ ॥

पूर्वाधिकरणे ईक्षतिध्यायतिकर्मणोः पुरुषत्वेन प्रत्यभिज्ञानादीक्षति ध्यायतिकर्म परं ब्रह्मेत्युक्तं, तदयुक्तं, दहरवाक्योपक्रमोक्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जीवस्य वाक्यशेषे 'स उत्तम' इत्युत्तमपुरुषशब्दाऽभिधानात् तद्वत्पुरुषशब्दस्यापि ब्रह्मविषयत्वाऽसम्भव इत्याक्षिप्य समाधत्ते—

दहर उत्तरेभ्यः ॥ १४ ॥

'दहरो ऽस्मि'न्निति वाक्ये दहरः सूक्ष्मः परमात्मा। कुतः? उत्तरेभ्यो हेतुभ्यो 'यावान् वा अयमाकाश' इत्यादिनोक्तेभ्यः ॥ १४ ॥

ननु ब्रह्मपुरशब्दश्रवणात् कुतो न जीव ? इत्यत आह—

गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च ॥१५॥

गतिर्गमनं, शब्दो ब्रह्मलोकशब्दः 'अहरहर्गच्छन्त्येतं ब्रह्मलोक'मिति श्रुतेः। गतिश्च शब्दश्च गतिशब्दौ ताभ्यां गतिशब्दभ्यां दहरः सः। तथा हि दृष्टं हि यथा ऽत्र तथा श्रुत्यन्तरेपि 'सता सौम्ये'त्यादिके इत्यहरहर्ब्रह्मलोकगमनं दृष्टमवगतम्। न च ब्रह्मलोक इति वैयधिकरण्यम्, यत एतदेवाऽहरहर्गमनं लिङ्गं च। लिङ्गमपि सामानाधिकरण्ये ॥ १५ ॥

नन्वाकाशोपमया 'गगनं गगनाकार'मिति न्यायेनाऽऽकाश एव जीवो वा कुतो न स्यात् ? इत्यत आह—

धृतेश्च महिम्नो ऽस्यास्मिन्नुपलब्धेः ॥१६॥

धारणं धृतिः तस्याः। 'स सेतुर्विधृति' रिति श्रुतेः दहरः परमात्मैव अस्य धारणस्य महिम्नः प्रभावस्या 'ऽस्मिन् परमेश्वरे सूर्याचन्द्रमसौ विधृतौ तिष्ठत' इत्यादिनोपलब्धेश्च उपलम्भात् ॥ १६ ॥

ननु रूढ्या भूताकाश एव किं दहरो न स्यात्? इत्यत आह—

प्रसिद्धेश्च ॥ १७ ॥

प्रसिद्धिर्वैदिकी 'आकाशो ह नामे'त्यादिना तस्याः। चकारो ऽन्यस्याऽनुपपत्त्यर्थः।

इतरपरामर्शात् स इति चेन्नाऽसम्भवात् ॥१८॥

इतरस्य जीवस्य परामर्शो लिङ्गम्। 'अथ य एष सम्प्रसाद' इत्यादि। तस्मात्स जीवो दहर इति चेत् एवं यदि तन्न। कुतः? असम्भवात्। 'यावत् यावान्वा ऽय माकाश' इत्यादेर्लिङ्गस्येति शेषः ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वाधिकरणेऽपहतपाप्मत्वादयो ब्रह्मधर्मा उक्ताः । ते जीवेऽपि सम्भवेयुरित्याक्षिप्य समाधत्ते—

उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥ १९ ॥

उत्तरात् 'य एषोक्षिणि पुरुषो दृश्यते' इति प्राजापत्याद्वाक्याज्जीवोऽत्र चेद्यदि तन्न । कुतः ? आविर्भूतस्वरूपो यतः आविर्भूतं स्वरूपमस्येत्याविर्भूतस्वरूपः अचिलक्षितो निरुपाधिकस्वरूपः । तुशब्दो नकारार्थः ॥ १९ ॥

'अथ य एष सम्प्रसाद' इत्यादिजीवपरामर्श एवं सति व्यर्थः स्यादित्यत आह—

अन्यार्थश्च परामर्शः ॥ २० ॥

परामर्शो हि जीवादन्यस्य परमात्मनो रूपस्य प्रदर्शनार्थः । 'एष आत्माऽपहतपाप्मे'त्यादिरूपाऽवगतिप्रयोजनः। अथ वाऽन्योऽर्थो यस्य स तथा । चकारो जीवग्रहणेऽपुरुषार्थमाह ॥ २० ॥

अल्पश्रुतेरिति चेत्तदुक्तम् ॥ २१ ॥

अल्पाऽभिधायिनी श्रुतिरल्पश्रुतिर्दहरः इति तस्मान्न परमात्मेति चेदेवं यदि तन्नेति सूत्रान्तरात्। कुतः?तदुक्तं तत्त्वदीयं चोद्यम उक्तपरिहारं निचाय्यत्वादिना ॥ २१ ॥

पूर्वाधिकरणे 'एतं त्वेव' इत्येतच्छब्दस्य प्रकृतार्थत्वाद्दहरस्य जीवता निरस्ता, तदयुक्तं, तदेतादौ सर्वनाम्नः प्रकृतार्थत्वाऽनियमादित्याक्षिप्य समाधत्ते—

अनुकृतेस्तस्य च ॥ २२ ॥

'तमेव भान्त'मित्युक्तः प्राज्ञ एव । कुतः ? अनुकृतेरनुकरणात् अनुकृतेरनुभातिश्रुतेः । तस्य च 'तस्य भासे'त्यादिवाक्यादपि ॥ २२ ॥

न चाऽप्रसिद्धमिदं रूपमित्याह—

अपि च स्मर्यते ॥ २३ ॥

स्मर्यते गीतासु 'न तद्भासयते' इत्यादिना ॥ २३ ॥

पूर्वाधिकरणेन तत्रेति सति विषये च साधारणी सप्तमी 'न तद्भासयते' इति विषयत्वनिषेधकस्मृत्या विषयत्वं व्यवस्थितं तद्वत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परिमाणमपि जवमैश्वरं वेति संशये 'ऽङ्गुष्ठमात्रं पुरुष'मिति निर्णीतार्थस्मृत्या जैवमेवेति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

शब्दादेव प्रमितः ॥ २४ ॥

अङ्गुष्ठमात्रः परमात्मा प्रमितः कुतः ? शब्दादेव ईशानादिपदघटकत्वादेव ॥ २४ ॥

कथं पुनः सर्वगतस्य परमात्मनः परिमाणोपदेश ? इत्यत्र ब्रूमः—

हृद्यपेक्षया तु मनुष्याऽधिकारत्वात् ॥ २५ ॥

हृदि हृदये ऽवस्थानस्याऽपेक्षया तु एवमतिमात्रस्याप्यङ्गुष्ठमात्रश्रुतिः। हृदयस्याऽङ्गुष्ठमात्रत्वं कुत? इत्यत आह-मनुष्याधिकारत्वात्। शास्त्रस्येति शेषः। मनुष्याणामाधिकारो मनुष्याधिकारस्तस्य भावस्तत्त्वं, तस्मात्। मनुष्याणां च प्रायेण स्वाङ्गुष्ठपरिमितं हृदयं ततस्तदपेक्षया ऽङ्गुष्ठमात्रः परमेश्वर इति ॥ २५ ॥

पूर्वाधिकरणे ऽङ्गुष्ठमात्रश्रुतिर्मनुष्यहृदयाऽपेक्षया मनुष्याधिकारत्वाच्छास्त्रस्येति उक्तं, तर्हि वेदान्ता अपि मनुष्याऽधिकारा एवेति दृष्टान्तेनाक्षिप्य समाधत्ते—

तदुपर्यपि बादरायणः संभवात् ॥ २६ ॥

तेषां मनुष्याणामुपरि ये देवादयस्तेषामपि ब्रह्मविद्यायामधिकारं बादरायण आचार्यो मन्यते। कुतः ? संभवात्। सम्भाव्यते हि तेषामप्यर्थित्वादिकं विग्रहादिमत्त्वादित्यर्थः ॥ २६ ॥

विरोधः कर्मणीति चेन्नाऽनेकरूपप्रतिपत्तेर्दर्शनात् ॥ २७ ॥

यदि विग्रहवती देवता कस्य यजमानस्य यागे देवताया विग्रहादिमत्त्वम्? इति चेदेवं यदि तन्न। कुतः ? अनेकरूपप्रतिपत्तेः। नैकरूपप्रतिपत्तिरनेकरूपप्रतिपत्तिः तस्याः। युगपदेको ऽनेकभोजने शक्तः एको ऽप्यनेकेषां नमस्कारक्रियायां शक्त इति नानाविधाया व्यवस्थायाः संभवात्। कुत एवं ? लोके दर्शनात्। अनेकेषां रूपप्रतिपत्तेर्वा तस्या ऐश्वर्यविशेषाद्देवतानां युगपदनेकशरीरस्वीकारात्। तदेव कथ ? मित्यत आह-दर्शनात्। तथा हि-'कति देवा' ? इत्युपक्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्य 'प्राण' इत्यन्तेन श्रौतेना'ऽऽ'त्मनश्च सहस्राणी' त्यादिना स्मार्तेन च वाक्येन देवादीनामनेकशरीरप्रतिपत्तिर्दृष्टा ॥ २७ ॥

शब्द इति चेन्नाऽतः प्रभवात्प्रत्यक्षाऽनुमानाभ्याम् ॥ २८ ॥

मा भूत् कर्मणि विरोधः विग्रहादिमत्त्वेन देवादीनां शब्दार्थानामनित्यत्वाच्छब्दार्थयोर्नित्यसम्बन्धाऽभावात् शब्दे वेदे ऽर्थवियोगात् प्रमाणं न स्यात् चेदेवं यदि तन्न । कुतः ? अतः प्रभवात् अतो-वैदिकाच्छब्दादेवादिकस्य जगतः प्रभव उत्पत्तिस्तस्मात् । स एव कथ ? मित्यत आह-प्रत्यक्षानुमानाभ्याम् प्रत्यक्षं श्रुतिप्रामाण्यं प्रत्यक्षाऽपेक्षत्वात् अनुमानं, स्मृतिः तद्विपर्यासात् । 'एतइति वै प्रजापति'रित्यादिका श्रुतिः । 'अनादिनिधने'त्यादिका स्मृतिः । अथ न पुनः करोतीत्यस्मदादीनां प्रथमतः शब्दः प्रतीयते पश्चात्क्रियते तदिदं प्रत्यक्षं प्रजापतेरपि पूर्वं देवादिवाचकाः शब्दा मनसि प्रादुर्भूताः पश्चात्तान् ससर्जेत्यनुमीयते इत्यनुमानं प्रत्यक्षं चाऽनुमानं च प्रत्यक्षानुमाने, ताभ्यामेव स विरोधः ॥ २८ ॥

तथा वेदस्य जनिमत्त्वेनाऽनित्यत्वमतः स स्यादित्यत आह—

अत एव च नित्यत्वम् ॥ २९ ॥

अत एव नियताकृतेर्देवादेर्जगतो वेदशब्दप्रभवत्वान्नित्यत्वमपि प्रत्येतव्यम् ॥ २३ ॥

मा भूदेवं शब्दविरोधः, तथापि यदा पुनर्जगत्पूर्वं कृत्स्नं लीनं पुनरन्यज् जायते तदा स्यादेव विरोध इत्यत आह—

समाननामरूपत्वाच्च वृत्तावप्यविरोधो दर्शनात ॥ ३० ॥

अन्यत्वे ऽपि जायमानानां पूर्वेभ्यः पूर्वेषां चाऽऽवृत्तावपि प्रलये ऽप्यविरोधः । कुतः ? समाननामरूपत्वात्पूर्वेषां, नोत्तरेषामिति शेषः । सदृशं गौतमादिनाम, रूपं च सहस्राक्षत्वादि येषां ते समाननामरूपास्तेषां भावस्तत्त्वं तस्मात् । चकारात्कार्यस्य सत्त्वादपि॥३०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समाननामरूपत्वमेव कुत ? इत्यत आह—

दर्शनात्स्मृतेश्च ॥ ३१ ॥

'सूर्याचन्द्रमसा'वित्यादि, स्मृतिरपि 'ऋषीणां नामधेयानी'त्येवमादिका ॥ ३१ ॥

मध्वादिष्वसम्भवादनधिकारं जैमिनिः॥३२॥

'असौ वा आदित्यो देवमधु' आदिशब्देनाऽयमेव गौतमो ऽयं भारद्वाज इत्याद्याः । तासु मध्वादिषु विद्यास्वादित्यादीनामादित्यादिरूपस्य पूर्वमेव सिद्धत्वात् फलाऽभावादसम्भवः । तस्मात्कारणाद् ब्रह्मविद्यायामप्यनधिकारं जैमिनिराचार्यो मन्यते ॥ ३२ ॥

ज्योतिषि भावाच्च ॥ ३३ ॥

न केवलं फलाऽभावादनधिकारः, ज्योतिष्यादित्यमण्डलादौ आदित्यादिशब्दानां भावात्सत्त्वादप्यचेतनत्वादित्यर्थः ॥ ३३ ॥

भावं तु बादरायणोऽस्ति हि ॥ ३४ ॥

तुशब्दो जैमिनिपक्षव्यावृत्त्यर्थः । बादरायण अचार्यो देवतादीनामधिकारसद्भावमाह । हि यस्मादस्ति देवताऽधिकारस्य सूचकं वाक्यजातं तथा विग्रहादिमत्त्वे ऽर्थित्वादौ च ब्रह्मविद्यायाः साकल्येपि 'हन्त तमात्मान'मित्युपक्रम्य 'इन्द्रो ह वै देवताना'मित्यादि । 'तद्यां यां देवता'मित्यादि च ॥ ३४ ॥

पूर्वाधिकरणे त्रैवर्णिकदेवानां 'तद्यो य'इति लिङ्गादधिकार उक्तः, शूद्रशब्दे च परामर्शात् लिङ्गादर्थित्वात् शूद्रस्याऽप्यधिकार इति दृष्टान्तेनाक्षिप्य समाधत्ते—

शुगस्य तदनादरश्रवणात्तदाद्रवणात् सूच्यते हि ॥ ३५ ॥

शुक् शोकः अस्य जानश्रुतेः पौत्रायणस्य तत्तेषां हंसानामात्मन्यनादरो ऽवज्ञानम् । आदरो बहुमानो नाऽऽदरस्तस्य । 'क म्वरमेतत्सन्त'मित्यादिश्रवणात् श्रुतवात् तदा रैक्वप्रत्याद्रवणात् आगम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नात् हि यस्मात् रैक्केण 'हहारे त्वे'ति शूद्रशब्देनात्मनः परोक्षविषय-ज्ञानमस्तीति सूच्यते। अतो न जातिशूद्रो जानश्रुतिः ॥ ३५ ॥

रूढिरेव कुतो न स्वीक्रियते ? इत्यत आह—

क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॥३६॥

क्षत्रियस्यापि गतेरवगतेरुत्तरत्र संवर्गविद्यावाक्यशेषे 'अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिम्' इत्यादिप्रतारिण-श्चैत्ररथस्य श्रवणात्। तेन ॥३६॥

तेन समानायां संवर्गविद्यायामधिकाराऽतिरेकेणाऽशूद्रस्याऽधि-कार इत्यत आह—

संस्कारपरामर्शात्तदभावाऽभिलापाच्च ॥३७॥

संस्कारा उपनयनादयः तेषां संस्काराणामभावस्तेषां 'तं होप-नीये'त्यादिना ब्रह्मविद्याऽधिकारे परामर्शो ऽवगमः, तस्मान्न शूद्रो ऽधिकारी। न च ते ऽपि तस्य सन्त्विति मन्तव्यमित्याह-तदभावा-ऽभिलापाच्च। 'तस्य शूद्रश्चतुर्थो वर्ण एकजाति'रित्यादिस्मरणेनाऽभि-लपनमभिलापः तस्मात्। चकारोऽनधिकारार्थः ॥ ३७ ॥

नन्वसंस्कृतविषयः शूद्रशब्दो न जातिविषय इत्यत आह—

तदभावनिर्धारणे च प्रवृत्तेः ॥३८॥

तस्य जातिशूद्रत्वस्याऽभावस्तदभावस्तस्य निर्धारणं 'नैतदब्राह्म-णो वक्तुमर्हती'त्यनेन निश्चयः सत्यवचनेन तस्मिन् ज्ञाते जाबालिं गौतमसुपनेतुमनुशासितुश्च 'समिधं सौम्ये'त्यादिना प्रवर्त्तनं प्रवृत्तिः, तस्याः। चकारो ऽसंस्कृतानां शूद्रत्वं 'चतुर्थो वर्ण' इत्यादिविरुद्ध-मित्याह ॥ ३८ ॥

ननु गौतमस्याऽव्रतस्य प्रेरणमित्यत आह—

श्रवणाऽध्ययनार्थप्रतिषेधात् स्मृतेश्च ॥३९॥

श्रवणं चाऽध्ययनं चाऽर्थश्च। अर्थशब्देन वेदार्थज्ञानाऽनुष्ठानयोः प्रतिषेधः। श्रवणाऽध्ययनार्थास्तेषां प्रतिषेधः श्रूयते श्रवणप्रतिषेधः 'अथ हाऽस्य भेद'मित्यादिना स्पष्टं स्मृतावुपलभ्यते, अर्थादध्ययनादेः। अतो नाऽव्रतं गौतमस्य किं तु न शूद्रस्याऽधिकारः। चकारादा-चारादपि ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'शब्दादेवे'त्यस्मिन्नधिकरणे ब्रह्मवाक्ये जीवाऽनुवादो ब्रह्मैक्यबोधायेत्युक्तम्, इह तु प्राणस्य स्वरूपेण कल्पितस्य न ब्रह्मैक्यसम्भव इत्यतस्तदनुपपत्तौ प्राणोपासनमेव विधेयमिति प्रत्युदाहरणेन मण्डूकप्लुत्या ऽऽक्षिप्य समाधत्ते—

कम्पनाच्च ॥ ४० ॥

'प्राण एजति' 'महद्भयं वज्रमुद्यत'मिति वज्रशब्दवाच्यं ब्रह्मैव। कुतः ? कम्पनात् चलनात् सर्वस्य जगतः प्राण इति शेषः ॥ ४० ॥

पूर्वाधिकरणे सर्वशब्दस्येवेह न कस्याश्चित् श्रुतेः सङ्कोचः। अथ वा प्रागिवेहापि 'स याव'दित्यादिश्रुत्या सङ्कोचा'त्सयावत्तदाक्षिप्ये'त्यादिना प्रसिद्धाऽऽदित्य एव ज्योतिरिति दृष्टान्तेनाक्षिप्य समाधत्ते—

ज्योतिर्दर्शनात् ॥४१॥

परं ज्योतिः परमेव ब्रह्म। कुतः ? दर्शनात्। 'य आत्मा ऽपहतपाप्मे'त्यादिना अस्मिन् प्रकरणे ऽस्यैव दर्शनात् ॥ ४१ ॥

पूर्वाधिकरणे ब्रह्मप्रकरणादानर्थक्यप्रतिहतज्योतिःश्रुतितो ब्रह्मेत्युक्तम्, इह तु न ब्रह्मप्रकरणं नाप्याकाशश्रुतेरानर्थक्यं, ब्रह्मप्रतिपत्त्यर्थत्वादाकाशस्येति प्रत्युदाहरणेनाऽऽक्षिप्य समाधत्ते—

आकाशो ऽर्थान्तरत्वादिव्यपदेशात् ॥४२॥

'आकाशो वै नामे'त्यत्राऽऽकाशशब्दः परमात्मा, ततः अर्थान्तरमाकाशस्तस्य भावस्तत्त्वम्। आदिशब्देन नामरूपनिर्वहणादिकं, तस्य व्यपदेशा'दाकाशं ब्रह्मे'त्युक्तं, तत्र भेदव्यपदेशो ऽनेकान्तः ॥ ४२ ॥

सुषुप्त्युत्क्रान्त्योर्भेदेन ॥४३॥

असत्यपि भेदे 'प्राज्ञेनात्मना सम्परिष्वक्त' इत्यादिना एतस्माच्छारीरात्पुरुषात्प्राज्ञस्य परमात्मनो भेद उत्क्रमणम् उत्क्रान्तिर्मृतिः 'तस्यामयं शारीर आत्मा प्राज्ञेनात्मना ऽन्वारूढ उत्सृजन् याती'त्यादिना निर्दिष्टाच्छारीरात्प्राज्ञस्य परमात्मनो भेदः। सुषुप्तिश्च उत्क्रान्तिश्च सुषुप्त्युत्क्रान्ती तयोर्भेदस्तेन ॥ ४३ ॥

ननु जीवपरात्मनोः प्रतीतौ कुतो नु जीवो न गृह्यते? इत्यत आह—

१८५०५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्यादिशब्देभ्यः ॥४४॥

पतिः सर्वस्याऽधिपतिः। आदिशब्देन सर्वस्य वशीत्यादि। पत्यादयश्च ते शब्दाश्च पत्यादिशब्दास्तेभ्यः ॥ ४४ ॥

इति ब्रह्मसूत्रदीपिकायां प्रथमाध्यायस्य तृतीयः पादः।

———:0:0:0:———

पूर्वपादत्रये ब्रह्मणि समन्वय इत्युक्तम्। तथा हि केषु चिद्वाक्येषु प्रधानादिवाचकशब्ददर्शनात् प्राधानादावपि कश्चन समन्वयः स्यादित्याक्षिप्य ब्रह्मण्येव समन्वय इति अवधार्यते ऽनेन पादेन।

आनुमानिकमप्येकेषामिति चन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥१॥

अनुमानप्रतिपाद्यमानुमानिकं प्रधानमपि केषांचित्कठानां शाखायां 'महतः परमव्यक्त'मितिशब्दवदिति यदि तन्न। कुतः? शरीररूपकविन्यस्तगृहीतेः। शरीरं ह्यत्र रथरूपकेण विन्यस्तमित्युक्तं तस्य शब्देन गृहीतेः ग्रहणात् दर्शयति च। तथा ह्यनन्तराऽतीतो ग्रन्थ आत्मशरीरादीनां रथिरथादिरूपककल्पतिं दर्शयति। चकारात्प्रकरणादिकं च ॥ १ ॥

स्थूलं शरीरं कथमव्यक्तशब्दार्हमित्यत आह—

सूक्ष्मं तु तदर्हत्वात् ॥२॥

सूक्ष्मं सूक्ष्मशरीरमव्याकृताख्यम्। तुशब्द एवकारार्थः। कुतः? तदर्हत्वात्। तस्याऽव्यक्तशब्दाऽभिधानस्याऽर्हे योग्यं तस्य भावस्तत्त्वं तस्मात् ॥ २ ॥

एवं चेत्स एव प्रधानवादः शब्दान्तरेणाऽऽपतित इत्यत आह—

तदधीनत्वादर्थवत् ॥ ३ ॥

तस्य परमेश्वरस्याऽधीनमायत्तं तस्य भावस्तत्त्वं तस्मात् सूक्ष्ममीश्वराधीनं नैव प्रधानमित्यर्थः। ईश्वर एव कारणमस्तु, एवं

४०५८०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूक्ष्मशब्दाऽर्हस्याऽव्याकृतस्य व्यर्थं कल्पनं स्यादित्यत आह-अर्थवत्। अर्थः प्रयोजनं सो ऽस्यास्तीत्यर्थवत्। नेश्वरस्यापि तद्विना कारणत्वमस्तीत्यर्थः ॥ ३ ॥

तेन भोग्यत्वादस्तु तदधीनत्वं तस्यापीत्यत आह—

ज्ञेयत्वाऽवचनाच्च ॥४॥

ज्ञेयस्य भावो ज्ञेयत्वं, यथा सांख्यैरिष्टं प्रधानं नैवमस्य वचनं ज्ञेयत्वस्याऽवचनं ज्ञेयत्वावचनं तदधीनोपचारो ऽपि, अप्रत्यभिज्ञायमानत्वादित्यर्थः। चकारो ऽसत्त्वं स्वरूपस्याह ॥ ४ ॥

वदतीति चेन्न प्राज्ञो हि प्रकरणात् ५॥

ज्ञेयत्वाऽवचनमप्रसिद्धं, कुतः ? निचाय्यमित्यनेन ज्ञेयत्वं वदति ब्रूते इति चेदेवं यदि तन्न । हि यस्मात् प्राज्ञः प्रकरणात्। तस्येति शेषः। प्रकरणं महावाक्यं 'पुरुषान्न परं किञ्चि'दित्यादिकम् ॥ ५ ॥

यथा ऽग्निजीवौ प्राज्ञस्यापि प्रकरणे तद्वत् प्रधानमपि स्यादित्यत आह—

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥६॥

त्रयाणामग्निजीवपरमात्मनामेव च प्रधानस्य च एवमुपन्यासः। उत्तरम्। 'अग्नेर्लोकादि'मित्यादि जीवस्य 'तत' इत्यादिपरमात्मनो 'न जायते' इत्यादिप्रश्नोपि अग्नेः सत्त्वमग्निमित्यादिजीवस्य 'येयं प्रेते' इत्यादिपरमात्मनो 'ऽन्यत्र धर्मा'दित्यादिः। एवमनेन क्रमेण त्रयाणामेव न प्रधानस्य । आद्यश्चकारः प्रधानस्य स्वरूपाऽसत्त्वं समुच्चिनोति ॥ ६ ॥

ननु प्रधानं किञ्चदशाब्दमित्यत आह—

महद्वच ॥७॥

'महान्त'मित्याद्यैर्यथा सांख्याभिमतं महत्तत्वं न शब्दात्तेन महच्छब्देन तद्वत्प्रधानमपि नाऽव्यक्तशब्देन शब्द्यते। चकारस्त्वस्याप्यसत्त्वसूचनार्थः ॥ ७ ॥

पूर्वाधिकरणे ऽर्थतो ऽप्रत्यभिज्ञानात् नाऽव्यक्तशब्दवाच्यतेत्यु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क,मिह तु त्रिगुणत्वादिना प्रधानस्य प्रत्यभिज्ञाततत्वपरो मन्त्र इति प्रत्युदाहरणेनाऽऽक्षिप्य समाधत्ते—

चमसवदविशेषात् ॥ ८ ॥

'अजा'मित्यादिमन्त्रो न स्वातन्त्र्येण कस्य चिदर्थस्य प्रतिपादकः। अविशेषात्। अजादिशब्दानां न क चिदर्थविशेषो निरूपयितुं शक्यो विना प्रकरणादिकं, सो ऽयमविशेषस्तस्मात्। किंवदित्यत आह—चमसवत्। यथा 'ऽर्वाग्बिलश्चमस' इत्यस्मिन् मन्त्रे स्वातन्त्र्येण चमसपदं न कस्याप्यर्थस्य वाचकं तद्वदजादिपदानि ॥ ८ ॥

तर्हि केयमजादिः प्रतिपत्तव्ये? त्यत आह—

ज्योतिरुपक्रमात्तु तथा ह्यधीयतएके ॥ ९ ॥

ज्योतिरुपक्रमे चक्षुर्ग्राह्यकार्ये प्रथमे यस्याः सा तेजोऽबन्नात्मिका प्रकृतिः। तुशब्दो ऽवधारणे। सैवाऽजा न पुनरन्या का चन। कुतः? हि यस्मात् यथा ऽजामन्त्रे लोहितशुक्लकृष्णरूपा तथा तेजोऽबन्नात्मिकां प्रकृत्य 'यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्ये'त्यधीयते पठन्ति एके छन्दोगाः ॥ ६ ॥

रूढियोगयोरभावे ऽजाशब्दः कथं तेजोऽबन्नेषु प्रतिपत्तव्य? इत्यत आह—

कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥ १० ॥

तेजोऽबन्नात्मिका लोहितशुक्लकृष्णात्मिका प्रकृतिर्या छागेव बहुबर्करीबर्करेण सेव्यमाना अपरेण त्यज्यमाना कल्प्यतइति कल्पना तस्या उपदेशः कल्पनोपदेशः, तस्मात्। नाप्यत्र विरोधः। न विरोधः अविरोधः कल्पनायाम्। दृष्टान्तः—मध्वादिवत्। यथा ऽऽदित्यस्य मधुत्वम्। आदिशब्दाद्वागादेरधेन्वादेर्धेन्वादिमत्त्वं तद्वदनजायाः प्रकृतेरजात्वम् ॥ १० ॥

पूर्वाधिकरणे ऽजाशब्दो रूढियोगाऽभावात्कल्पनया तेजोऽबन्नादिपर इत्युक्तमिहापि पञ्चजनशब्दो रूढो मनुष्येषु यतो लक्षणया प्राणादिवाक्येनाऽन्वितः अतो ऽवयववृत्त्या प्रधानादिषु स्यादिति दृष्टान्तेनाऽऽक्षिप्य समाधत्ते—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥ ११ ॥

संख्यायाः यस्मिन् 'पञ्चपञ्चजना' इति पञ्चविंशतेरुपसंग्रहादपि स्वीकारादपि न प्रधानादीनां श्रौतत्वम् । कुतः ? नानाभावात्तेषां पञ्चपञ्चत्वे नियामकाऽभावान्नानात्वादेतेषामित्यर्थः । न केवलं नानात्वादतिरेकाच्च । अतिरेकः पञ्चविंशतिसंख्यायाः । आत्माऽऽकाशयोस्ततः पृथक् श्रवणात् । तस्मादपि ॥ ११ ॥

के पुनस्ते पञ्चपञ्चजना ? इत्यत आह—

प्राणादयो वाक्यशेषात् ॥ १२ ॥

प्राण आदिर्येषां ते प्राणादयः प्राणचक्षुःश्रोत्रमनांसि । कुतः ? वाक्यशेषात् । यस्मिन् पञ्चपञ्चजना इति वाक्यस्य शेषः 'प्राणस्य प्राण'मित्यादि तस्मात् ॥ १२ ॥

कथं प्राणादयः पञ्चपञ्चजना भवेयुः ? ये ऽन्नं प्राणादिषु नाऽऽमनन्तीत्यत आह—

ज्योतिषैकेषामसत्यन्ने ॥ १३ ॥

असत्यपि काण्वानामन्ने 'तद्देवा ज्योतिषां ज्योति'रित्यनेन ज्योतिषां तेषां पञ्चसंख्या पूर्यते ॥ १५ ॥

पूर्वाधिकरणे ऽन्नज्योतिषोर्विकल्पेनोपासानायां निर्विशेषादविरोध उक्तः, इह तु सिद्धे कारणे विकल्पाऽयोगात् विरोधे सत्यप्रमाणमिति प्रत्युदाहरणेनाऽऽक्षिप्य समाधत्ते—

कारणत्वेन चाऽऽकाशादिषु यथाव्यपदिष्टोक्तेः ॥ १४ ॥

कारणस्य भावः कारणत्वं, तेनाकऽऽशादिषु विषयेषु यथैकस्यां शाखायां व्यपदिष्टः 'सदेवे'त्यादिना तथा ऽन्यस्यामपि 'सत्यं ज्ञानमनन्त'मित्यादिनोक्तेरभिधानात् । चकारः कार्यस्यापि तथोक्तिसमुच्चयार्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'असद्वा इद'मित्यादिना ऽस्ति विगानमित्यत आह—

समाकर्षात् ॥ १५ ॥

प्रकृतस्यैव सत्यज्ञानादिलक्षणस्याऽऽकर्षणं प्रतिपादनमाकर्षः । सम्यङ्नामरूपादिराहित्येनाऽऽकर्षस्तस्मात् ॥ १५ ॥

पूर्वाधिकरणे 'सदेवे'त्यादिना एकवाक्येन सच्छब्दाऽनुसारेण सच्छब्दो नीतः, नैवमत्र किञ्चिन्नियामकं, जगद्वाचित्वेन कर्मशब्दस्येति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

जगद्वाचित्वात् ॥ १६ ॥

पुरुषाणां कर्ता परमेश्वरः । तस्य चैतत्कर्म । कर्मशब्दस्य जगद्वाचित्वात् । जगद्वक्तीति जगद्वाचि तस्य भावस्तस्मात् ॥ १६ ॥

जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम् ॥ १७ ॥

जीवस्य तद्यथा श्रैष्ठ्यादिप्राणस्य चा'ऽथास्मिन् प्राण एकधा भवति, इत्यादि लिङ्गं, तस्मात्परमात्मैवेति चैदेवं यदि तच्चोक्तं न, उपासात्रैविध्यादिति सूत्राऽवयवेन वाक्यभेदेन दोषेण व्याख्यातं निराकृतम् ॥ १७ ॥

ननु प्राणलिङ्गानां तदन्यभोक्तृत्वप्रतिपादनेनापि कथं चिदुपयोगः स्यान्न जीवपरामर्शस्य विना तज्ज्ञानमित्यत आह—

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥ १८ ॥

अन्यो ऽर्थः प्रयोजनं ब्रह्मनिर्धारणं यस्य परामर्शस्य सो ऽयमन्यार्थः । तमन्यार्थम् । तुशब्द एवकारार्थः । ब्रह्मनिर्धारणार्थमेव जीवपरामर्शः । तद्यथा 'श्रेष्ठ'इत्यादिर्न जीवस्य लिङ्गमिति जैमिनिराचार्यो मन्यते । कुतः ? प्रश्नव्याख्यानाभ्याम् । 'क्वैष एतद्वा-लोक'-इत्यादिप्रश्नः । व्याख्यानं प्रतिवचनं 'अथास्मिन् प्राण एकधा भवती' त्यादि । प्रश्नश्च व्याख्यानं च प्रश्नव्याख्याने ताभ्यामपि चैवमेके वाजसनेयिनः । एवमनेन प्रकारेण प्रश्नो 'य एष विज्ञानमयः पुरुषः क्वैष तदा ऽभूत्' इति प्रतिवचने ऽपि 'य एषो ऽन्तर्हृदये आकाश' इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परमात्मविज्ञानार्थं जीवं परामृशति ॥ १८ ॥

पूर्वाधिकरणे ब्रह्मोपक्रमात् ब्रह्मपरत्वं यथा तद्वदिहापि जीवोपक्रमात् जीवपरत्वमिति दृष्टान्तेनाऽऽक्षिप्य समाधत्ते—

वाक्याऽन्वयात् ॥ १९ ॥

'आत्मा वारे द्रष्टव्य'इत्यादिनोक्तः परमात्मैव । कुतः ? वाक्यस्या'ऽमृतस्य तु नाशास्ति वित्तेने'त्यादेः अस्मिन्नेव परमात्मनि अन्वयः पर्यवसानं तात्पर्येण । तस्मात् ॥ १९ ॥

'आत्मनस्तु कामाय सर्वं प्रियं भवती'ति प्रियसमुच्चितस्य विज्ञानात्मनः प्रतीतेः का गति ? रित्यत आह—

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ २० ॥

'आत्मनो वारे दर्शनेने'त्यादिप्रतिज्ञा तस्याः सिद्धिः तस्या लिङ्गं विज्ञानात्मनो द्रष्टव्यत्वादिसंकीर्तनं न तु वस्त्वभेदाऽभिप्रायमित्याश्मरथ्य आचार्यो मन्यते । कार्यकारणभावेनापि जीवपरमात्मनोरीषद्भेदस्य विद्यमानत्वात् ॥ २० ॥

उत्क्रमिष्यत एवंभावादित्यौडुलोमिः ॥२१॥

भेदेनाऽवस्थितस्य नामरूपाभ्यां 'तथा विद्वा'नित्यादिश्रुत्योत्क्रमिष्यतः तस्य नामरूपादिमुक्तस्यैव भेदस्याऽभावाद्विज्ञानात्मनो द्रष्टव्यत्वाऽभिधानमित्यौडुलोमिराचार्यो मन्यते । जीवब्रह्मणोर्भेदाऽभेदस्य विद्यमानत्वात् ॥ २१ ॥

अवस्थितेरिति काशकृत्स्नः ॥ २२ ॥

'अनेन जीवेने'ति श्रुत्या परमात्मन एव जीवरूपेणाऽवस्थानमवस्थितिः तस्या विज्ञानात्मनो द्रष्टव्यत्वाऽभिधानमिति काशकृत्स्न आचार्यो मन्यते ॥ २२ ॥

जीवब्रह्मणोर्वस्तुतो भेदाऽभावात् 'एतेभ्यो भूतेभ्यः समुत्थाये'त्यादिना कुतो जीवस्याऽभिधान ? मित्यत आह-प्रतिज्ञादिसूत्रम् । पूर्वाधिकरणे प्रत्यभिज्ञां मुख्याम् आश्रित्य जीवपरत्वं वाक्यस्य निरस्तमिह निमित्तोपादानभेदात्सा गौणीत्याशङ्क्य समाधत्ते—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकृतिश्च प्रतिज्ञादृष्टान्ताऽनुपरोधात् ॥२३॥

प्रकृतिरुपादानं ब्रह्म । चकारेण निमित्तकारणमपि । कुतः ? 'येनाऽश्रुतं श्रुतं भवती'त्यादिप्रतिज्ञा 'यथा सौम्ये'त्यादिर्दृष्टान्तः । प्रतिज्ञा च दृष्टान्तश्च प्रतिज्ञादृष्टान्तौ तयोरुपरोधः पीड़नं सङ्कोचस्तद्विपरीतो ऽनुपरोधः तस्मात् ॥ २२ ॥

प्रकृतिनिमित्तं चेदेकं चेतनं प्रधानमेव कुतो न स्या?दित्यत आह—

अभिध्योपदेशाच्च ॥ २४ ॥

'सो ऽकामयते' त्यादिना कारणस्य चैतन्यमभिध्या तस्या उपदेशस्तस्मात् । पुरुषाणां प्रधानाद्भिन्नत्वात्प्रतिज्ञाद्युपरोधोपि चकारेण समुच्चीयते ॥ २४ ॥

ननु श्रौताऽऽर्थापत्तिलभ्योभयकारणत्वस्य ब्रह्मणि प्रलयाश्रवणार्थापत्त्या प्रतिबाध इत्यत आह—

साक्षाच्चोभयाऽऽम्नानात् ॥ २५ ॥

न प्रलयश्रवणलिङ्गमस्ति। कस्मात्? 'सर्वाणि ह वा इमानि भूतानी'त्यादौ साक्षादुभयस्योत्पत्तिप्रलयस्याऽऽम्नानाद्भेदेन ॥ २५ ॥

उभयकारणत्वे कर्मणोरैक्यं, कुत्र तदुपलब्ध?मित्यत आह—

आत्मकृतेः परिणामात् ॥ २६ ॥

आत्मनः कर्मत्वेन कर्तृत्वेन च करणं कृतिः 'तदात्मान'मिति श्रौतकर्मत्वं 'स्वयमकुरुते'ति श्रौतकर्तृत्वं तस्याः सिद्धस्य कथं कार्यत्व?मित्यत आह–परिणामात् । क्षीरस्येव दधिरूपेण ॥

अथ वा परिणामादिति सूत्रान्तरम् । आत्मन इति श्रुत्या निमित्तत्वमेव कुत उपादानत्वमपी?त्यतआह–परिणामात् । 'सच्चाऽसच्चे?ति श्रुत्या अन्यस्याऽन्याकारप्रतीतिः रज्ज्वा इव सर्पाकारस्तस्मात् ॥२७॥

नन्वस्त्वन्यरूपभवनं, न चोपादानत्व?मित्यत आह—

योनिश्च हि गीयते ॥ २७ ॥

५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हि यस्माद्योनिश्चोपादानमपि 'यद्भूतयोनि'मित्यादिना गीयते पठ्यते ॥ २७ ॥

पूर्वाधिकरणे मृत्तिकादिदृष्टान्तात्प्रकृतिर्ब्रह्मेत्युक्तम्, इहापि प्रधानादिभेदादिनिदर्शनान्नानाविवादा इत्याक्षिप्याऽतिदेशेन समाधत्ते-

एतेन सर्वे व्याख्याता व्याख्याताः ॥२८॥

एतेन प्रधाननिराकरणेन सर्वे अपि वादा व्याख्याता निराकृताः। व्याख्यातपदाऽऽभ्यासो ऽध्यायपरिसमाप्तिं द्योतयति ॥ २८ ॥

इति श्रीमत्परहंसपारव्राजकाचार्याऽऽनन्दात्मकपूज्यपाद-शिष्यशङ्करानन्दभगवतः कृतौ ब्रह्मसूत्रदीपिकायां प्रथमाऽध्यायस्य चतुर्थः पादः । संपूर्णश्च प्रथमो ऽध्यायः ॥ १ ॥

पूर्वाध्याये सर्वोपनिषदां जगत्कारणे ब्रह्मणि समन्वय उक्त,स्तस्मिन् विरोधाऽऽशङ्कायामयमध्यायः। तत्रापि श्रुतिवत् स्मृतेराप्तोक्तत्वाच्च तद्विरोधाशङ्कां स्मृतिकाराणामपि कपिलस्य प्राधान्यात् प्रथमं तत्स्मृत्या विरोधमाशङ्क्य परिहरति—

स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नाऽन्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥ १ ॥

स्मृते'र्मूलप्रकृति'रित्यादेर्यो नाऽवकाशो ऽनवकाशः कर्मश्रुत्याद्यभावे प्रधानप्रतिपादकत्वमपि चेन्न स्यात्तदा ऽर्थाभावः स चाऽसौ दोषश्च स्मृत्यनवकाशदोषस्तस्य प्रसङ्गः प्राप्तिस्तस्मादिति चेदेवं यदि तन्न। कुतः? अन्यासां 'तस्माद्व्यक्तमुत्पन्न'मित्यादीनां स्मृतीनामनवकाशो ऽर्थाऽभावः स चाऽसौ दोषश्चाऽन्यस्मृत्यनवकाशदोषस्तस्य प्रसङ्गस्तस्मात् ॥ १ ॥

इन्द्रियाणां सर्वप्रसिद्धत्वात्सहपठितानामव्यक्तादीनां मन्वादिस्मृतिविरोधेपि ग्रहणमित्यत आह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इतरेषां चाऽनुपलब्धेः ॥ २ ॥

प्रधानादितराणि महदादीनि तेषामनुपलम्भनमनुपलब्धिस्तस्याः । लोकादेवेति शेषः । चकारो व्याप्यस्योपलब्धावव्यापकस्योपलब्ध्यभावसमुच्चयार्थः ॥ २ ॥

पूर्वाधिकरणे ऽपौरुषेयवेदतदनुसारिस्मृतिविरोधात्कपिलस्मृतेरप्रामाण्यादविरोधः समन्वयस्येत्युक्तम् । नन्वेवं योगस्मृतिर्विरोधिनी, सा च प्रधानादीन् प्रतिपादयति तया समन्वयस्य विरोध इति प्रत्युदाहरणेनाऽऽशङ्क्याऽतिदेशेन समाधत्ते—

एतेन योगः प्रत्युक्तः ॥ ३ ॥

एतेन स्मृत्यनवकाशदोषप्रसङ्गेन योगो योगशास्त्रं प्रत्युक्तः निराकृतः ॥ ३ ॥

पूर्वाधिकरणे वेदविरुद्धाऽर्थस्मृतेर्वेदवैलक्षण्यादतन्मूलत्ववत् ब्रह्मवैलक्षण्याज्जगदप्यतन्मूलमिति दृष्टान्तेनाक्षिपति—

न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥ ४ ॥

न ब्रह्म चेतनं जगतः कारणं, कुतो ? जगतो विलक्षणत्वात् । तथात्वञ्च जड़त्वमप्यस्य जगतः 'अविज्ञानं चे'त्यस्माच्छब्दाद्वाक्यात्सिद्धमित्यतो न जगतश्चैतन्यं कल्प्यमित्यर्थः ॥ ४ ॥

न कल्पयामि चैतन्यं, किं तु 'ता आपो ऽब्रुव'न्नित्यादिनोपलभ्यत इत्यत आह—

अभिमानिव्यपदेशस्तु विशेषाऽनुगतिभ्याम् ॥ ५ ॥

तुशब्दः शङ्कानिवृत्त्यर्थः । अभिमानिनीनां देवतानां व्यपदेशो ऽभिमानिव्यपदेशः । नाऽबादीनाम् । कुतो ? भोक्तृभोग्यरूपो विशेषः । अथ वा 'एता ह वै, इति देवताशब्दो विशेषः । 'अग्निर्वाग्भूत्वे'त्यादिना ऽनुगमनमनुगतिः । विशेषश्चाऽनुगतिश्च विशेषाऽनुगती ताभ्याम् ॥ ५ ॥

दृष्टान्तमाह—

दृश्यते तु ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः। दृश्यते लोके चेतनात् केशादि, अचेतनाद् गोमयादेर्वृश्चिकादि, वेदे ऽपि 'यथा सत' इत्यादिदृष्टान्ताचेतनस्याऽचेतनकारणत्वम्. ॥ ६ ॥

असदिति चेन्न प्रतिषेधमात्रत्वात् ॥ ७ ॥

निर्गुणे ब्रह्मणि प्रागुत्पत्तेर्जगतो ऽभावादसत्कार्यमिति चेदेवं यदि तन्न। कुतः? प्रतिषेधमात्रत्वात् कारणात्मना कार्यस्य विद्यमानत्वात् प्रतिषेध्याऽभावेन प्रतिषेधमात्रत्वादसत् कार्यमिति शब्दस्य ॥ ७ ॥

अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॥ ८ ॥

स्थूलादिगुणकस्य कार्यस्य ब्रह्मणो ऽभेदे ऽपीतौ प्रलये ब्रह्मणो ऽपि तद्वत्त्वप्रसङ्गः। स्थूलादिमत्त्वप्रसङ्गः। तस्मात्। अथ वा तत्प्रसङ्गादभेदप्रसङ्गात्। भोक्तृभोग्यौद्यभावप्रसङ्गेन। अथ वा तदभिन्नानां मुक्तानामपि तद्वत्प्रसङ्गात् पुनरुत्पत्त्यादिप्रसङ्गात्। अथ वा भेदसद्भावे तद्वत्प्रसङ्गात्कारणवत् प्रलयाऽभावप्रसङ्गादसमञ्जसमसमीचीनमौपनिषदं दर्शनम् ॥ ८ ॥

न तु दृष्टान्तभावात् ॥ ९ ॥

तुशब्द एवकारार्थः। त्वदुक्तं नैव। कुतः? दृष्टान्तस्य आद्ये स्थूलस्य घटादेः पृथिव्यादिकं प्रविशतः, द्वितीये विभागस्य तेन सुषुप्तावुत्थितस्य, तृतीये तद्देहादेस्तदनुत्पादेन च सांख्यादे, श्चतुर्थे घटाऽध्यवस्थानस्याऽभावेन भावात्मकत्वात्। अथ वा त्वत्पक्षे दृष्टान्तस्याऽभावादेव ॥ ९ ॥

स्वपक्षदोषाच्च ॥ १० ॥

स्वस्य प्रतिवादिनः पक्षः तस्मिन्विलक्षणत्वादेर्दोषात। चकारो ऽन्यत्र दोषाऽभावसमुच्चयार्थः ॥ १० ॥

तर्कतस्तावत् स्वपक्षे परिहरिष्याम इत्यत आह—

तर्काऽप्रतिष्ठानादन्यथाऽनुमेयामिति चेदेवमप्यविमोक्षप्रसङ्गः ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तर्कस्य युक्तेरेकेनोक्तायाः परेण दूषणादप्रतिष्ठानमनवस्थितिस्तस्मात् । अन्यथा प्रतिष्ठितत्वे कस्य चित्तर्कस्य स्वरूपमनुमानादवगन्तव्यमितिं चेद्यदि प्रतिष्ठितत्वे ऽप्यवैदिकप्रधानप्रतिपादकतर्कस्याऽप्रतिष्ठितत्वादविमोक्षप्रसङ्गः । प्रतिष्ठितत्वस्याऽपरित्यागप्राप्तेः । अथ वा कपिलस्य सर्वज्ञत्वात्तदीयतर्कस्याऽन्यथाप्रतिष्ठितत्वमपि चेदेवमपि सर्वज्ञानां बहुत्वात् सर्वज्ञभावितत्वे ऽप्यप्रतिष्ठितत्वमेवाऽतो विना वेदं तर्कतस्तत्त्वज्ञानाऽभावात्संसारादविमोक्षो मुक्त्यभावस्तस्य प्रसङ्गः ॥ ११ ॥

पूर्वाधिकरणे ऽत्यन्तवैलक्षण्ये कार्यकारणभावाऽनुपपत्तिवत् समाऽधिकपरिमाणत्वे कारणस्य तदनुपपत्तिरिति दृष्टान्तेनाऽऽक्षिप्य समाधत्ते—

एतेन शिष्टाऽपरिग्रहा अपि व्याख्याताः ॥१२॥

एतेन प्रधाननिराकरणेन शिष्टैर्न परिगृह्यन्तइति शिष्टाऽपरिग्रहा अण्वादिकारणवादा अपि व्याख्याताः निराकृताः ॥ १२ ॥

पूर्वाधिकरणे जगत्कारणे तर्को ऽप्रतिष्ठित इत्युक्तं, तर्हि जगद्भेदेन तर्कः प्रतिष्ठित इति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत् ॥१३॥

चेत् यदि ब्रह्म सर्वेणाऽभिन्नं भोग्यस्य भोक्तृत्वस्वरूपापत्तिः जीवाऽभिन्नेन ब्रह्मणा भोग्यस्याऽभेदात् भोक्त्रापत्तिस्तस्याः शङ्काया नासौ दोषः स्यात् । अभेदेपि ब्रह्मणो भोक्तृभोग्ययोर्भेदः । लोकवत् । समुद्रादभिन्नतरङ्गबुद्बुदयोरिव ॥ १३ ॥

पूर्वाधिकरणे भेदाऽभेदसमाश्रयणेन विरोधसमाधानं कृतमेकदेशिना, तेनैव विरोधमात्रमाशङ्क्य परिहरति—

तदनन्यत्वमारम्भणशब्दादिभ्यः ॥१४॥

तस्मात्कारणादनन्यत्वमभिन्नत्वं कार्यस्य । कुतः ? आरम्भणशब्दादिभ्यः । आरम्भणशब्दो 'वाचारम्भण'मिति । आदिशब्दे 'नैतदात्म्य'मित्यादयः । सच तदादयश्च तेभ्यः ॥ १४ ॥

तयोरविनाभावान्न भेद इत्यत आह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भावे चोपलब्धेः ॥ १५ ॥

कारणस्य भावे च सत्त्वे एवं नाऽसत्त्वे कार्यस्योपलम्भनमुपलब्धिस्तस्याः। अतो ऽविनाभावादनन्यत्वमित्यर्थः ॥ १५ ॥

उत्पत्तेः प्रागूर्ध्वं च कार्यस्याऽसत्त्वात् न कारणाऽनन्यत्वमित्यत आह—

सत्त्वाच्चाऽवरस्य ॥ १६ ॥

अवरस्य कार्यस्य सत्त्वाच्च विद्यमानत्वादेव प्रागूर्ध्वं च वर्तमानत्वात्। अतो न त्वदुक्तम् ॥ १६ ॥

असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् ॥ १७ ॥

असत्त्वस्य व्यपदेशो ऽसद्व्यपदेशः 'असदेवे'त्यादिस्तस्मात्। असत्कार्यमिति चेदेवं यदि तन्न। कुतः ? धर्मान्तरेणाऽव्यक्तरूपेणाऽस्तित्वं व्यपदिश्यते। कुतः ? वाक्यशेषात्। वाक्यस्य शेषो वाक्यशेषः 'तत्सदासी'दित्यादिस्तस्मात् ॥ १७ ॥

उपक्रमाऽनुसारी वाक्यशेषः स्यादित्यत आह—

युक्तेः शब्दान्तराच्च ॥ १८ ॥

दधिघटरुचकाद्यर्थिनां प्रतिनियतक्षीरमृत्तिकासुवर्णादिष्वेव प्रवृत्तिदर्शनादिरूपभाष्योक्तयुक्तेः 'सदेव सौम्येद'मित्यादिशब्दान्तराच्चोत्पत्तेः प्राक् कार्यस्य सत्त्वं कारणाऽनन्यत्वञ्च गम्यते ॥ १८ ॥

पटवच्च ॥ १९ ॥

यथैकस्य पटस्य सङ्कोचप्रसारणाद्यवस्थास्वभेद एवमत्रापि कार्यकारणभावः। चकारो गोमहिषयोरिव भेदे कार्यकारणत्वाऽभावसमुच्चयार्थः ॥ १९ ॥

पूर्वाधिकरणे कार्यकारणयोरनन्यत्ववत् जीवपरयोरपि तत्। अस्त्वेकस्य कार्यकारणत्वं तथापि कारणाऽवस्थायां कार्यकृता ऽर्थक्रिया किमिति न स्या?दित्यत आह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा च प्राणादि ॥ २० ॥

प्राणोऽपान इत्यादि स यथा एक एव तत्तत्प्राप्य तत्तत् प्राणनाद्यर्थक्रियाकारित्वं समुच्चिनोति ॥ २० ॥

पूर्वाधिकरणे कार्यकारणयोरनन्यत्ववत् जीवपरयोरपि तत्सिद्धम्, इदानीं तेनैव विरोधमाह—

इतरव्यपदेशाद्धिताऽकरणादिदोषप्रसक्तिः ॥ २१ ॥

इतरस्य शारीरस्य ब्रह्मणो ऽनन्यत्वं 'तत्सृष्ट्वा तदेवाऽनुप्राविशत्' इत्याभ्यां ब्रह्मशारीराभ्यां व्यपदेशस्तस्मात्। हितस्याऽकरणं हिताकरम् । आदिशब्देन विपरीतकरणादिः । हिताऽकरणादेर्दोषस्य प्रसक्तिः प्रसङ्गः । ब्रह्मणः कारणत्वे तत्र सूत्रस्य पूर्वाऽन्वयवो हेतुः॥२२॥

अधिकं तु भेदनिर्देशात् ॥ २२ ॥

'आत्मा वारे द्रष्टव्य' इत्यादिना कर्मकर्तृत्वादेर्भेदस्य निर्देशस्तस्मात् ॥ २२ ॥

एकस्मिन्नपि भेदो ऽनुपपन्न इत्यत आह—

अश्मादिवच्च तदनुपपत्तिः ॥ २३ ॥

यथैकस्य भूमेर्निरर्थका अश्मानो महार्हा मणयश्च आदिशब्देन व्रीह्यादयश्च परस्परं भिद्यमाना न तस्या भिद्यन्ते 'तद्वज्जीवा भिन्नाश्चापि न ब्रह्मणो भिद्यन्ते अतस्तस्य हिताऽकरणादेर्दोषस्याऽनुपपत्तिरप्रसङ्गः । चकारो भेदाऽभेदभावे कार्यसत्त्वउक्तश्रुत्यादिसद्भावसूचनार्थः ॥ २३ ॥

पूर्वाधिकरणे औपाधिकनानात्वेन समाधानं कृतम्, ईश्वरे तु तदपि नास्तीति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ॥२४॥

उपादानकारणस्य मृदादेरन्यस्य निमित्तस्य दण्डादेरसमवायिनश्च संयोगादेरुपसंहरणमुपसंहारः सन्निपातः तस्य दर्शनात् ब्रह्मणि त्वस्याऽविद्यमानत्वान्नोपादानं ब्रह्मेति चेत् एवं यदि तन्न । हि यस्मात् क्षीरवत् यथा क्षीरं बाह्यसाधनाद्यनपेक्ष्य परिणमते तद्वत् ब्रह्मापि॥२५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्त्वचेतनस्यैवं, न तु चेतनस्येत्यत आह—

देवादिवदपि लोके ॥ २५ ॥

आदिशब्देन रूपादयः। यथा चेतना अपि देवादयो लोके बाह्यसाधनाऽनपेक्षास्तद्वद् ब्रह्मापि ॥ २५ ॥

पूर्वाधिकरणोक्तं परिणामित्वमाक्षिपति—

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥ २६ ॥

ब्रह्म चेतनं चेत्परिणमते सर्वात्मना एकदेशेन वा? आद्ये कृत्स्नस्य ब्रह्मणः परिणामप्रसङ्गः, ततो ऽनित्यत्वम् । द्वितीये निरवयवत्वस्याऽभिधायकः शब्दो निरवयवत्वशब्दस्तस्य कोपो विरोधः । निरवयवत्वं न स्यादित्यर्थः ॥ २६ ॥

श्रुतेस्तु शब्दमूलत्वात् ॥ २७ ।

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । न कृत्स्नप्रसक्तिर्दोषः । कुतः ? 'हन्ताऽहमिमा' इत्यादिना कार्याद् ब्रह्मणो व्यतिरेकश्रुतेः । न निरवयवत्वशब्दकोपः । 'यतो वा इमानि' 'निष्क्रिय'मित्यादिना कारणत्वस्य निरवयत्वस्य शब्दितत्वात् शब्दमूलत्वाच्च ब्रह्मवादस्य । शब्दो मूलं प्रमाणं यस्य सो ऽयं शब्दमूलः तस्य भावस्तत्त्वं तस्मात् ॥ २७ ॥

ननु शब्दोपि कथं विरुद्धं ब्रूते ? इत्यत आह—

आत्मनि चैवं विचित्राश्च हि ॥ २८ ॥

आत्मनि स्वप्नदृशि एवं स्वरूपाऽनुपमर्देन हि यस्मात् विचित्राः सृष्टयो 'न तत्र रथा' इत्यादिश्रुत्या स्वाऽनुभवेन च दृष्टाः । आद्यश्चकारो मायावादनिदर्शनसमुच्चयार्थः । द्वितीयो ऽनुपपत्तेरलङ्कारार्थः ॥ २८ ॥

स्वपक्षदोषाच्च ॥ २९ ॥

स्वस्य प्रतिवादिनः पक्षः स्वपक्षः तस्य दोषः कृत्स्नप्रसक्तिस्तस्मात् । चकारो ब्रह्मवादिनस्तदभावसमुच्चयार्थः ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वाधिकरणे स्वप्नदृष्टान्तेन मायोवित्वादीश्वरस्य कारणत्वमुक्तम्, इदानीं त्वशरीरस्य न मायेत्याक्षिप्य समाधत्ते—

सर्वोपेता च तद्दर्शनात् ॥ ३० ॥

अशरीरापि देवता सा मायाया आश्रयः । कुतः ? सर्वोपेता च सा यतः सर्वाभिः शक्तिभिरुपेता सर्वोपेतापि अशरीरैव । तदपि कुत ? इत्यत आह—तद्दर्शनात् । तस्य सर्वोपेतत्वस्य 'सर्वकर्मे'-त्यादिना दर्शनात् ॥ ३० ॥

विकरणत्वान्नेति चेत्तदुक्तम् ॥ ३१ ॥

करणरहितत्वं विकरणत्वं तस्मात् । परस्या देवताया हस्तपादादिशून्यत्वेन न सर्वकर्मत्वादिकमिति चेदेवं यदि चोदयसि तच्चोद्यं शब्दमूलत्वादित्युक्तं निराकृतम् ॥ ३१ ॥

पूर्वाधिकरणे प्रामाणिकत्वेनाऽशरीरस्यापि मायावित्वं जगत्कारणत्वं चाऽऽपादितम् । इदानीं जगत्कारणत्वमीश्वरस्याऽनुपपन्नं, प्रयोजनाऽभावात् इत्याक्षिपति—

न प्रयोजनवत्त्वात् ॥ ३२ ॥

न चेतनः स्रष्टा । कुतः ? चेतनसमीक्षायाः प्रयोजनवत्त्वात् । आप्तकामत्वाच्चेश्वरस्य न प्रयोजनं किं चित्सृष्टौ ॥३२॥

लोकवत्तु लीलाकैवल्यम् ॥ ३३ ॥

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । लोकवत् । यथा लोके राजादीनामाप्तकामानां विना प्रयोजनं लीलायाः केवलायः भावो लीलाकैवल्यं लीलयैव केवलं तत्प्रवर्तते तद्वत् ॥ ३३ ॥

पूर्वाधिकरणे लीलया जगत्कारणत्वमुक्त,मिदानीं कुर्वतो वैषम्यादित्याक्षिप्य समाधत्ते—

वैषम्यनैर्घृण्ये न साऽपेक्षत्वात् तथा हि दर्शयति ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषमस्य भावो वैषम्यं केषां चित्सुखं केषां चिद् दुःखं केषां चिदुभे अपि। निर्घृणस्य भावो नैर्घृण्यं जगत्संहर्तृत्वादि, वैषम्यञ्च नैर्घृण्यं च वैषम्यनैर्घृण्ये नेश्वरस्य। कुतः? धर्मसापेक्षतः सुखमधर्मसाऽपेक्षतो दुःखमुभयसापेक्षतः सुखदुःखादि चँ करोति। यतः सापेक्षस्य भावः सापेक्षत्वं हि यस्मात् यथा भवति तथा दर्शयति श्रुतिः 'एष ह्येवे'त्यादिना, स्मृतिरपि 'ये यथे'त्यादिना॥ ३४॥

न कर्माऽविभागादिति चेन्नाऽनादित्वात्॥३५॥

प्रथमतो जगत उत्पत्तौ नेश्वरस्य कर्मसापेक्षता। कुतः? यत उत्पत्तेः प्राक् न कर्म्म सुकृतं दुष्कृतम्। तदेव कुतः? 'सदेवे'त्यादिना उत्पत्तेः प्रागविभागादिति चेत्। एवं यदि तन्न। प्राथम्याऽनुपपत्तेः। अनादित्वात्संसारस्य। न विद्यते आदिर्यस्य सो ऽयमनादिस्तस्य भावस्तत्त्वं तस्मात्॥ ३५॥

तदेव कथ? मित्यत आह—

उपपद्यते चाऽप्युपलभ्यते च॥ ३६॥

संसारस्याऽनादित्वमुपपद्यते, अन्यथा कृतनाशाऽकृताऽभ्यागमप्रसङ्गात्। उपलभ्यतेपि 'सूर्याचन्द्रमसा'वित्यादौ स्मृतौ च 'नान्तो न चादि'रित्यादौ। आद्यश्चकारो विपर्ययप्रमाणाऽभावार्थः। द्वितीयश्चकारः प्रसिद्धविरोधार्थः॥ ३६॥

पूर्वाधिकरणे विषयस्त्रष्टृत्वस्याऽनेकान्तता उक्ता, तेनैव निर्गुणस्याऽनुपादानत्वमिति प्रत्युदाहरणेनाऽऽक्षिप्य समाधत्ते—

सर्वधर्मोपपत्तेश्च॥ ३७॥

सर्वे धर्माः सर्वधर्माः तेषामुपपत्तिस्तस्याः। निर्गुणस्यापि जगत्कारणत्वं भ्रमाधिष्ठानत्वेन रज्ज्वादेरिव सर्वधर्मोपपत्तेरेव॥ ३७॥

इति ब्रह्मसूत्रदीपिकायां द्वितीयऽध्यायस्य प्रथमः पादः॥

—*—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वस्मिन्पादे वेदान्ताऽननुग्राहकाः सांख्यादितर्का निरस्ताः, इदानीं तेषां मध्ये वेदान्तनिरपेक्षा ये तैः समन्वयस्य विरोधमाशङ्क्य तेषां दुष्टत्वप्रदर्शनेनाऽविरोधमाह द्वितीयेन पादेन । अत्रापि सांख्यस्मृतिवत्तर्कप्राधान्यमङ्गीकृत्य तन्निरस्यति—

रचनाऽनुपपत्तेश्च नाऽनुमानम् ॥ १ ॥

अनुमीयतइत्यनुमानं प्रधानं जगत्कारणं न । कुतः ? तस्याऽचेतनत्वेन जगतो गिरिनदीसमुद्रादेः रचनायाः सन्निवेशकरणस्याऽनुपपत्तेः । चकारो ऽन्वयाद्यनुपपत्तिं समुच्चिनोति ॥ १ ॥

प्रवृत्तेश्च ॥ २ ॥

आस्तां तावदियं रचना तत्सिद्ध्यार्था, प्रवृत्तिः साम्याऽवस्थातः प्रच्युतिस्तस्या अचेतनस्य प्रधानस्य चेतनाऽनधिष्ठितस्याऽनुपपत्तेः ॥ २ ॥

पयोऽम्बुवच्चेत्तत्रापि ॥ ३ ॥

पयो यथा अचेतनं वत्सविवृद्ध्यै, अम्बु वा निम्नदेशगमनाय प्रवर्तते तद्वत् प्रधानमपि प्रवर्तिष्यतइति चेदेवं यदि तन्न । तत्रापि पयसि वत्सस्याऽम्बुनि भेद्यभेदकस्येश्वरस्य च समाश्रयणं यतः ॥३॥

अस्तु प्रधाने सत्त्वांशः प्रवर्तक इत्याह—

व्यतिरेकाऽनवस्थितेश्चाऽनपेक्षत्वात् ॥४॥

सत्त्वप्रधानव्यतिरेकेणाऽनवस्थितेरनवस्थानात् बाह्यस्याऽनपेक्षत्वात् सातत्येन महदादीनामुत्पादः स्यादिति शेषः । चकारो ऽपसिद्धान्तमाह ॥ ४ ॥

तृणादेः क्षीराद्याकारपरिणामवन्न सातत्यमित्यत आह—

अन्यत्राऽभावाच्च न तृणादिवत् ॥ ५ ॥

नायं तृणपल्लवादिदृष्टान्तो ऽप्यचेतनं जगत्कारणे साक्षात्कारणं साधयति । यतो ऽचेतनस्य तृणपल्लवादेः स्वतन्त्रस्य न क्षीरं परिणामो ऽपि । कुतः ? अन्यत्र बलीवर्दादिभक्षिते परित्यक्ते वा क्षीरप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रिणामस्याऽभावात् । चकारः प्रधानस्य स्वरूपाऽसत्त्वसमुच्चयार्थः ॥ ५ ॥

अभ्युपगमे ऽप्यर्थाऽभावात् ॥ ६ ॥

पूर्वं प्रधानस्य प्रवृत्तिर्नोपेयतइति स्थितम्, इदानीं तत्प्रवृत्तेरभ्युपगमेपि अर्थस्य प्रयोजनस्य निमित्तान्तराऽभाववत् पुरुषे भोगादेरसम्भवेनाऽभावात् ॥ ६ ॥

पुरुषाऽश्मवदिति चेत् तथापि ॥ ७ ॥

पुरुषावन्धपङ्गू, तत्राऽन्धमधिष्ठाय प्रवर्तते इति पङ्गुः प्रवर्तकोऽयस्कान्तो वा यथा स्वयम् प्रवृत्तस्तद्वदप्रवृत्तोपि पुरुषः प्रवर्तयिष्यतीति चेत्तत्रापि सान्निध्यादयश्च दोषाः प्रसज्येरन् ॥ ७ ॥

अङ्गी गुणः प्रवर्तको ऽस्त्वित्यत आह—

अङ्गित्वाऽनुपपत्तेश्च ॥ ८ ॥

सत्त्वादीनां साम्ये ऽङ्गित्वस्याऽनुपपत्तेः । चकारो जडत्वप्रयुक्तं सामान्यदूषणं समुच्चिनोति ॥ ८ ॥

साम्याऽवस्थायामपि वैषम्ययोग्या गुणास्तेनैकवाक्यतावशादङ्गित्वमपि स्यादित्यत आह—

अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् ॥९॥

अन्याऽनुमितौ कार्यवशेनाऽङ्गित्वाद्यनुमितौ तस्य च चैतन्याऽवस्थानत्वे तदस्मिन्न सम्भवति । कुतः ? ज्ञशक्तेर्वियोगो ऽभावस्तस्मात् । पुरुषस्यैव चेतनत्वादित्यर्थः । न चाऽनुमानमपि सिद्ध्यतीति चकारार्थः ॥ ६ ॥

सत्त्वगुणत्वात् ज्ञानस्य तच्छक्तिरप्यविरुद्धेत्यत आह—

विप्रतिषेधाच्चाऽसमञ्जसम् ॥ १० ॥

जडं ज्ञशक्ति च एवं अन्येष्वपि क चित्सप्तेन्द्रियाणि क चिदेकादशेत्यादिविप्रतिषेधः । तस्मादिदं साङ्ख्यदर्शनमसमञ्जसम् ॥१०॥

पूर्वाधिकरणे प्रधानगुणाऽनन्वयात् जगन्न तत्प्रकृतिकमित्युक्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म, इहापि चैतन्याऽनन्वयात् न चेतनप्रकृतिकमित्याक्षिप्य समाधत्ते—

महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥११॥

यथा परमाणोः परिमण्डलादणु ह्रस्वं च द्यणुकम्। अणोः ह्रस्वाच्च द्यणुकान्महद्दीर्घं च त्र्यणुकादि, तद्वच्चेतनमपि ब्रह्माऽचेतनस्याऽऽरम्भकमस्तु ॥ ११ ॥

पूर्वाधिकरणे प्रधानस्य स्वातन्त्र्यान्न जगतां कारणत्वम्, इह त्वणूनामीश्वरस्याऽधिष्ठातुः सत्त्वात्कारणत्वमिति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

उभयथापि न कर्माऽतस्तदभावः ॥ १२ ॥

उभयथाप्याद्यस्य कर्मणो निमित्तस्याऽभावेपि दृष्टस्याऽदृष्टस्य वा दृष्टस्यापि प्रयत्नस्याऽभिघातादेवाऽदृष्टस्याप्यात्मसमवायिनो वा दृष्टवदात्मसंवन्धस्यापि सदातनत्वेन प्रलयाद्यभावदोषात् नाद्यं कर्माऽणुषु। अत आद्यस्य कर्मणो ऽभावात् तज्जनकस्यापि तस्य संयोगस्याऽभावः असत्त्वं, तदभावाच्च संयोगसचिवाः परमाणवो न द्यणुकादिक्रमेण जगदारभन्ते इत्यर्थः ॥ १२ ॥

समवायाऽभ्युपगमाच्च साम्यादनवस्थितेः ॥ १३ ॥

पूर्वं संयोगस्य निमित्ताऽभाव उक्तः, इदानीं सम्बन्धाऽभावः। समवायस्याऽभ्युपगमो ऽङ्गीकारस्तस्मात्। संयोगस्य यथा समवायः एवं समवाये ऽपि समवायः समानत्वात्संवन्धत्वस्य भेदस्य च। कुतः? समवाये ऽपि समवायं प्रत्यनवस्थानमनवस्थितिस्तस्याः। चकारः संयोगस्य समवायाऽनङ्गीकारे राद्धान्तविरोधादि समुच्चिनोति॥१३॥

अस्तु तर्हि परमाणव एवाद्यस्य कर्मणो निमित्तमित्यत आह—

नित्यमेव च भावात् ॥ १४ ॥

अणूनां प्रवृत्तिस्वभावत्वे सर्गस्य निवृत्तिस्वभावत्वे प्रलयस्योभयस्वभावत्वे कार्यस्य पूर्वाऽपरकालवैकल्यस्याऽनुभयस्वभावत्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निमित्तस्य नित्यं सर्वदा भावात् प्रलयाद्यभावदोषः । चकारः पूर्वसूत्रवत् ॥ १४ ॥

अस्त्वागन्तुकं निमित्तं नित्यानामणूनामित्यत आह—

रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॥१५॥

नित्यस्य विपर्ययोऽनित्यत्वम् अणूनाम् । कुतः ? रूपादिमत्त्वात् । रूपादिमतां घटादीनामनित्यत्वदर्शनात् । चकारः कर्मव्यतिरिक्तस्य निमित्तस्य दुर्लभत्वं समुच्चिनोति ॥ १५ ॥

घटादीनां परिमाणतारतम्यादस्त्वनित्यत्वमणूनां, समानपरिणामत्वादात्मादिवत् नित्यत्वमित्यत आह—

उभयथा च दोषात् ॥ १६ ॥

समानपरिमाणत्वे वायवीयानामपि रूपरसगन्धस्पर्शसद्भावो दोषः । असमानपरिमाणत्वे हेतोरसिद्धिदोषः । चकारस्त्वनैकान्तिकत्वसमुच्चये ॥ १६ ॥

ननु शाश्वतीयत्वादिदं मतमङ्गीकरणीयमित्यत आह—

अपरिग्रहाच्चाऽत्यन्तमनपेक्षा ॥ १७ ॥

न परिग्रहो ऽपरिग्रहः सांख्यादिवादस्य सत्कार्याद्यंशे परिग्रहः, सो ऽप्यस्य न, तस्मादत्यन्तमनपेक्षा शिष्टैः परिग्रहो ऽणुमात्रमपि न कृत इत्यर्थः । चकारस्त्वप्रयुक्तत्वसमुच्चयार्थः ॥ १७ ॥

पूर्वाधिकरणे ऽर्धवैनाशिका निरस्ताः, अस्तु तेषां निरास उभयभ्रष्टत्वात्, न बाह्यार्थवादिनो वैनाशिकास्तथेत्याक्षिप्य समाधत्ते—

समुदायउभयहेतुके ऽपि तदप्राप्तिः ॥ १८ ॥

चतुर्विधो ऽणुहेतुकश्च भूतभौतिकसंहतिरूपः समुदायः रूपवेदनाविज्ञानसंज्ञासंस्कारहेतुकश्च पञ्चस्कन्धीरूपः, तस्मिन्नुभयहेतुकेपि समुदायिनां समुदाये ऽभिप्रेयमाणे तदप्राप्तिस्तस्य समुदायस्याऽप्राप्तिरसिद्धिरचेतनत्वा,त्समुदायस्य चाऽवस्तुत्वात्, अस्य स्थिरस्य चेतनस्य संहतेरसत्त्वात् ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इतरेतरप्रत्ययत्वादिति चेत् नोत्पत्तिमात्रनिमित्तत्वात् ॥ १९ ॥

अविद्यासंस्कारविज्ञानादीनां स्थिरस्य चेतनस्याऽसत्त्वे ऽपि इतरेतरप्रत्यय इतरेतरकारणत्वं तस्मादिति चेत् न । उत्पत्तिमात्रनिमित्तत्वात् । उत्पत्तौ केवलं निमित्तमविद्या तदितरेतरत् न तु संघातोत्पत्ताविति मात्रशब्दार्थः ॥ १९ ॥

उत्तरोत्पादे च पूर्वनिरोधात् ॥ २० ॥

उत्पत्तिमात्रनिमित्तत्वमुक्तं, तदप्यसम्भवि, उत्तरस्य कार्यस्योत्पादे उत्पत्त्यवसरे पूर्वस्य निरोधादसत्त्वात् । चकार उत्पत्त्यसद्भावसमुच्चयार्थः ॥ २० ॥

असत्ये कारणे कार्यस्योत्पादो ऽस्त्वित आह—

असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥२१॥

असति कारणे कार्यस्योत्पादे प्रतिज्ञायाश्चतुर्विधान् हेतून्वा प्रतीत्य च तदुत्पद्यते इत्यस्या उपरोधो बाधः । अन्यथा कार्यस्य क्षणे कारणस्य सत्त्वे कार्यकारणयोर्यौगपद्यं तत्रापि क्षणिकाः सर्वे संस्कारा इति प्रतिज्ञोपरोधः ॥ २१ ॥

मा भूद्वैनाशिकानां सन् पदार्थः, असंस्तु स्यादित्यत आह—

प्रतिसंख्याऽप्रतिसंख्यानिरोधाऽप्राप्तिरविच्छेदात् ॥ २२ ॥

बुद्धिपूर्वको निरोधः प्रतिसंख्यानिरोधः, तद्विपरीतो ऽप्रतिसंख्यानिरोधः निरोधो ऽसन्पदार्थः सुगतानामभिहितः, तस्य निरोधस्य सन्तानस्य नित्यत्वात् सन्तानिनां च विनाशस्य कर्त्तुमशक्यत्वात् अभावेनास्यैवाऽसत्त्वं प्रतिसङ्ख्यानिरोधश्चाऽप्रतिसङ्ख्यानिरोधश्च तयोः प्राप्तिर्निरोधाऽभावात् । स एव कथ ? मित्यत आह— अविच्छेदात्, सन्तानसन्तानिनोः ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न केवलं निरोधाभावो ऽविद्यादीनां प्रतिसंख्यानिरोधो, निमित्तमपि नास्तीत्याह—

उभयथा च दोषात् ॥ २३ ॥

उभयथा यदि ज्ञानेन निर्हेतुकविनाशाऽभ्युपगमदोषश्चेद् विनैव ज्ञानेन ज्ञानतत्साधनोपदेशवैयर्थ्यदोषस्तस्मात्। चकारस्त्वप्रतिसङ्ख्यानिरोधसङ्करसमुच्चयार्थः ॥ २३ ॥

आवरणाऽभावस्याऽऽकाशस्य यथा सतोऽङ्गीकारस्तद्वन्निरोधयोरप्यङ्गीकारः किं न स्यात्? इत्यत आह—

आकाशे चाऽविशेषात् ॥ २४ ॥

आकाशे ऽप्यसत्त्वमनुपपन्नं निरोधयोरिव। यथा गन्धादयो गुणाः पृथिव्यादयो भावास्तथा शब्दगुणोऽप्याकाशो भावः, अविशेषात्। चकार एवाऽनेकाऽऽवरणभावाऽनुपपत्त्यादि समुच्चिनोति ॥ २३ ॥

विज्ञानस्य क्षणिकत्वात् तद्दृष्टान्तेनाऽसर्वज्ञस्य क्षणिकत्वात् तत्प्रणालिकया ऽसत्त्वं सेत्स्यतीत्यत आह—

अनुस्मृतेश्च ॥ २५ ॥

अनुभवमनु जायमाना स्मृतिस्तस्याः कर्तुः स्याऽनुभवस्मृत्योरेकाधिकरणत्वात् दृष्टान्तेनान्येषामपि। चकारो ज्ञानस्यापि क्षणिकस्वभावसमुच्चयार्थः ॥ २५ ॥

कार्यमेवाऽसन्तं पदार्थं साधयिष्यति, 'नाऽनुपमृद्य प्रादुर्भावा'-दिति न्यायादित्यत आह—

नाऽसतो ऽदृष्टत्वात् ॥ २६ ॥

असतो ऽविद्यमानान्मृदादेर्घटादिकं न जायते। कुतः? मृदादेरसत्त्वे घटादेरदृष्टत्वात् ॥ २६ ॥

पिण्डादेरुपमर्दादेव घटादिकार्यस्योत्पाद इत्यत आह—

उदासीनानामपि चैवं सिद्धिः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवमभावाद्भावोत्पत्तौ कुसूलनिहितकुल्माषाणामुदासीनकृषीवलानां कृषिमकुर्वतामपि सिद्धिः कृतकृत्यता शाल्यादिकं सम्पन्नं स्यादित्यर्थः। चकारः पिण्डादीनां कारणत्वसमुच्चयार्थः ॥ २७ ॥

पूर्वाधिकरणे समुदायाऽनुपपत्त्यादिना बाह्यार्थवादी निराकृतः, इदानीं विज्ञानवादी ताभिरेवोपपत्तिभिः प्रत्यवतिष्ठमानो निराक्रियते—

नाऽभाव उपलब्धेः ॥ २८ ॥

बाह्यानामर्थानां नाऽभावो ऽसत्त्वम्। कुतः? तेषां कुम्भादीनां तत्तत्प्रत्ययैरुपलम्भनमुपलब्धिः, तस्याः ॥ २८ ॥

ज्ञानाऽऽकाराणामेव तेषां स्वप्नवदुपलम्भः स्यादित्यत आह—

वैधर्म्याच्च न स्वप्नादिवत् ॥ २९ ॥

विरुद्धधर्मयोर्भावो वैधर्म्यं बाध्यत्वाऽबाध्यत्वेन। तस्मान्नायं स्वप्नादिवद्बाह्यो ऽर्थो ज्ञानाकारः। आदिशब्देन मायारचनादिकम्। चकारः श्रुतेरप्रामाण्यं समुच्चिनोति ॥ २९ ॥

अबाध्यत्वं विचित्रार्थोपलम्भाद्विचित्रश्चार्थो वासनाविलास इत्यत आह—

न भावो ऽनुपलब्धेः ॥ ३० ॥

वासनानां विचित्राणां न भावो न सत्त्वम्। कुतः? अनुपलब्धेः। बाह्यानामर्थानामभावात् ॥ ३० ॥

मा भूद्बाह्यार्थे, आलयविज्ञानवशादेव वासनानां विचित्राणां सत्त्वमित्यत आह—

क्षणिकत्वात् ॥ ३१ ॥

आलयविज्ञानस्य स्थायिता ऽसिद्धा, अतः क्षणिकत्वादाश्रयाऽभाव इत्यर्थः। चकारो बाह्यार्थस्याऽसत्त्वे आलयविज्ञानस्याप्यसामर्थ्यमाह ॥ ३१ ॥

केनाप्यंशेन विज्ञानवादोत्पत्तौ तद्दृष्टान्तेन सौगतं मतमङ्गीकरणीयमित्यत आह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वथाऽनुपपत्तेश्च ॥ ३२ ॥

सर्वथा सर्वं क्षणिकमित्याद्यनुतिष्ठतां परस्यापि नेश्वरादिशब्दतोऽनुपपत्तेः । चकारो वेदविरोधसमुच्चयार्थः । बाह्याऽर्थपदस्थाने दुर्बोधदुर्ज्ञानपदप्रक्षेपेण शून्यवादिनिराकरणमपि नाऽभाव इत्यादिसूत्रे करणीयम् ॥ ३२ ॥

पूर्वाधिकरणे उपलब्ध्यादिभिर्विज्ञानवादशून्यवादौ निराकृतौ, नैवं विवसनानां समये अनेकत्वाश्रयणादिति प्रत्युदाहरणेन तद्विरोधमाशङ्क्य परिहरति—

नैकस्मिन्नसम्भवात् ॥ ३३ ॥

जीवाऽजीवयोरास्रवसंवरनिर्जरबन्धमोक्षाणां पञ्चाऽस्तिकायानां जीवपुद्गलधर्मकारणत्वं समयकल्पितानामनेकभेदभिन्नानां संक्षेपतो द्वावेव पदार्थौ तद्यत्रस्थार्थः स्यादस्ति स्यान्नास्ति चेदवक्तव्यः स्यादस्ति चाऽवक्तव्यश्चेति इमं सप्तभङ्गीनयमुपपादयावतारयन्ति, एकत्वादौ साष्टसु च व्यवस्थापकत्वं मन्यन्ते । तदिदं नोपपद्यन्ते । कस्मात्? एकस्मिन् धर्मिणि सत्त्वादीनां युगपद्धा ऽसम्भवात् ॥ ३३ ॥

एवं चाऽऽत्माऽकार्त्स्न्यम् ॥ ३४ ॥

यथा सप्तभङ्गीनयादिकमनुपपन्नमेवमात्मनो ऽकार्त्स्न्यमसर्वगतपरिमाणमपि देहपरिमाणत्वे देहवत् स्यादित्यर्थः ॥ ३४ ॥

नियतपरिमाणस्यापि जीवस्यांऽवयवाऽऽगमनिर्गमाभ्यां देहपरिमाणत्वमित्यत आह—

न च पर्यायादप्यविरोधो विकारादिभ्यः ॥३५॥

न च पर्यायादागमनिर्गमने, तस्मादपि नैवाऽनित्यत्वाऽभावे विरोधः । कुतः ? विकारादिभ्यः सूक्ष्मस्थूलादि आदिशब्देनाऽवयवानामारम्भेऽन्योत्पत्तिप्रलयस्थाननिरूपणत्वाऽनिरूपणत्वादयो दोषास्तेभ्यः । अथ वा परिणामाऽऽगमनिर्गमनयोरपि जीवस्य प्रवाहरूपेण नित्यत्वान्नायं दोष इत्यत आह—न च पर्यायादप्यविरोधो विकारा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिश्यः । पर्यायात्परिमाणाऽऽगमनिर्गमरूपात् । अत्र चकारः सौगतमतोक्तदोषसमुच्चयार्थः । शेषं समानम् ॥ ३५ ॥

ननूक्तः सर्वो दोषो न जीवस्याऽनित्यत्वमावहति, किं तु तत्परिमाणस्याऽनित्यत्वादिकमित्यत आह—

अन्त्याऽवस्थितेश्चोभयत्वादविशेषः ॥३६॥

अन्त्यस्य मोक्षाऽवस्थस्य परिमाणस्य नित्यत्वादवस्थानमवस्थितिः, तस्याऽनुभयस्यादिमध्यस्थस्य परिमाणस्य तद्वन्नित्यत्वं, तस्मात् अविशेषः। एकशरीरपरिमाणमेव तत् स्यात्, न चैतदिष्टं, तस्माज्जीवस्याप्यनित्यत्वम् । अथ वा ऽन्त्यस्य जीवपरिमाणस्याऽवस्थितत्वात् पूर्वयोरप्यवस्थयोरवस्थितपरिमाण एव जीवः स्यात्, ततश्चाऽविशेषेण सर्वदैवाऽणुर्महान्वा जीवः स्यात्। चकारो जीवरूपत्वादिप्रसङ्गसमुच्चयार्थः ॥ ३६ ॥

पूर्वाधिकरणे यथा सत्त्वाऽसत्त्वयोरेकत्र विरोध उक्तः, एवमधिष्ठातृत्वोपादानत्वयोरेकत्र विरोध इति दृष्टान्तेनाक्षिप्य केवलनिमित्तत्वदूषणेन समाधत्ते—

पत्युरसामञ्जस्यात् ॥ ३७ ॥

पत्युरीश्वरस्य न प्रधानपुरुषाद्यधिष्ठातृत्वम् । कुतः? असामञ्जस्यात् । समञ्जसस्य भावः सामञ्जस्यं न सामञ्जस्यमसामञ्जस्यं वैषम्यनैर्घृण्यकर्मेश्वरान्योन्याश्रयपरस्पराऽसङ्गत्वाऽभावादि। तस्मात् ॥ ३७ ॥

राजादिवदस्त्वधिष्ठातृत्वमित्यत आह—

सम्बन्धाऽनुपपत्तेश्च ॥ ३८ ॥

नाऽत्र स्वस्वामिभावलक्षणः सम्बन्धस्तत्रैव विप्रतिपत्तेः । न च संयोगो निरवयवत्वात् । न च समवायः, तस्य कार्यकारणद्रव्यसम्बन्धत्वात् । एवमन्यस्यापि सम्बन्धस्याऽनुपपत्तिः । चकारः सम्बन्धस्याऽऽगन्तुकत्वाऽनागन्तुकत्वाद्यनुपपत्तिसमुच्चयार्थः ॥३८॥

अधिष्ठानाऽनुपपत्तेश्च ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

अधिष्ठातुः क्रिया ऽधिष्ठानं तच्च नाऽधिष्ठेयमन्तरेण, न वा स्वरूपेण, सन्दिग्धस्य रूपादिहीनस्य प्रधानादेरधिष्ठेयत्वाऽभावादधिष्ठानस्याऽनुपपत्तिस्तस्याः। चकारो ऽधिष्ठात्रधिष्ठानयोरपि स्वरूपाऽनुपपत्तिं समुच्चिनोति ॥ ३९ ॥

करणवच्चेन्न भोगादिभ्यः ॥ ४० ॥

मा भूत्कुम्भकुलालादिवदधिष्ठेयाऽधिष्ठातृत्वं, करणवज्जीवेन्द्रियवद्भविष्यतीति चेन्न। कुतः? भोगादिभ्यः। भोगः सुखदुःखान्यतरसाक्षात्कारः। आदिशब्देन जन्ममरणादयः। तेभ्यो हेतुभ्यः। अथ वा ऽधिष्ठानस्य शरीरस्याऽनुपपत्तेरिति पूर्वसूत्रार्थः। द्वितीयसूत्रार्थस्तु करणमिन्द्रियं तदस्यास्तीति करणवत् शरीरं कल्प्यमिति चेत्। शेषं पूर्ववत् ॥ ४० ॥

ननु नैतानि सर्वगते सर्वज्ञे ईश्वरे चोद्यानीत्यत आह—

अन्तवत्त्वमसर्वज्ञता वा ॥ ४१ ॥

ईश्वरस्येति शेषः। यदीश्वरः प्रधानादीनामात्मनश्चेयत्तां परिच्छिनत्ति अन्तवान् स्यादसर्वज्ञश्च। न चेदसर्वज्ञत्वम् ॥ ४१ ॥

पूर्वाधिकरणे केवलनिमित्तत्वं निराकृतम्, अस्तु तर्ह्युपादानत्वमतिनिरङ्कुशं जीवस्य प्रपञ्चस्येति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

उत्पत्त्यसम्भवात् ॥ ४२ ॥

वासुदेवात्परस्मात्प्रकृतेः संकर्षणस्य जीवस्योत्पत्तेर्जन्मनो जातस्य मरणविशेषः, तत्र च जीवस्य कृतनाशाऽकृताऽभ्यागमप्रसङ्गादिः। अतो ऽसम्भवात्। न सम्भवो ऽसम्भवस्तस्मात् न भागवतमतं सम्यक् ॥ ४२ ॥

यथा सङ्कर्षणाज्जीवात् प्रद्युम्नस्य मनसो, यथा वा प्रद्युम्नान्मनसो ऽनिरुद्धस्याऽहं कृतेर्जन्म एवं वासुदेवादपि सङ्कर्षणस्योत्पत्तिरस्त्वित्यत आह—

न च कर्त्तुः करणम् ॥ ४३ ॥

कर्त्तुः सङ्कर्षणात्करणं प्रद्युम्नो न जायते, सङ्कर्षणस्यैव कर्तृत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्य विप्रतिपत्तेरित्यर्थः। चकारः प्रद्युम्नादप्यनिरुद्धोत्पत्त्यभावसूचनार्थः ॥ ४३ ॥

ननु सर्वज्ञत्वादिगुणानां संकर्षणादीनामुत्पत्तावपि नोत्पत्तिप्रसङ्गो दोष इत्यत आह—

विज्ञानादिभावे वा तदप्रतिषेधः ॥ ४४ ॥

वाशब्दश्चेदर्थः । यदि सर्वे सर्वज्ञाः सर्वगता अनन्तगुणाश्च वासुदेवादयस्तदा वासुदेवाद्युत्पत्त्यसम्भवदोषस्तदवस्थः । अतस्तस्याऽप्रतिषेधः ॥ ४४ ॥

तेषु संकर्षणादिषु वासुदेववद्विज्ञानादिगुणानां भावे ऽस्य शास्त्रविरोधं वेदविरोधं विना नाऽन्यविरोधं मन्यामिहे इत्यत आह—

विप्रतिषेधाच्च ॥ ४५ ॥

अस्मिन्नेव शास्त्रे ज्ञानादीनां गुणत्वं तएव भगवन्तो वासुदेवा इत्यादिविप्रतिषिद्धं विरुद्धं चतुर्षु वेदेषु 'परं श्रेयो लब्ध्वा शाण्डिल्य इदं शास्त्रमधीतवा'नित्यादिवेदनिन्दादर्शनाद्वेदविरुद्धश्च । सो ऽयं प्रतिषेधः । तस्मात् । चकारो ऽन्यदूषणानामपि समुच्चयार्थः ॥४५॥

इति श्रीब्रह्मसूत्रदीपिकायां द्वितीयाऽध्यायस्य
द्वितीयः पादः ॥ २ ॥

—**—

द्वितीये पादे स्वतन्त्रतर्काणां परस्परविरोधान्न तैर्विरोधः समन्वयस्येत्युक्तं, तृतीयेन तु पादेन भूतश्रुतीनां भोक्तृश्रुतीनां च परस्परविरोधः परिह्रियते। तत्रापि भोक्तृत्वस्यौपाधिकत्वादुपाधिषु चाऽऽकाशस्य पूर्वोत्पत्तिश्रवणात् प्रथमं तद्विषयाणां विरोधपरिहारार्थमाक्षिप्यते—

न वियदश्रुतेः ॥ १ ॥

वियदाकाशं न जन्मवत् छान्दोग्ये तस्य जन्मनो ऽश्रुतेः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्ति तु ॥ २ ॥

तुशब्दो वियतो ऽनुत्पत्तिवारणार्थः । कुतः ? अस्ति तैत्तिरीयके आत्मनः सा ऽऽकाशश्रुतिर्यतः ॥ २ ॥

गौण्यसम्भवात् ॥ ३ ॥

आकाशोत्पत्तिश्रुतिर्गौणी । कुतः ? तस्य समवाय्यसमावयिकारणस्याऽऽकाशपरमाणुतत्संयोगानामसम्भवात् ॥ ६ ॥

शब्दगस्ये ऽर्थे किमसम्भावने?त्यत आह—

शब्दाच्च ॥ ४ ॥

'अन्तरिक्षं चैतदमृत'मित्यादौ । चकारो वेदेपि युक्तिसमुच्चयार्थः । एकस्य सम्भवपदस्यैकस्मिन् वाक्ये कथं गौणत्वं मुख्यत्वं चे?त्यत आह—

स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ५ ॥

एकस्यापि सम्भवपदस्य गौणार्थता ऽऽकाशे अन्येषु मुख्यता ब्रह्मशब्दस्य तपःप्रभृतिषु गौणार्थता परस्मिन् मुख्यार्थतैव स्यात् भवेत् ॥ ५ ॥

सिद्धान्तमाह—

प्रतिज्ञाऽहानिरव्यतिरेकाच्छब्देभ्यः ॥ ६ ॥

न वियदुत्पत्तिश्रुतिर्गौणी । कुतः ? कार्यकारणयोरव्यतिरेकादभेदात् । आकाशस्योत्पत्तौ ब्रह्मणस्तयोरभेदः स्यात्तथा प्रतिज्ञाहानिः प्रतिज्ञाया 'येनाऽश्रुतं श्रुत'मित्यादेरहानिरपरित्यागः । कार्यकारणाऽभेदेन । प्रतिज्ञाया अहानिरेव कुतो विवक्षिते?त्यत आह—शब्देभ्यः । 'येनाऽश्रुत'मित्यारभ्य 'एतदात्म्यमिदं सर्वं'मित्यन्ताश्छान्दोग्यशब्दाः । एवं सर्वत्र । तेभ्यः ॥ ६ ॥

तथापि तर्कविरोध इत्यत आह—

यावद्विकारं तु विभागो लोकवत् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा लोके घटादीनां भेदेन कार्यत्वमन्तरेणास्ति च कालादिभ्यो भेद आकाशस्य तस्मात् घटादिवत्कार्यः ॥ ७ ॥

पूर्वाधिकरणे यथैकविज्ञानेन सर्वविज्ञानप्रतिज्ञया न गौणीत्युक्तं तद्वत् 'सैषा ऽनस्तमिता देवता यद्वायु'रित्यादिका वायोर्नित्यत्वादिप्रतिपादिका श्रुतिर्न गौणीति दृष्टान्तेनाऽऽक्षिप्याऽतिदेशेन समाधत्ते-

एतेन मातरिश्वा व्याख्यातः ॥ ८ ॥

एतेनाऽऽकाशोत्पत्तिकथनेन मातरिश्वा वायुरुत्पन्नो व्याख्यातः कथितः ॥ ८ ॥

पूर्वाधिकरणे यथा कारणस्याप्याकाशस्य कार्यत्वमुक्तं तद्वदिहापि कारणस्यापि ब्रह्मणः कार्यत्वमिति दृष्टान्तेनाक्षिप्य समाधत्ते—

असम्भवस्तु सतो ऽनुपपत्तेः ॥ ९ ॥

तुशब्दो ब्रह्मण उत्पत्तिशङ्कानिराकरणार्थः । सतो ब्रह्मण उत्पत्तेरसम्भवः । कुतः ? 'न चाऽस्य कश्चित् जनिता' इत्यादिश्रुतेः । युक्तितश्च तत्कारणस्याऽनुपपत्तेः ॥ ९ ॥

पूर्वाधिकरणे कारणस्याऽनध्यस्तत्वमुक्तं, तेनैव न्यायेन वायुस्तेजसः कारणमिति दृष्टान्तेनाक्षिप्य समाधत्ते—

तेजो ऽतस्तथा ह्याह ॥ १० ॥

तेजो ऽग्निरतो ऽस्माद्वायुरूपादेव । कुतः ? हि यस्मात् तथा ऽऽह श्रुति'र्वायोरग्नि'रिति ॥ १ ॥

पूर्वाधिकरणे तेजसो वायुयोनित्वमुक्तम् अविरोधात्, इह तु तेजसो ऽयोनित्वे विरोधः प्रत्यक्ष इति प्रत्युदाहरणेनाक्षिप्याऽतिदेशेन समाधत्ते—

आपः ॥ ११ ॥

आपो ऽग्नेर्जायन्ते । हेतुः पूर्वसूत्रोक्तः । 'अग्नेराप' इति श्रुतेः ॥ ११ ॥

पूर्वाधिकरणे वायोरिति ... मुख्यार्थता इत्याक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ता, नद्धदन्नश्रुतेरपि माषादिषु मुख्यार्थत्वात् तेषामेव स्वीकार इति दृष्टान्तेनाक्षिप्य समाधत्ते—

पृथिव्यधिकाररूपशब्दान्तरेभ्यः ॥ १२ ॥

अधिकारो महाभूताऽधिकारः रूपं यत्कृष्णं तदन्नस्येति कृष्णं रूपम्, 'अद्भ्यः पृथिवी'ति शब्दान्तरेभ्यः॥ १२ ॥

पूर्वाधिकरणे ऽधिकारादिभ्यः कार्यशब्दः कारणे नीतः, इह तु भूताऽधिष्ठात्रीणां देवतानां पारतन्त्र्ये हेतुरिति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

तदभिध्यानादेव तु तल्लिङ्गात्सः ॥ १३ ॥

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । स परमात्मैवाऽऽकाशादिरूपं तत्तद्विकारजातं सृजति । कुतः ? तदभिध्यानात् । तस्य विकारस्याऽभिध्यानं पर्यालोचनं तस्मात् । अभिध्यानमपि भूतानामेव कुतो न स्या?दित्यत आह–तल्लिङ्गात् । तस्य परमात्मनो 'यः पृथिवीमन्तरा यमयती'त्यादिना ऽध्यक्षस्य लिङ्गं तस्मान्नाऽभिध्यानं केवलानामित्यर्थः ॥ १३ ॥

पूर्वाधिकरणे पारतन्त्र्यं देवतानां भूतानां तल्लिङ्गादित्युक्तं, न तथा प्रलयक्रमे किं चिन्नियामकमिति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

विपर्ययेण तु क्रमो ऽत उपपद्यते च ॥१४॥

तुशब्दः प्रलये उत्पत्तिक्रमनिवारणार्थः । किन्तु अतो ऽस्मादुत्पत्तिक्रमाद्विपर्ययेण पृथिव्यप्स्वित्यादिक्रम उक्त उपपद्यते । यतः कार्यस्य घटादेः कारणे मृदादौ प्रलयस्य दृष्टत्वात् । चकारो 'जगत्प्रतिष्ठा देवर्षे' इत्यादिस्मृतिसमुच्चयार्थः ॥ १४ ॥

पूर्वाधिकरणे दृष्टाऽनुसारेणोत्पत्तेर्विपरीतः प्रलये क्रम इत्युक्तम्, इदानीमुत्पत्तिक्रममेवाऽऽक्षिप्य समाधत्ते—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain, Digitization by eGangotri.Funding: MIDF

अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाऽविशेषात् ॥ १५ ॥

विज्ञानं बुद्धिर्मन इन्द्रियं संकल्पविकल्पात्मकं विवक्षितं, विज्ञानं च मनश्च विज्ञानमनसी येन क्रमेण जायमाने आत्माकाशयोरन्तरा अन्तराले जायेते ते। कुत?स्तल्लिङ्गात् तस्या ह्यन्तरालजन्मनो लिङ्गभूतेभ्यः पूर्वमात्मन 'एतस्माज्जायते प्राण' इत्यादिना स्वरूपसंकीर्त्तनं बुद्धे'र्बुद्धिं तु सारथिं विद्धी'त्यनेनेति चेत् नैतत्। कुतः? अविशेषात्। न हि परमेश्वराज्ज्ञानिरिति क्रमो नियन्तुं शक्यः, किं तु भौतिकानि नेति विशेषः। न चाऽसावस्तीत्यर्थः ॥ १५ ॥

पूर्वाधिकरणे विशेषाऽश्रवणेन क्रमभङ्गो निवारितः, इदानीं विशेषाऽश्रवणेनैवोदाहरणत्वेन त्वंपदार्थस्योत्पत्तिरित्याक्षिप्य समाधत्ते—

चराऽचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॥ १६ ॥

जातो देवदत्तो मृतो देवदत्त इत्यादिव्यपदेशो जातकर्मादिसंस्कारश्च नात्मन इति तुशब्द आह। तर्हि किमात्मको ऽय?मित्यत आह—भाक्तः। भक्तिर्गुणयोग उपचार इति यावत्। तद्वशात्प्रवर्ततइति भाक्तः। क तर्हि मुख्य? इत्यत आह—चराऽचरव्यपाश्रयः स्थावरजङ्गमशरीराश्रयस्तस्य जन्मादेर्व्यपदेशः स्यात् भवेत्। कुत?-स्तद्भावभावित्वात्। तस्य शरीरस्य भावो यस्यास्ति जन्मादिव्यपदेशस्य संस्कारस्यापि सोयं तद्भावभावी तस्य भावस्तत्त्वं तस्मात्। अतः संस्कारोऽपि तदाश्रयः ॥ १६ ॥

पूर्वाधिकरणे कृतनाशादिप्रसङ्गेन जन्मादिशब्दा देहविषया उक्ता, नैवं कल्पादौ परमेश्वरादुत्पत्स्यमानजीवस्य कश्चन विरोध इति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः ॥ १७ ॥

नैवायमात्मा परस्मादात्मन आकाशादिवज्जायते। कुतः? तद्वदस्योत्पत्तेरश्रुतेः। वीह्याद्युत्पत्तिवत्। अस्त्वद्युभयमित्यत आह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नित्यत्वात् । चशब्दादजन्यत्वादिभ्यश्च । नित्यत्वादिकमेव कुत ? इत्यत आह—ताभ्यः ताः श्रुतयो 'न जीवो म्रियते स वा एष महानज आत्मे'त्याद्याः ॥ १७ ॥

पूर्वाधिकरणे जीवपरमात्मनोरैक्याद्यनुत्पत्तिर्जीवस्योक्ता, इदानीमागन्तुकज्ञानत्वेन जीवस्यैक्यमेवाऽनुपपन्नमित्याक्षिप्याऽतिदेशेन समाधत्ते—

ज्ञोऽत एव ॥ १८ ॥

ज्ञो नित्यचैतन्यरूपोऽयमात्मा। अत एवोत्पत्त्यसम्भवादेव परमात्मवत् ॥ १८ ॥

पूर्वाधिकरणे स्वयंप्रकाशत्वं जीवस्योक्तं तन्मनोवदणुपरिमाणस्य नोपपन्नमिति तदर्थमणुत्वं समर्थयते—

उत्क्रान्तिगत्यागतीनाम् ॥ १९ ॥

उत्क्रान्ति'रस्माच्छरीरादुत्क्रामती'ति श्रुतेः तासां श्रवणादणुपरिमाणो जीवः ॥ १९ ॥

ग्रामस्वाम्यनिवृत्तिवदस्तूत्क्रान्तिस्तन्निदर्शनेन गत्यागती अपि तथेत्यत आह—

स्वात्मनश्चोत्तरयोः ॥ २० ॥

उत्तरयोर्गत्यागत्योः स्वात्मनैव परिस्पन्दाधारेणैव निष्पत्तेः । चकारेणोत्क्रान्तेरपि मुख्यायास्तेनैव निष्पत्तेर्न दृष्टान्तः ॥ २० ॥

नाऽणुरतच्छ्रुतेरिति चेन्नेतराऽधिकारात्॥२१॥

जीवोऽणुर्न । कुतः ? अतच्छ्रुतेः । तस्याऽणुत्वस्याऽप्रतिपादिका श्रुतिरतच्छ्रुतिः तस्या इति चेन्न । कुतः ? इतरस्य परात्मनोऽधिकारात् ॥ २१ ॥

प्रकरणान्महानितिवदणुत्वस्य श्रवणान्नाऽणुर्जीव इत्यत आह—

स्वशब्दोन्मानाभ्यां च ॥ २२ ॥

स्वस्याऽणुत्वस्य वाचकः 'एषोऽणु'रिति स्वशब्दश्च उन्मानं च 'आराग्रे'त्यादिनाऽभिहितम्। चकारो हृदयाऽवस्थानसमुच्चयार्थः॥२२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अणुश्चेज्जीवः पदोरगस्य मस्तके चन्दनस्य स्पर्शोपलम्भनस्य युगपद्विरोधं इत्यत आह—

अविरोधश्चन्दनवत् ॥ २३ ॥

अयं न विरोधो ऽविरोधः । किंवदित्यत आह-चन्दनवत् । यथा हरिचन्दनबिन्दुरेकत्र त्वचा सम्बद्धः सर्वशरीरसुखाय एवमणुरात्मापि ॥ २३ ॥

अवस्थितिवैशेष्यादिति चेन्नाऽभ्युपगमाद्धृदि हि ॥ २४ ॥

चन्दनविन्दोरवस्थानं मस्तकादाववस्थितिः तस्या विशेषः प्रत्यक्षं तद्विपर्यं विशेषस्य भावो वैशेष्यं तस्माद्विषमं न दृष्टान्ते इति चेन्न। कुतः ? जीवस्य देहैकदेशाऽवस्थानस्याऽभ्युपगमात् । तदेव कुतः ? 'हृदि हीं'ति श्रुतेः ॥ २४ ॥

न निरवयवे आत्मनि साऽवयवश्चन्दनविन्दुदृष्टान्तः, न च चन्दनस्यापि सर्वशरीरव्यापित्वमेकदेशस्थस्येत्यत आह—

गुणाद्वा लोकवत् ॥ २५ ॥

नाऽनुभवाऽपलापो युक्त इति वाशब्दः । अणोरपि जीवस्य स्वचैतन्यात् गुणात् सर्वशरीरव्यापिता । कुत? एतदित्यत आह-लोकवत् । यथा लोके घटाद्येकदेशस्थानां मण्यादीनामणूनां स्वप्रभया घटादिव्यापित्वं तद्वत् ॥ २५ ॥

ननु गुणस्याऽऽश्रयाद्व्यतिरेको ऽदृष्टचर इत्यत आह—

व्यतिरेको गन्धवत् ॥ २६ ॥

गुणिनं जीवं परित्यज्य गुणस्य चैतन्यस्य वृत्तिर्व्यतिरेको नाऽनुपपन्नः। किं तदित्यत आह-गन्धवत् । यथा केतक्यादेर्द्रव्यस्यातिदूरस्यापि तद्गुणस्याऽन्यत्र वृत्तिस्तद्वत् ॥ २६ ॥

अणोर्जीवस्यापि चैतन्यं प्रमाणशून्यमित्यत आह—

तथा च दर्शयति ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हृदयाऽऽयतनत्वमणुपरिमाणत्वं चाऽऽत्मनोऽभिधाय तस्यैवा'ऽऽलोमभ्य आ नखाग्रेभ्य' इति चैतन्येन गुणेन समस्तशरीरव्याप्तिं दर्शयति। यथा ऽस्माभिरङ्गीकृतं तथा। चकारो जीवस्य व्याप्तत्वे भोगसङ्करसमुच्चयार्थः ॥ २७ ॥

'आ लोमभ्य' इत्याद्या श्रुतिर्जीवस्य चैतन्यगुणेन व्याप्तिं शरीरस्य प्रकारान्तरेण वा ब्रूते इति न शक्यं ज्ञातुमित्यत आह—

पृथगुपदेशात् ॥ २८ ॥

अणोरात्मनः कर्तुश्चैतन्यस्य शरीरव्याप्तौ 'प्रज्ञया शरीरं समारुह्ये'ति पृथगुपदेशात्। सिद्धान्तस्तु गुणः सारः प्रधानं यस्य स तथा ॥ २८ ॥

तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥२९॥

तुशब्दो जीवस्य स्वाभाविकाऽणुत्वनिरासार्थः। कथन्तर्ह्यणुत्व?मित्यत आह—तद्गुणसारत्वात्। तस्या बुद्धेर्गुणा अणुत्वादयः सारो यस्य जीवस्य स तथा तस्य भावस्तत्त्वं तस्मात्तेषामणुत्वोत्क्रान्त्यादीनां श्रुत्या तद्व्यपदेशः उपाधिगुणेनोपहितस्य। किंव?दित्यत आह–प्राज्ञवत्। यथा प्राज्ञः परमात्मा उपाधेर्हृदयाऽऽकाशदहरादेर्धर्मेणोपहितो दहरादिना व्यपदिश्यते 'दहरोऽस्मिन्नन्तराकाश'इति श्रुतेः तद्वत् ॥ २९ ॥

यद्यात्मा बुद्धिगुणसारस्तस्य कार्यत्वेन विनाशस्याऽवश्यम्भावात् कृतं ब्रह्मज्ञानेन, कृतार्थाश्चाऽसत्यवादिनः, अनुपहितस्यात्मनोऽप्रतीतेरित्यत आह—

यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥३०॥

यावदात्मनो जीवस्य भावः 'अहं ब्रह्माऽस्मी'ति बोधाऽनुत्पत्तिर्न दोषः ॥ ३० ॥

पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥३१॥

अन्तःकरणसम्बन्धस्य सुषुप्तिप्रलययोः सत एवाऽभिव्यक्तिः प्रकटभावस्तस्य योगाद्युक्तत्वात्। किंव?दित्यत आह—पुंस्त्वादिवदिति। यथा बाल्ये सत एव पुंस्त्वस्य यौवनेऽभिव्यक्तिस्तद्वत् ॥३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ननु बुद्धिरूपाऽन्तःकरणे किं प्रमाणं ? यत्प्रयुक्तः संसारः स्यादित्यत आह—

नित्योपलब्ध्यनुपलब्धिप्रसङ्गो ऽन्यतरनियमो वा ऽन्यथा ॥ ३२ ॥

यथा ऽन्तःकरणाऽभावे स्फीताऽऽलोकमध्यवर्तिनः चक्षुरादेरुपलम्भस्य सन्निकृष्टस्य घटादेर्नित्यं सदोपलम्भस्य प्रसङ्गः स्यात्। अथैतावता नोपलम्भप्रसङ्गः स्यात्। नित्यमुपलब्धिश्चाऽनुपलब्धिश्च नित्योपलब्ध्यनुपलब्धी तयोः प्रसङ्गो न पुनः कदा चिदुपलम्भः। अथ वा ऽयमप्यस्तु तर्ह्यन्यतरनियमः। अन्यतरस्यात्मनो ऽविक्रियस्य दृक्छक्तेरिन्द्रियस्य वा पूर्वोत्तरक्षणे समानरूपस्य नियमनं नियमः प्रतिबन्धः कल्पेत, नैतत् त्रयमपि युक्तम्। वाशब्दः प्रत्यक्षस्याऽनुपलम्भप्रौढ्यर्थः ॥ ३२ ॥

पूर्वाधिकरणे बुद्ध्युपाधिनिमित्तं विरुद्धधर्मत्वमित्युक्तम्। तर्ह्युपाधेरेव कर्तृत्वमित्याक्षिप्य समाधत्ते—

कर्ता शास्त्रार्थवत्त्वात् ॥ ३३ ॥

अयं जीवः कर्ता। कुतः ? 'यजती'त्यादिशास्त्रस्यार्थः प्रयोजनं यस्यास्ति स शास्त्रार्थवान् तस्य भावस्तत्त्वं तस्मात् ॥ ३३ ॥

न च प्रयोजनाऽभावेन तर्कमात्रं साधकमित्यत आह—

विहारोपदेशात् ॥ ३४ ॥

विहरणं विहारः क्रिया तस्याः 'स ईयत'इत्यादिनोपदेशात् ॥३४॥

अथापि नोपनिषत्सु कर्तृत्वेन तर्क इत्यत आह—

उपादानात् ॥ ३५ ॥

'विज्ञानेन विज्ञानमादाये'त्यादिना प्राणानामुपादानात् स्वीकारात्। तर्कात्कर्तृत्वमस्य ॥ ३५ ॥

एतस्याः क्रियाया उपचारादपि कर्तृत्वं स्यादित्यत आह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॥ ३६ ॥

क्रियायां लौकिक्याञ्च 'विज्ञानं यज्ञं तनुते' 'कर्माणि तनुतेऽपि चे'त्यनेन कर्तृत्वस्य व्यपदेशाच्चेद्यदि विज्ञानशब्देन कर्ता नाऽभिमतः किन्तु करणं बुद्धिः तदा निर्देशस्य विज्ञानमित्यस्य विज्ञानेनेति विपर्ययः, स्यात् ॥ ३६ ॥

कर्तृत्वं नाम स्वातन्त्र्यम्, तथा च कथमयं बुद्धिमान् स्वस्याऽनिष्टं कुर्या ? दित्यत आह—

उपलब्धिवदनियमः ॥ ३७ ॥

यथोपलब्धि स्वतन्त्रो ऽप्यनिष्टं करोति तद्वदत एव नाऽयमपि नियमः स्वतन्त्रो नाऽनिष्टं करोतीति ॥ ३७ ॥

'विज्ञानं यज्ञं तनुत'इति विज्ञानस्यैव कर्तृत्वं वेदः श्रावयति, सांख्याश्च तथैव विज्ञानशब्दवाच्यायाः केवलाया बुद्धेः कर्तृत्वमङ्गीकुर्वन्ति, तस्याः सर्वार्थकारित्वात् शास्त्रार्थवत्त्वादिकं सर्वं पुरुषचरितं कर्तृत्वमापादयतीत्यत आह—

शक्तिविपर्ययात् ॥ ३८ ॥

बुद्धेः कर्तृत्वे वर्णितन्यायेन कारणान्तराऽपेक्षया ऽवश्यम्भावेन करणशक्तेर्बुद्धेः कर्तृत्वशक्तिरिति शक्तिविपर्ययो दोषः । तस्मान्न बुद्धिः कर्त्री ॥ ३८ ॥

नायं शक्तिविपर्ययो दोषः पुरुषस्याऽसङ्गोदासीनत्वाद् बुद्धेरेव बन्धमोक्षावित्यत आह—

समाध्यभावाच्च ॥ ३९ ॥

समाधे'रात्मावारे द्रष्टव्य' इत्यादिनोक्तस्य पुरुषे ऽविद्याकृतस्यापि कर्तृत्वस्याऽभावो वैयर्थ्यं तस्मात् । वाशब्दादनुभवाविरोधादिकं समुच्चिनोति ॥ ३९ ॥

पूर्वाधिकरणे शास्त्रार्थवत्त्वेन कर्तृत्वमुक्तम्, इदानीं न तन्मिथ्या, किन्तु तत्स्वरूपमित्याक्षिप्य समाधत्ते—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा च तक्षोभयथा ॥ ४० ॥

तक्षा सूत्रधारो वास्यादिव्यापारे हस्तादिकरणाक्षेपकर्ता यद्यपि वास्यादिपरित्यागे हस्तादिमानपि तद्व्यापारस्याऽकर्ता यथा एवमात्मापि बहिःकरणाक्षेपकर्ता तदभावे स्वरूपचैतन्येनाऽकर्तेत्युभयथा भवति । चस्त्वर्थं एतावत्यंशे निदर्शनेत्यवधारणार्थः ॥ ४० ॥

पूर्वाधिकरणे कर्तृत्वं मिथ्याभूतमित्युक्तं, तस्मिंस्तस्य स्वातन्त्र्यान्न तन्मिथ्येत्याक्षिप्य समाधत्ते—

परात्तु तच्छ्रुतेः ॥ ४१ ॥

तुशब्द ईश्वराऽनपेक्षां वारयति । परात् परस्मात् कर्तृत्वमुक्तं जीवस्य । कुतः ? तच्छ्रुतेः । तस्य सापेक्षत्वस्य 'एष ह्येव साधु कर्म कारयती'ति तच्छ्रुतेः ॥ ४१ ॥

एवं चेदीश्वरः कारयति विषमो निर्घृणश्च स्यादित्यत आह—

कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धाऽवैयर्थ्यादिभ्यः ॥ ४२ ॥

तुशब्दो वैषम्यनैर्घृण्यवारणार्थः । तन्निवारणं कुतः? इत्यत आह—कृतप्रयत्नापेक्षः कृतो जन्मान्तरे प्रयत्नस्तस्याऽपेक्षा यस्य सोयं कृतप्रयत्नापेक्षः । तदेव कुत ? इत्यत आह–विहितप्रतिषिद्धाऽवैयर्थ्यादिभ्यः । विहितं 'यावज्जीवमग्निहोत्रं जुहोती'त्यादि, प्रतिषिद्धश्च 'न सुरां पिबे'दित्यादि, तयोरवैयर्थ्यम् । आदिशब्देन पुरुषकारादीनामपि । तेभ्यः ॥ ४२ ॥

पूर्वाधिकरणे ईश्वराऽकर्तृत्वमुक्तम्, इदानीमीश्वरो जीवशाऽभेदादिना दुर्भण इति स एव नास्तीत्याक्षिप्याऽतदेशस्य जीवस्य सत्त्वेनांशिनमीश्वरं साधयति—

अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयतएके ॥ ४३ ॥

जीवो ब्रह्मणोंश इवांशः । कुतः ? नाना 'द्रष्टव्य' इत्यादिनोक्तो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्रष्टव्यत्वादिभेदः तस्य व्यपदेशस्तस्मात्। ननु चायं नानाव्यपदेशः सुतरां स्वामिभृत्यसारूप्ये युज्यत?इत्यत आह–अन्यथा चापीति। अन्यथापि व्यपदेशो भवति प्रकृतादन्यथात्वं नानात्वं तस्य 'तत्त्वमसी'त्यादिना एके आथर्वणिका 'ब्रह्मदाशा' इत्युपक्रम्य 'ब्रह्मेमे कितवा'इत्यधीयते। चकारः पक्षान्तरे ऽनुपपत्तिसमुच्चयार्थः ॥ ४३ ॥

अन्यत्र मन्त्राद्यभावादिदमध्ययनमतात्पर्यवदित्यत आह—

मन्त्रवर्णात् ॥ ४४ ॥

'एतावानस्य महिमे'त्यस्मात् ॥ ४४ ॥

अस्य मन्त्रार्थः क्व चित् स्मृतौ न प्रतीयते ऽतोयमुपेक्षणीय इत्यत आह—

अपि च स्मर्यते ॥ ४५ ॥

गीतासु च 'ममैवांश' इत्यादिना स्मर्यते। अपिशब्दो मन्त्रार्थाऽस्मरणमप्रयोजकमपीत्याह ॥ ४५ ॥

यदि जीवपरमात्मनोरंशांशिभावः तर्हि जीवो दुःखीत्यादिना परमात्मनोपि दुःखित्वं स्यादित्यत आह—

प्रकाशादिवन्नैवं परः ॥ ४६ ॥

यथा जीवो दुःखित्वादिगुणः नैवम्परः परमात्मा। किंवत्तद्गुणाऽभाव ? इत्यत आह—प्रकाशादिवत्। यथा सौरादिप्रकाशो ऽङ्गुल्यादिप्रदेशे एव ऋजुवक्रादिमान्। आदिशब्देन घटादिप्रदेशे आकाशं धूमादिमान् न पुनः प्रकाशदेशे आकाशदेशे वा तद्वत् ॥४६॥

न युक्तिमात्रेण श्रद्धातुं शक्यमित्यत आह—

स्मरन्ति च ॥ ४७ ॥

'तत्र यः परमात्मा हि स नित्यो निर्गुणः स्मृत' इत्युपक्रम्य 'क आत्मा त्वंपरो योऽसा'वित्यादिना च शब्दात्समामनन्ति तद्वत् 'द्वा सुपर्णे'त्यादिना ॥ ४७ ॥

मा भूत् दुःखित्वादि परमात्मन,स्तथापि जीवस्यापि परमात्मत्वान्न विधिप्रतिषेध इत्यत आह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुज्ञापरिहारौ देहसम्बन्धात् ज्योतिरादिवत् ॥ ४८ ॥

अनुज्ञा 'ऋतौ भार्यामुपेया'दित्यादिका। 'सुरां न पिबे'दिति परिहारः । देहस्य सम्बन्धो देहसम्बन्धः अहं मनुष्य इत्याद्यभिमानस्तस्मात्। स्वभावेन यो यस्य न धर्मः सो ऽन्यसम्बन्धाद्भवतीत्यत आह-ज्योतिरादिवत् । यथा ज्योतिरादि स्वभावतः प्रशस्तं सूर्यादिगतमप्रशस्तम् । आदिशब्देन भूमिर्वैदूर्यादिरूपा प्रशस्ता, प्रेतशरीरादिरूपा ऽप्रशस्ता । एवं परमात्मा ऽप्युपाधिविशेषसम्बन्धाद्विधिप्रतिषेधभागपि न भवतीत्यर्थः ॥ ४८ ॥

तथापि स्वामिन एकत्वात् फलस्य दुःखादेः सर्वशरीरेष्वेकत्वं स्यादित्यत आह—

असन्ततेश्चाऽव्यतिकरः ॥ ४९ ॥

न सन्ततिरसन्ततिः, अन्तःकरणोपाधिकस्य कर्तुर्भोक्तुरनेकत्वात् न सुखदुःखादेः सर्वशरीरेषु व्यतिकरः । चकारो घटाऽऽकाशादिनिदर्शनं समुच्चिनोति ॥ ४६ ॥

एवं च द्वैतापत्तिरित्यत आह—

आभास एव च ॥ ५० ॥

जलसूर्यकादिवदाभास एवाऽयं जीवो न वस्त्वन्तरं परमात्मनः। चकारस्तस्याऽसत्त्वमपि वारयति ॥ ५० ॥

एवं कल्पनातो बहव आत्मानः सर्वगताः सन्ति, तेषु च सुखदुःखादिनियमो ऽदृष्टवशादित्यत आह—

अदृष्टाऽनियमात् । ५१ ॥

बहूनामात्मनां मनःसंयोगे साधारणे सति अस्यैवाऽदृष्टमित्यस्याऽदृष्टस्य न नियमस्तस्मात् ॥ ५१ ॥

बह्वात्मस्वीकारो न साधु,स्तत्र ज्ञानेच्छादीनां नियामकत्वमित्यत आह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभिसन्ध्यादिष्वपि चैवम् ॥ ५२ ॥

अभिसंधिरभिप्रायो ज्ञानम् । आदिशब्देन इच्छादयस्तेष्वप्येवमनियमो यथाऽदृष्टस्यै । चकारोऽस्याः कल्पनायाः श्रुतिविरोधं समुच्चिनोति ॥ ५२ ॥

प्रदेशादिति चेन्नाऽन्तर्भावात् ॥ ५३ ॥

सर्वगतानामपि सर्वेषामात्मनां तत्तद्देहस्य प्रदेशात् परिच्छेदात् ज्ञानादीनामुत्पाद इति चेन्न । कुतः ? सर्वेषामप्येकस्मिन्देहेऽन्तर्भावात् ॥ ५३ ॥

इति ब्रह्मसूत्रदीपिकायां द्वितीयाध्यायस्य तृतीयः पादः ॥३॥

—०*०—

तृतीये पादे भूतश्रुतीनां भोक्तृश्रुतीनां च परस्परविरोधाऽपाकरणेन तत्कृतविरोधं समन्वये वारयति चतुर्थेन पादेन, तत्रापि भोगोपकरणानां भौतिकानां प्राधान्यात् प्रथमं प्राणोत्पत्तिमाह—

तथा प्राणाः ॥ १ ॥

पूर्वपादाधिकरणे यथाऽऽकाश उत्पन्नः परस्मादित्युक्तं, तथा प्राणा अपि उत्पद्यन्ते । अथ वा यथा लोकादयः परस्मादुत्पन्नाः श्रूयन्ते तथा ॥ १ ॥

'प्राणा ऋषयो वाव तदग्रे सदासी'दित्यनया श्रुत्या प्राणानामनुत्पत्तेस्तदुत्पत्तिर्गौणी स्यादित्यत आह—

गौण्यसम्भवात् ॥ २ ॥

गौण्या असम्भवो गौण्यसम्भवस्तस्मात् । प्रतिज्ञाहान्यादयः प्रागुक्ता एव हेतवः ॥ २ ॥

तथापि जनैरुपचारानिवारणं किमुत ?मित्यत आह—

तत्प्राक्श्रुतेश्च ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेभ्य आकाशादिभ्यः प्राक् पूर्वं जायतइतीदं यथा तेषु नोपचरितं तथा प्राणेष्वपीत्यर्थः ॥ ३ ॥

तत्पूर्वकत्वाद्वाचः ॥ ४ ॥

ब्रह्मप्रकृतिकं यत् तेजः तत्पूर्वकत्वात् कारणात् वाचो वागाख्येन्द्रियप्राणस्याऽतो ऽर्थात् तत्रापि श्रवणमित्यर्थः ॥ ४ ॥

पूर्वाधिकरणे श्रुतिप्रामाण्यात् प्रणोत्पत्तिर्वर्णिता, तद्वत् 'सप्त वै शीर्षण्याः प्राणा' इत्यस्याः प्रामाण्यात्सप्तैव प्राणा इत्याक्षिपति । अथ वा न्यायाऽनुसारात् प्राणानामुत्पत्तिरुक्ता, अत्रापि 'प्राणमुत्क्रामन्तं सर्वा'इति लाघवन्यायात् सप्त प्राणा इत्याक्षिपति—

सप्तगतेर्विशेषितत्वाच्च ॥ ५ ॥

सप्तसंख्यानामवगतिः 'सप्त प्राणाः प्रभवन्ती'त्यस्मात् । सामान्यवचनमिदं विशेषादधिका भविष्यन्तीत्यत आह—विशेषितत्वादपि । 'तेषां सप्त वै शीर्षण्या' इत्यनेन ॥ ५ ॥

हस्तादयस्तु स्थिते ऽतो नैवम् ॥६॥

तुशब्दः सप्तभ्यो व्यतिरेकमाह । स एव कुत ? इत्यत आह—हस्तादयः हस्त आदिर्येषां ते त्वगादयो हस्तादयः 'हस्तौ वै ग्रह' इत्यादिनोक्ताः । स्थितः सप्तभ्यो व्यतिरेकः । अतो ऽस्माद्व्यतिरेकात् नैवं सप्तैवेति किं त्वेकादश । कुतः ? 'दशेमे पुरुषे प्राणा' इत्यादिश्रुतेः । अथ वा सप्तैव प्राणा अवगम्यन्ते 'तमुत्क्रामन्त'मित्यादिवचनात् ॥ ६ ॥

ननु सर्वशब्दश्रवणे कथं सप्तैवे?त्यत आह—

विशेषितत्वाच्च ॥ ७ ॥

मनोविज्ञानयोरेककोट्या चक्षुरादीनां विशेषितत्वात्सर्वशब्दः सप्तविषयः । चकारो 'नियतानियतिर्य'इति न्यायसूचनार्थः । द्वितीयसूत्रे न कोपि विशेषः पूर्वस्माद्व्याख्यानात् ॥ ७ ॥

पूर्वाधिकरणे एकादशेन्द्रियाणि उत्क्रामन्तीत्युक्तं, तदयुक्तं व्यापित्वादिन्द्रियाणामित्याक्षिप्य समाधत्ते—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अणवश्च ॥ ८ ॥

प्राणा इत्यनुवर्तते । अणवो ऽप्यसर्वगतपरिमाणाः प्राणा इत्यर्थः ॥ ८ ॥

पूर्वाधिकरणे उत्क्रान्त्यादिवशात् प्राणानामणुत्वमङ्गीकृतं, तद्वदिदानीमुत्पत्तेः प्राक् प्राणचेष्टाश्रवणात् मुख्यप्राणस्य नोत्पत्तिरिति दृष्टान्तेनाक्षिप्य पादाद्याधिकरणप्रायातिदेशेनोत्पत्तिमाह—

श्रेष्ठश्च ॥ ९ ॥

श्रेष्ठो मुख्यः प्राणः सोऽपि जायते । कुतः? 'एतस्माज्जायते प्राण' इति श्रुतेः ॥ ९ ॥

पूर्वाधिकरणे मुख्ये प्राणस्य पृथगुत्पत्तिर्वायोरिन्द्रियेभ्यश्चोक्ता, सा ऽयुक्ता, मुख्यप्राणस्य वायुस्वरूपत्वादिन्द्रियत्वाद्वेत्याक्षिप्य समाधत्ते—

न वायुक्रिये पृथगुपदेशात् ॥ १० ॥

मुख्यप्राणे न वायुः प्रसिद्धः, न च करणानां वृत्तिः, क्रिया च वायुश्च वायुक्रिये कुतस्ताभ्यां पृथगुपदेशः?'स वायुना ज्योतिषे'ति वायोरिन्द्रियेभ्यः । 'अथ ह एवायं मुख्यः प्राण' इत्यादिना तस्मात् । एवं चेज्जीवः ॥ १० ॥

चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ॥ ११ ॥

तुशब्दः प्राणस्य स्वातन्त्र्यवारणार्थः । चक्षुरादिवत् । चक्षुरादीनां यथा न स्वातन्त्र्यं तद्वत्प्राणस्य । कुतः? तत्सहशिष्ट्यादिभ्यः । तैरिन्द्रियैः सहशिष्टिः शासनमुपदेशः प्राणसंवादादौ । आदिशब्देन संहतत्वाऽचेतनत्वादयस्तेभ्यः ॥ ११ ॥

स्यादेतत्—यथा ऽन्येषां प्राणानां रूपादयो विषयास्तथा ऽस्यापि कश्चन स्यादित्यत आह—

अकरणत्वाच्च न दोषस्तथा हि दर्शयति ॥ १२ ॥

प्राणस्य विषयान्तराऽसत्त्वं न दोषः । कुतः? अकरणत्वात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करणस्यैवाऽयं दोषः, न त्वकरणस्य । चकारो देहधारणं प्रयोजनं समुच्चिनोति । कथमेत?दित्यत आह—तथा । हि दर्शयति । हि यस्माद्यथाऽस्माभिरुक्तस्तथा 'ऽहमेवैतत् पञ्चधाऽऽत्मानं प्रविभाज्ये'त्यादि-श्रुतिगणो देहधारणं दर्शयति । चकारो यदस्ति!तस्य विषयकल्पना भवतीति नियमाऽभावदर्शनार्थः ॥ १२ ॥

देहधारणकार्यं जीवस्य प्राणस्य वेति संदेहादन्यस्य प्राणकार्यस्याऽदर्शनात् निरर्थकः प्राण इत्यत आह—

पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥ १२ ॥

पञ्च वृत्तयो यस्य स तथा । किंवत् पञ्चवृत्ति?रित्यत आह-मनोवत् । यथा मनः प्रमाणविपर्ययविकल्पनिद्रास्मृतिभिः पञ्चवृत्ति तद्वत् । तर्हि योगानामिव तर्कमूलमिदमित्यत आह—व्यपदिश्यते श्रुत्या 'प्राणोऽपानो व्यान उदानः समान' इति ॥ १३ ॥

पूर्वाधिकरणे वायुक्रियाभ्यां तत्त्वान्तरं प्राण इत्युक्तम्, अस्तु तत्त्वान्तरं, तथापि तस्य जीवमनूत्क्रामस्याऽसम्भवो व्यापित्वादित्याक्षिप्य समाधत्ते—

अणुश्च ॥ १४ ॥

मुख्यप्राणोऽप्यसर्वगतपरिणामोऽपि पूर्वप्राणवत् ॥ १४ ॥

पूर्वाधिकरणेष्विन्द्रियाणामुत्पत्त्यादिकं वर्णितं, तेषां चाऽग्न्याद्यधिष्ठितत्वं श्रुतमनुपपन्नं, समनन्तराऽधिकरणे प्राणसमत्ववदिति दृष्टान्तेनाऽऽक्षिप्य समाधत्ते—

ज्योतिराद्यधिष्ठानं तु तदामननात् ॥ १५ ॥

तुशब्दः प्राणस्याऽधिष्ठानत्वं वारयति । ज्योतिरादिर्यस्याऽऽदित्यादेस्तदिदं ज्योतिरादि । ज्योतिरादेरधिष्ठानं ज्योतिराद्यधिष्ठानं वागादि । तस्य ज्योतिराद्यधिष्ठानस्य वागादे'रग्निर्वाग् भूत्वे'त्यादिना ऽऽमननात् ॥ १५ ॥

एवं चेद्देवानामेव सुखादिभागः स्यादित्यत आह—

प्राणवता शब्दात् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राणवता जीवेन वागादीनां सम्बन्धो भोक्तृतत्साधनत्वलक्षणः। कुतः? शब्दात् वैदिकात्। 'अथ यत्रैतदाकाशमनु निषण्णं चक्षु'रित्यादेः ॥ १६ ॥

यथा शरीरेण सम्बन्धः तथा ऽधिष्ठातृत्वलक्षणस्वाभिरपीत्यत आह—

तस्य च नित्यत्वात् ॥ १७ ॥

तस्य शरीरस्य नित्यत्वात्। अस्मिन् शरीरएव भोक्तृत्वात् न देवतात्मनां ऽग्नीन्द्रादिशरीरभोगस्य सत्त्वात्तासाम्। चकारो ऽनेकदुःखसंभिन्नस्याऽस्य भोगस्य देवताभिन्नभोग्यत्वं समुच्चिनोति॥१७॥

पूर्वाधिकरणे ज्योतिराद्यधिष्ठितानीन्द्रियाणीत्युक्त,मिदानीं प्राणव्यापारव्यतिरिक्तानीन्द्रियाण्येव न सन्तीत्याक्षिप्याह। अथ वा प्राणेन्द्रियस्याऽक्षत्वाधिष्ठानाऽभाववदन्यत्राप्यभावः स्यादित्याक्षिप्य प्राणस्याऽनिन्द्रियत्वमाह—

तइन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्॥१८॥

ते प्रकृताः प्राणाः श्रेष्ठादन्यत्र मुख्यप्राणं विहायेन्द्रियाणि न तु मुख्यस्य प्राणस्य रूपाणि। कुतः? तस्मात् प्राणात्तु भेदेनेन्द्रियाणां व्यपदेशात्। 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चे'त्यनेन॥१८॥

अस्तु तेषां प्राणाद् भेदः, न तु प्राणस्तेभ्यो भिन्न इत्यत आह—

भेदश्रुतेः ॥ १९ ॥

'अथ हेममासन्यं प्राणमूचु'रित्यादिना प्राणस्य तेभ्यो भेदश्रुतेः ॥ १९ ॥

भेदश्रुतिरियं वाक्चक्षुषोरिव भविष्यतीत्यत आह—

वैलक्षण्याच्च ॥ २० ॥

सुषुप्तौ सर्वेन्द्रियाणां प्रविलयो न, 'प्राणाऽग्नय एवैतस्मिन् जाग्रती'ति श्रुतेः। प्रत्यक्षतश्चेन्द्रियेभ्यः प्राणस्य वैलक्षण्यात्। चकारो वाक्चक्षुषोरपि कर्मेन्द्रियज्ञानेन्द्रियकृतभेदसमुच्चयार्थः ॥ २० ॥

पूर्वाधिकरणे प्राण इन्द्रियाणीति पृथङ् निर्देशात् तस्य च तेषां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च तत्त्वान्तरत्वमुक्तं, तत्र 'जीवेने'ति श्रवणाद् नामरूपयोरुत्पादनं जीवेन क्रियते इति दृष्टान्तेनाक्षिप्य समाधत्ते—

संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ २१ ॥

तुशब्दो जीवकर्तृत्वं वारयति । संज्ञा आदित्यादिरूपा, मूर्तिः सिताऽसितरूपा, संज्ञामूर्त्योः क्लृप्तिः कल्पनं नामरूपव्याक्रिये त्रिवृत्कुर्वतः परमेश्वरस्य । कुतः ? व्याकरवाणीत्युत्तमपुरुषोपदेशात्॥२१॥

अस्तु बहिस्त्रिवृत्करणं यथा कथंचित्, अन्तस्त्रिवृत्करणं दुर्लभमित्यत आह—

मांसादिभौमं यथाशब्दमितरयोश्च ॥ २२॥

पुरीषादीति वक्तव्ये तस्य शरीराद्बहिष्ठस्य प्रदर्शनं यतस्तदर्थमाह—मांसादीति । मांसमादिर्यस्य मनःपुरीषस्य तदिदं मांसादिभौमं भूमेर्विकारः यथाशब्दं शब्दमनतिक्रम्याऽस्य कार्यस्याऽभिधानात् । 'तस्य यः स्थविष्ठो धातु'रित्यादिना । इतरयोश्चाऽप्तेजसोरपि मूत्रलोहितप्राणाऽस्थिमज्जावाचः कार्याणि अत आन्तराणि ॥२२॥

त्रिवृत्करणञ्चेत्सर्वस्त्रिवृत्कृतः कथं भूमिरियमित्यादिव्यपदेशः? इत्यत आह—

वैशेष्यात्तु तद्वादस्तद्वादः ॥ २३ ॥

तुशब्दो भूम्यादिव्यपदेशाऽभावनिवारणार्थः । तद्वादस्तस्य भूम्यादेर्वादो व्यपदेशो नाऽनुपपन्नः । कुतः ? वैशेष्यात् विशेषस्य भावो वैशेष्यं भूम्याद्यधिकं तस्मात् । तद्वाद इत्यभ्यासोऽध्यायपरिसमाप्तिं द्योतयति । वियत्पादे प्राणपादे च प्रथमं वियदाद्युत्पत्तिवादिन्यः श्रुतयो न सन्तीति विरोधाऽभावात् पूर्वपक्षाऽभाव इति पूर्वपक्षाक्षेपः । अन्यत्र तच्छ्रुतीनां सत्त्वात् श्रुत्योर्विरोधात् प्रत्यधिकरणमुभयोरप्रामाण्यमिति पूर्वपक्षः । सिद्धान्तैकदेशिना तदप्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माण्यनिराकरणं यत इति ग्रस्तः पूर्वपक्षः। सिद्धान्तैकदेशिना निराकरणेन प्रकारान्तरेणाऽप्रामाण्यनिराकरणमिति सिद्धान्ते ॥ २३ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याऽऽनन्दात्मपूज्यपादशिष्यस्य श्रीशङ्करानन्दभगवतः कृतौ ब्रह्मसूत्रदीपिकायां द्वितीयाऽध्यायस्य चतुर्थः पादः। संपूर्णश्च द्वितीयो ऽध्यायः

——०*०——

पूर्वस्मिन्नध्याये ऽविरोधो ब्रह्मणि समन्वितानां वेदान्तानामुक्तः, इदानीं तत्प्राप्तिसाधनं ब्रह्मज्ञानं सोपायमिह चिन्त्यते। तत्रापि प्रथमपादे पञ्चाग्निविद्यामाश्रित्य संसरणं चिन्त्यते वैराग्यार्थम्।

तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥ १ ॥

पूर्वशरीराच्छरीरान्तरं तस्य प्रतिपत्तौ प्राप्तौ भूतसूक्ष्मैः परिष्वक्तो रंहति। कुतः? प्रश्ननिरूपणाभ्याम्। 'यथा वेत्थ' 'पञ्चम्यामाहुतावाप' इत्याभ्याम् ॥ १ ॥

उदाहृते प्रश्ननिरूपणे ऽद्भिर्वेष्टितत्वं गमयतः, न तु तदन्यैर्भूतसूक्ष्मैः परिवेष्टितत्वं गमयत इत्यत आह—

त्र्यात्मकत्वात्तु भूयस्त्वात् ॥ २ ॥

तुशब्दश्चोदितशङ्कानिवृत्त्यर्थः। नाऽयं दोषः। त्र्यात्मकत्वात् तेजोऽबन्नात्मकत्वात्। अपां तदात्मकत्वे कुतो ऽपां व्यपदेश? इत्यत आह—भूयस्त्वात्। तासामपां सायंप्रातराहुतिमारभ्य यावद्गर्भं भूयस्त्वात् ॥ २ ॥

नन्वाहुतिद्वारा ऽदृष्टेन सम्परिष्वक्तो गच्छतीति गम्यते, न तु भूतसूक्ष्मैरित्यत आह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राणगतेश्च ॥ ३ ॥

प्राणानां गतिः प्राणगतिः 'तमुत्क्रामन्त'मित्यादिनोक्ता। तस्याः प्राणानां भूतसूक्ष्माऽऽश्रयाणामवगतिरित्यर्थः। चकारः 'स एतास्तेजोमात्रा' इत्यादिश्रुतिं प्रमाणत्वेन समुच्चिनोति ॥ ३ ॥

अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥४॥

'अग्निं वागप्येती'त्यग्निगतिः। आदिशब्देन 'वातं प्राणा' इत्यादिः। तस्या न प्राणानामाश्रयत्वेन भूतसूक्ष्मत्वमिति चेत तन्न। प्राणानां जीवेन सह गमनात् तत्र भाक्तत्वात् प्राणानामग्न्यादिगतिश्रुतिर्भाक्ता उपचरिता 'ओषधीर्लोमानी'तिवत्। तस्या भावो भाक्तत्वं तस्मात् ॥ ४ ॥

प्रथमे ऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥ ५ ॥

प्रथमे 'ऽग्नौ श्रद्धां जुह्वती'त्यस्मिन्नपामश्रवणान्नापां सर्वत्रांऽनुवृत्तिरिति चेत्तन्न। ता एव आप एव हि यस्मादुपपत्तेः अपां कारणानां कार्यस्य शुद्ध्याख्यस्य सद्भावः। आप इति श्रुतेरपि ॥ ५ ॥

अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥ ६ ॥

प्रश्ननिरूपणाभ्यां जीवानामश्रुतत्वादप्यधिष्ठितानां ग्रहणमयुक्तमिति चेन्न। कुतः? इष्टादिकारिणाम् 'अथ यइमे' इत्यादिना दक्षिणमार्गेण चन्द्रं यियासतां प्रतीतेः ॥ ७ ॥

'तद्देवानामन्नं यद्देवा भक्षयन्ती'ति श्रुतेश्चन्द्रप्राप्तिर्न पुरुषार्थ इत्यत आह—

भाक्तं वाऽनात्मवित्त्वात्तथा हि दर्शयति ॥७॥

तेषां देवानामन्नत्वं भाक्तमुपचरितम्। कुतः? अनात्मवित्त्वात् तेषाम्। यथा ऽस्माभिस्तेषामन्नत्वं भोग्यत्वेनोक्तं तथा श्रुतिर्दर्शयति 'अथ यो ऽन्या'मित्यादिना ॥ ७ ॥

१०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वाधिकरणे ऽवरोहेऽपि परिवेष्टितस्य 'पञ्चम्यामाहुतावाप'इत्युपलम्भादारोहेऽपि कर्मसमवायिनीभिरद्भिः परिवेष्टितो गच्छतीत्युक्तम्, इदानीमवरोहे कर्माऽभावादपामप्यभाव इत्याक्षिप्य समाधत्ते—

कृताऽत्यये ऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च ॥ ८ ॥

कृतस्य पुण्यस्याऽत्यये विनाशे ऽनुशयवान् कर्माऽनुशयवान् तत्राऽऽगच्छति। दृष्टा जातमात्रस्य सुखाद्यवाप्तिः। अथ वा 'तद्य इह रमणीयचरणा' इत्याद्या श्रुतिः, स्मृतिरपि 'तच्छेषेण विशिष्ट'मित्याद्या, ताभ्यां यथेतं यथागतम् अनेवं च तद्विपर्ययेणापि आकाशादिरूपेण प्रकारान्तरेणापि ॥ ८ ॥

चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः ॥ ९ ॥

'तद्य इह रमणीयचरणा' इत्यत्र चरणादागमनं नाऽनुशयादिति चेन्न। यतो ऽनुशयोपलक्षणार्था चरणश्रुतिरिति कार्ष्णाजिनिराचार्यो मन्यते ॥ ९ ॥

आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥ १० ॥

तस्य चरणशब्दस्य श्रौतशीलार्थपरित्यागेन लाक्षणिकाऽनुशयस्वीकारे शीलस्याऽऽनर्थक्यं प्रयोजनशून्यतैव स्यादिति चेत्। न। तदपेक्षत्वात्। तस्य शीलस्याऽपेक्षा यस्य कर्मण 'आचारहीन'मित्यादिस्मृतेः तदपेक्षं तस्य भावस्तत्त्वं तस्मात् ॥ १० ॥

सुकृतदुष्कृते एवेति तु बादरिः ॥ ११ ॥

बादरिराचार्यश्चरणशब्देन सुकृतदुष्कृते एवाऽभिधीयेते इति मन्यते। तुशब्दो लक्षणव्यावृत्त्यर्थः ॥ ११ ॥

पूर्वाधिकरणे यावच्छ्रुतेरारब्धफलविषयत्वेन सङ्कोचः कृतस्ततोऽन्येन कर्मणा वर्तते इत्युक्त,मत्र तु चन्द्रमसमेव ते गच्छन्तीति सर्वश्रुतेस्तद्वन्न सङ्कोच इति प्रत्युदाहरणेनाक्षिपति—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनिष्टादिकारिणामपि च श्रुतम् ॥१२॥

इष्टापूर्त्तादिव्यतिरिक्तं कुर्वन्तीत्यनिष्टादिकारिणो ये तेषामप्यविशेषेण 'ये के चे'त्युपक्रम्य 'चन्द्रमसमेव ते सर्वे गच्छन्ती'ति श्रुतं यतो ऽतश्चन्द्रगमनम् । चकारो यौक्तिकत्वप्रदर्शनार्थः ॥ १२ ॥

सङ्गमने त्वनुभूयेतरेषामारोहाऽवरोहौ तद्गतिदर्शनात् ॥ १३ ॥

तुशब्दो ऽनिष्टादिकारिणां चन्द्रगतिं व्यावर्तयति । संयमने याम्ये पुरे इतरेषामनिष्टादिकारिणां दुःखाऽनुभवार्थमारोहो दुःखमनुभूयाऽवरोहः । तावेवाऽऽरोहाऽवरोहौ । कुतः? तद्गतिदर्शनात् । तद्याम्यं पुरं प्रति या गतिस्तस्याः 'पुनः पुनर्वशमापद्यते मे' 'वैवस्वतं संगमनं जनाना'मित्याभ्यां दर्शनम् ॥ १३ ॥

सुपुरुषवचनविश्वासिनां नैतावता प्रत्यय इत्यत आह—

स्मरन्ति च ॥ १४ ॥

स्मरन्ति च व्यासादयः संयमने गमनं तेषाम् । चकारः प्रसिद्धिसमुच्चयार्थः ॥ १४ ॥

तथापि लोकपालपुरे कथं दुःखित्व?मित्यत आह—

अपि सप्त ॥ १५ ॥

नरका महारौरवप्रभृतयः स्मर्यन्ते पौराणिकैः ॥ १५ ॥

ननु न यमायत्तास्ते, तेषु चित्रगुप्तादीनां स्मरणादित्यत आह—

तत्रापि च तद्व्यापारादविरोधः ॥ १६ ॥

तत्रापि तेष्वपि महारौरवादिषु तद्व्यापारात् तस्य यमस्य व्यापारः समाज्ञा तस्माद्यमायत्तत्वस्य चित्रगुप्तादीनामप्यविरोधः । चकारः शङ्कायां मतिमन्दत्वसूचनार्थः ॥ १६ ॥

ननु मार्गद्वयस्य प्रकृतत्वादन्यतरेण तैरपि गन्तव्यमित्यत आह—

विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'एतयोः पथोरि'ति विद्याकर्मणोर्ग्रहणमिति यस्मात्तयोः 'तद्य इत्थं विदु'रिति विद्या 'इष्टापूर्ते दत्त'मिति कर्म । प्रकृतत्वात् । तेषां च तयोरभावादतो नाऽन्यतरेण गमनम् । तुशब्दो 'जायस्व म्रियस्वे'-त्यनेन तृतीयं स्थानं दर्शयति ॥ १७ ॥

तथाप्याहुतिपञ्चकपूरणार्थं चन्द्रमसि तेषामपि गमनामित्यत आह—

न तृतीये तथोपलब्धेः ॥ १८ ॥

नाऽयमाहुतिनियमस्तृतीये स्थाने । कुतः? यूकादौ तथोपलब्धेः । आहुतिनियमस्याऽदर्शनात् ॥ १८ ॥

तद्दृष्टान्तेन जीवान्तरेऽपि स नियमो ऽनुमीयते इत्यत आह—

स्मर्यते ऽपि च लोके ॥ १९ ॥

नाऽयं मनुष्येष्वपि नियमः । द्रोणद्रौपद्यादीनां योनिमन्तरेणापि शरीरस्योत्पत्तिदर्शनात् । चकारात्पुराणेष्वपि ॥ १९ ॥

तथापि क्वचिद् दृष्टं भूयोदृष्टान्तेन बाध्यते इत्यत आह—

दर्शनाच्च ॥ २० ॥

स्वेदजोद्भिज्जयोराहुतिपञ्चकमन्तरेणाप्युत्पत्तिदर्शनात् । चकारो नियमभङ्गसमुच्चयार्थः ॥ २० ॥

ननु स्वेदजमेव नास्ति, अण्डजं जरायुजमुद्भिज्जमिति त्रयाणामेव श्रवणादित्यत आह—

तृतीयशब्दाऽवरोधः संशोकजस्य ॥ २१ ॥

तृतीयशब्द उद्भिज्जमित्येतस्मिन्नवरोधः स्वीकारः संशोकजस्य स्वेदजस्य ॥ २१ ॥

पूर्वाधिकरणे स्थानशब्दो मार्गपरत्वेन नीतः तृतीयमिति त्रित्वसंख्यायोगात्, तर्हि इहापि वायुर्भूत्वेत्युत्तरत्र वायुनादात्म्यश्रवणात् आकाशमित्यत्रापि अनुशायिनस्तेन सह तादात्म्यं स्यादिति दृष्टान्तेनाक्षिप्य समाधत्ते—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साभाव्यापत्तिरुपपत्तेः ॥ २२ ॥

तैराकाशादिभिः समानो भावः साभाव्यम् ॥ २२ ॥

पूर्वाधिकरणे आकाशादिसमानरूपतामनुशायिनः प्राप्नुवन्तीत्युक्तं, तर्हि आकाशादेः प्राकृतप्रलयान्तमवस्थानादनुशायिनोऽपि तावदवस्थानमित्याक्षिप्य समाधत्ते—

नाऽतिचिरेण विशेषात् ॥ २३ ॥

आकाशादिसमानरूपताया जीवस्य नाऽतिदीर्घेण कालेन निर्गमनमिति । कुतः ? व्रीह्यादिभावात् । 'अतो वै खलु दुर्निष्प्रपतर'मित्यादिविशेषणात् ॥ २३ ॥

पूर्वाधिकरणे 'ऽतो वै खलु दुर्निष्प्रपतर'मिति तिलमाषादिष्वेव कश्चन विलम्बो नाऽऽकाशादिष्विति उक्तं, तर्हि जायन्तइति विशेषात्तिलमाषादिष्वनुशायिनां जन्म स्यादिति दृष्टान्तेनाक्षिप्य समाधत्ते—

अन्याधिष्ठिते पूर्ववदभिलापात् ॥ २४ ॥

'इह व्रीहियवा' इत्यादावन्येन तिलमाषादिजीवेनाऽधिष्ठितम् अन्याऽधिष्ठितं तस्मिन् । तच्छरीराऽधिष्ठितएवानुशयी पूर्ववद्यथा वाय्वादौ संश्लेषमात्रं तद्वद्व्रीह्यादावपि । कुतः ? तत्रापि सुकृतदुष्कृतादिव्यापारमन्तरेण तद्भावाऽऽपत्तेरभिलापावुक्तत्वात् ॥ २४ ॥

अशुद्धमिति चेन्न शब्दात् ॥ २५ ॥

स्वर्गादवरोहिणः पशुहिंसालक्षणमशुद्धं पापमस्तीति चेन्न । पश्वादेर्हिंसाया वैदिकशब्दादागताया अवगतत्वात् ॥ २५ ॥

अस्तु व्रीह्यादिभावो विना पापमित्यत आह—

रेतःसिग्योगोऽथ ॥ २६ ॥

अथ व्रीह्यादिभावाऽनन्तरं रेतःसिचापि योगो रेतःसिग्योगः । 'व्रीह्यात्मे'त्यादिना बहुत्वात्कण्डनाद्यवसरएव प्रवासितोक्तत्वान्न तेन योग इति भावः ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नन्वस्तु प्रवासो बहुत्वं वा, अथापि कश्चन स्थित्वा तेन योगं यास्यतीत्यत आह—

योनेः शरीरम् ॥ २७ ॥

योनेराधि अनुशायिनां शरीरान्तरं 'तद्यइह रमणीयचरणा इत्यादि' श्रावयति शास्त्रं, तेनेदमवगम्यते तृतीयस्थानिनामेव व्रीह्यादिभावो नाऽनुशायिनाम् ॥ २७ ॥

इति ब्रह्मसूत्रदीपिकायां तृतीयाध्यायस्य प्रथमः पादः ॥

———०*०———

एवं प्रथमेन पादेन कर्मफलस्य यातायातरूपत्वेन वैराग्यं निरूपितम्, इदानीं विरक्तस्य तत्त्वंपदार्थविवेकार्थं द्वितीयः पाद आरभ्यते ।

जागरणाद्यवस्थाया उक्तत्वात् दुर्विवेकत्वाच्च तत्र त्वमर्थस्य स्वप्रकाशत्वस्य स्वप्नाऽवस्थायामेव चांररीकृत्य पूर्वपक्षमाह—

संध्ये सृष्टिराह हि ॥ १ ॥

जागरणसुषुप्तयोः सन्धौ भवं सन्ध्यं स्वप्नस्थानं तस्मिन् रथादीनां सृष्टिः सत्यैव । कुतः ? हि यस्माद् 'न तत्र रथा' इत्युपक्रम्य 'पथः सृजती'त्यन्तेनाह ॥ १ ॥

ननु सृजत इत्याक्षिप्तकर्तृको ऽयं लकारः, अत एव सत्यमित्यत आह—

निर्मातारं चैके पुत्रादयश्च ॥ २ ॥

एके शाखिनो ऽस्मिन्नेव संस्थाने कामानां निर्मातारमात्मानमामनन्ति 'कामं कामं पुरुषो निर्मिमाण' इति । नन्वत एव मनोरथमात्रत्वात् तेषामसत्त्वमित्यत आह—पुत्रादयश्च । कामा इति शेषः । काम्यन्ते इति कामः । यस्मात्पुत्रपौत्रादीनुपक्रम्याऽन्ते कामानामित्याह । आद्यश्चकारः प्राज्ञस्य कर्तुरभावेपि कर्तृमात्रसत्यत्वं समुच्चिनोति । द्वितीयश्चकारो मनोरथानामपि सत्यत्वमाह ॥ २ ॥

इदानीं सिद्धान्तमाह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मायामात्रं तु कार्त्स्न्येनाऽनभिव्यक्तस्वरूपत्वात् ॥ ३ ॥

तुशब्दो रथादीनां सत्यत्वं व्यावर्तयति । कुतः ? तन्मायामात्रं मायैव स्वप्नदृष्टं यतः, तदपि कार्त्स्न्येनाऽनभिव्यक्तस्वरूपत्वात् । देशतः शतयोजनादिना कालतो रात्रिदिनादिना हृदयपुण्डरीके संवत्सरादिरूपेण मुहूर्तमात्रं शयानः सर्वामुपलभते यतः अतो बाधराहित्येनाऽनभिव्यक्तस्वरूपत्वात् अबाधितत्वेनाऽप्रतीयमानत्वादित्यर्थः । मायामात्रत्वात् ॥ ३ ॥

तर्हि न कश्चित् स्वप्ने परमार्थगन्धो ऽपीत्यत आह—

सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ४ ॥

असत्यो ऽपि स्वप्नः सत्यत्वाद्यवाप्तिसूचको भवति । हि यस्मात् श्रुतेः 'यदा कर्मसु काम्येषु स्त्रिय'मित्यादेः 'पुरुषं कृष्णं कृष्णदन्त'मित्यादेश्च स्वप्नात् सत्यार्थस्य श्रुतेर्नायं श्रुत्युक्तो ऽर्थो ऽस्यार्थः । कुतः ? आचक्षते च तद्विदः । तं स्वप्नाध्यायं वदन्तीत्यर्थः । 'आरोहणं गोवृषे'त्यादिना आचक्षते कथयन्ति । आद्यश्चकारः प्रतिबिम्बादीनां निदर्शनत्वसमुच्चयार्थः । द्वितीयश्चकार आच्छादितकुमारीभुजस्फुरणसमुच्चयार्थः ॥ ४ ॥

तथापि परमात्मना क्रियमाणत्वात् स्वप्नसृष्टेराकाशादिवत्सत्यता, न च जीवपरमात्मनोरैक्यम्, अन्यथा जीवस्य नित्यशुद्धबुद्धत्वादिकं स्यादित्यत आह—

पराऽभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥ ५ ॥

न नित्यशुद्धत्वादिकं नास्ति, किं तु तिरोहितम् । तर्हि प्रादुर्भावे नोपाय इत्यत आह—पराऽभिध्यानात् । परस्य परमात्मनो ऽभिध्यानान्निदिध्यासनात् उत्पन्नसाक्षात्कारस्य प्रादुर्भवति । तुशब्द उपायान्तरं वारयति । कुत एतदित्याह—ततो ह्यस्य बन्धविपर्ययौ । हि यस्मात् ततः परमात्मनः सकाशात् अस्य जीवस्य तदज्ञानाद्बन्धः संसारः, विपर्ययो मोक्षः, तज्ज्ञानात् 'ज्ञात्वा देव'मित्यादिश्रुतेः ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ननु जीवश्चेत्परमात्मनो ऽभिन्नांशस्ततो नित्यशुद्धत्वादीनां नोऽतिरोभावो ऽपीत्यत आह—

देहयोगाद्वा सो ऽपि ॥ ६ ॥

वाशब्दो तिरोभावनिराकरणार्थः। जीवेश्वराऽन्यत्वनिवृत्त्यर्थः। सो ऽपि तिरोभावो ऽपि देहयोगादहं मनुष्य इत्याद्यभिमानात् ॥६॥

पूर्वाधिकरणे प्रपञ्चमिथ्यात्वं वर्णयता त्वंपदार्थस्य स्वयंप्रकाशत्वं दर्शितं तत्पदार्थैक्याय,तच्चेत्कस्यां चिदवस्थायामुपलभ्यं स्यात् तदा सम्भावितम्, न तूपलभ्यमित्याक्षिप्याह—

तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥७॥

तस्य स्वप्नस्याऽभावस्तदभावः सुषुप्तिः। नाडीषु देहान्तःस्थितासु शिरासु आश्रय उत्सृप्य पुरीतद्वेष्टिते हृदये तदन्तःस्थात्मनि ब्रह्मणि अस्य जीवस्य। चकारात्पुरीतल्लब्धम्। एतत् त्रयमपि कुत? इत्यत आह—तच्छ्रुतेः। तत्र स्पष्टं 'नाडीषु सृतो भवति पुरीतति शेते स्वमपीतो भवती'ति नाडी पुरी, तत् ब्रह्माख्यं, श्रुतेर्विकल्पे त्वन्यतरबाधः स्यात् ॥ ७ ॥

अतः प्रबोधो ऽस्मात् ॥ ८ ॥

यस्मात्सुषुप्तिरस्मिन्नात्मनि भवत्यतो ऽस्माद्धेतोरस्मदात्मनः प्रबोधो ऽस्य जीवस्याऽत आत्मनः प्राधान्यम् ॥ ८ ॥

पूर्वस्मिन्नधिकरणे ब्रह्मणि साभाव्यापत्तिरुक्ता जीवस्य, इह तु तत्सम्पन्नस्य मुक्तवन्न तस्य प्रबोधः किं त्वन्यस्येत्यनुपपत्त्या तामाक्षिप्याह—

स एव तु कर्माऽनुस्मृतिशब्दविधिभ्यः॥१०॥

यस्तु परमात्मनि शयानस्तस्मात् स एव निर्गच्छति । तुशब्दो ऽन्यं वारयति। कुतः? कर्माऽनुस्मृतिशब्दविधिभ्यः। कर्मोत्थितस्य शेषे ऽध्ययनादिः, अनुस्मृतिः पूर्वदिवसभोजनादिः, शब्दः'प्रतिन्यायं प्रतियोनि'मित्यादि, विधि'र्ज्योतिष्टोमेने'त्यादिः। तेभ्यः। तस्यैवाऽनुसन्धाने कर्मादिकं न सिद्ध्येदित्यर्थः ॥ ६ ॥

पूर्वाधिकरणे सैव मूर्च्छेति दृष्टान्तेनाक्षिप्याह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुग्धेऽर्धसम्पत्तिः परिशेषात् ॥ १० ॥

मुग्धे मूर्छां प्राप्ते जीवे न सुषुप्तिवत् सर्वात्मना सम्पत्तिः । कुतः? परिशेषात् । न जागरणस्वप्नौ, वृत्तिज्ञानरहितत्वात् । नापि सुषुप्तिः, गात्रकम्पादीनामुपलम्भात् । नापि मृतिः, पुनरुत्थानात् । अतः प्रसक्तानां जागरणादीनां प्रतिषेधादन्यत्राऽप्रसक्तौ शिष्यमाणा या ऽर्धसम्पत्तिः सम्प्रत्ययः सोयं परिशेषस्तस्मात् ॥ १० ॥

पूर्वाधिकरणे ब्रह्मण्यर्धसम्पत्तिरुक्ता जीवस्य, सैवाऽनुपपन्ना, ब्रह्मणः सविशेषनिर्विशेषत्वेनाऽनेकरूपत्वेनाऽनिश्चितरूपत्वात् इत्याक्षिप्याह—

न स्थानतोपि परस्योभयलिङ्गं सर्वत्र हि ॥११॥

परस्य परमात्मनः स्वभावत उभयलिङ्गमुभयरूपम् । 'अस्थूलमनण्वि'त्यादि 'मनोमयः प्राणशरीर' इत्यादि न स्थानतोपि पृथिव्यादिस्थानयोगादेरप्युभयलिङ्गं न । कुतः? हि यस्मात् सर्वत्र सर्वेषु वेदान्तेषु 'अशब्दमस्पर्शमरूप'मित्यादिनैकमेव श्रूयते ॥ ११ ॥

न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥१२॥

न ब्रह्माऽशब्दादिगुणकमेकलिङ्गं कुतः? चतुष्पात् षोडशकल'मित्यादिना परस्य ब्रह्मणो भेदादिति चेन्न । कुतः? 'यश्चाऽयमस्यां पृथिव्या'मित्यादिना प्रत्येकं प्रत्युपाधि अतद्वचनात् ॥ १२ ॥

नन्वेकस्यां शाखायामिदं वचनं नाऽत्यन्तमादरणीयमित्यत आह

अपि चैवमेके ॥ १३ ॥

एवं भेददर्शननिन्दादिपूर्वकं 'मृत्योः स मृत्यु'मित्युपक्रम्य 'नेह नानास्ति किं चने'त्यभेदमेके शाखिन आमनन्ति । अपिचशब्देनाऽभेद एव युक्तोपि ॥ १३ ॥

ननु नाऽयं तर्कगम्यो ऽर्थः, श्रुतेश्चोभयत्र विद्यमानत्वादित्यत आह

अरूपवदेव हि तत्प्रधानत्वात् ॥ १४ ॥

हि यस्मात् अरूपवदेव ब्रह्म, न तु सगुणमवगन्तव्यम् । कुतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्प्रधानत्वात् । तस्याऽरूपवतः प्रतिपाद्यत्वात् 'अस्थूलमनण्वि'त्यादिभिर्वाक्यैः । एतच्च समन्वयसूत्रे स्थितम् ॥ १४ ॥

एवं तर्हि सगुणप्रतिपादकानां वाक्यानां वैयर्थ्यमित्यत आह—

प्रकाशवच्चाऽवैयर्थ्यात् ॥ १५ ॥

यथा प्रकाशः सूर्यादिः तत्तदङ्गुल्यादिऋजुवक्रतामनु स्वयमपि ऋजुर्वक्रो वा एवमुपाधिभेदेनाऽऽत्मनः सगुणत्व,मतस्तद्वाक्यानामवैयर्थ्यं तस्मात् । चकारो घटाऽऽकाशादिनिदर्शनसमुच्चयार्थः ॥३५॥

नन्वसत्यपि रूपान्तरराहिते 'कृत्स्नः प्रज्ञानघन' इति श्रुतिराह तनूमनसः स्थैर्यार्थं रूपस्य प्राधान्यमित्यत आह—

आह च तन्मात्रम् ॥ १६ ॥

तन्मात्रं चैतन्यमात्रं रूपान्तरराहितं 'कृत्स्नः प्रज्ञानघन' इति श्रुतिराह । चकारो नीरूपे मनसः स्थैर्यं वारयति ॥ १६ ॥

नन्वियं श्रुतिरेकरूपत्वं विधत्ते, न पुना रूपान्तरं प्रतिषेधतीत्यत आह—

दर्शयति चाऽथो अपि स्मर्यते ॥ १७ ॥

अथो यस्माद् रूपान्तरप्रतिषेधं दर्शयति 'नेती'त्यादिना नाऽयं प्रतिषेधो लौकिकः । यतः स्मर्यतेपि 'न सत्तद्' इत्यादिना 'ममैवे'त्यादिना च ॥१७॥

ननु प्रतीयमानो भेदः कथमतात्त्विक? इत्यत आह—

अत एव चोपमा सूर्यकादिवत् ॥ १८ ॥

यत एकरूपता ऽस्योक्ता नानारूपत्वं निराकृतम्, अस्मादेव कारणात् प्रतीयमानस्य भेदस्योपमा न भवति । यथा जले सूर्यकः सूर्यप्रतिबिम्बः । आदिशब्देन चन्द्रप्रतिबिम्बादि । तथा च श्रुतिषु 'यथा स्वयं ज्योतिरात्मे'त्यादिषु 'एक एवे'त्यादिषु च तदुपमीयते॥१८॥

उपाधिभेदादनेकत्वमाक्षिपति—

अम्बुवदग्रहणात्तु न तथात्वम् ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा ऽम्बु सूर्यमूर्तेर्व्यवहितं गृह्यते एवमम्बुवत्परमात्मनो भिन्नस्योपाधेः परमात्मनो वा ऽमूर्तस्याऽग्रहणात् न तथात्वं न सूर्यकादिसमानता ऽस्य भेदस्य ॥ १९ ॥

समाधत्ते—

वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॥ २० ॥

दृष्टान्तदार्ष्टान्तिकयोर्न साम्यं लोके ऽपि, किमुत वेदे । एकस्य कथं तिर्यगादिविचित्ररूपाणि?त्यस्य समाधानार्थं सूर्यकादिदृष्टान्तो विवक्षिते ऽर्थे श्रुत्योक्तः । विवक्षितं तु यथा जलवृद्ध्या वृद्धिभाक्त्वं जलस्य ह्रासे ह्रासभाक्त्वं तच्चलनादिभाक्त्वम् एकस्यापि तद्भेदाद् भेदभाक्त्वमिति । तदाह-वृद्धिह्रासभाक्त्वमुपाधेरस्य । कुतः ? उपाधौ देहादावन्तर्भावादहमित्याद्यभिमानक्रोडीकृतत्वात् । कुत एत?दित्यत आह—एवमुभयस्य दृष्टान्तस्य दार्ष्टान्तिकस्य सामञ्जस्यात् ॥ २० ॥

ननु शरीरान्तः परमात्मप्रवेशे सत्युपमागवेषणं, न तस्माद्भिन्नजीवप्रवेश इत्यत आह—

दर्शनाच्च ॥ २१ ॥

'पुरः स पक्षी भूत्वा पुरुष आविशत्' 'अनेन जीवेने'त्यादिना परमात्मन एव प्रवेशस्य दर्शनात् । चकारो जीवस्य परमात्मव्यतिरिक्तत्वग्राहकप्रमाणाऽभावसूचनार्थः ॥ २१ ॥

पूर्वाधिकरणे निर्विशेषमेव ब्रह्मेत्युक्तं निषेधप्राधान्यात्, एवं च नेति प्राधान्याद्ब्रह्मापि न स्यादित्याक्षिप्याह—

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ २२ ॥

प्रकृतं मूर्त्तामूर्त्तरूपेण यदेतावत्त्वमियत्ता तस्य भावः प्रकृतैतावत्त्वं तदेव प्रतिषेधति निराकरोति नेतिनेति शब्दः । कुत एत?दित्यत आह-ततो ब्रवीति च भूयः । ततस्तस्मात्प्रतिषेधादनन्तरं भूयः पुनरन्यत् परमस्तीति ब्रवीति । चकारो ऽप्यन्तसतो निर्धारणस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च्छयार्थः । अथ वा ततो ब्रवीति च भूय इति ततः प्रतिषेधानन्तरं भूयः पुनर्ब्रवीति 'अथ नामधेयमस्य सत्यस्य सत्य'मित्यादिना ॥२२॥

तादृशं ब्रह्म चेत्कस्माच्चक्षुरादिभिर्न गृह्यत?इत्यत आह—

तदव्यक्तमाह हि ॥ २३ ॥

तद्ब्रह्म न व्यक्तं रूपादिहीनमव्यक्तम् । कुतः ? हि यस्मादाह श्रुतिः 'न चक्षुषा गृह्यते नापि वाचे'त्यादिना । स्मृतिरपि 'अव्यक्तोऽय'मित्यादिना ॥ २३ ॥

ननु श्रुतिवचनात्तादृशस्य सत्त्वे कथं विश्वासः कदा चिदपि अप्रत्यक्षतया?मित्यत आह—

अपि संराधने प्रत्यक्षाऽनुमानाभ्याम् ॥२४॥

संराधनं भक्तिध्यानप्रणिधानाद्यनुष्ठानं तस्य संराध्यमानस्य संराधनं तस्मिन्योगिनः पश्यन्ति । तत्कुतः ? प्रत्यक्षाऽनुमानाभ्याम् । प्रत्यक्षं श्रुतिः 'प्रत्यगात्मानमैक्षत' 'ततस्तु तं पश्यति निष्कल'मित्यादिः । अनुमानं स्मृतिः 'ज्योतिः पश्यन्ती'त्यादिश्च । श्रुतावविश्वसितस्य प्रत्यक्षेणापि विश्वासमाहापिशब्दः ॥ २४ ॥

ननु संराध्यसंराधकभावश्चेत्स एव ब्रह्मभेदो ब्रह्मणो विशेषात्मत्वं च स्यादित्यत आह—

प्रकाशादिवच्च वैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥ २५ ॥

यथा प्रकाशकाः सवितृप्रभृतयोऽङ्गुलिकरकोदकप्रभृतिषु कर्मसूपाधिभूतेषु सविशेषा इवाऽवभासन्ते, न च स्वाभाविकीमविशेषात्मतां जहति, एवमुपाधिनिमित्त एवाऽयमात्मभेदः, स्वतश्चैकात्म्यमेव । तथा हि वेदान्तेष्वभ्यासेनाऽसकृज्जीवप्राज्ञयोरभेदः प्रतिपाद्यते । अक्षराणि त्वेवं योज्यानि–कर्मण्युपाधौ प्रकाशश्च उपाधौ स्थितो भिन्नरूपेण वैशेष्यमेवाऽवलम्बते एवं प्रकाशादिवत् स्वरूपेणाऽवैशेष्यमवलम्बते परः । आद्यश्चकारस्तदवलम्बने परत्वाऽभावं परमेश्वरस्याह । कुतः ? अभ्यासात् । जीवब्रह्मणोरभेदस्येति शेषः ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथापि परिच्छिन्नस्य जीवस्य कथमनन्तेन परमात्मनैक्यमुपपन्नं ? नैतद्युक्तिमात्रम्

अतो ऽनन्तेन तथा हि लिङ्गम् ॥ २६ ॥

हि यस्माद्यथोक्तं तथा लिङ्गं 'ब्रह्म वेद ब्रह्मैव भवती'ति ॥२६॥

इदानीं स्वमतविशुद्धौ भेदाऽभेदवादमुत्थापयति—

उभयव्यपदेशात्त्वहिकुण्डलवत् ॥ २७ ॥

तुशब्दः संराध्यसंराधकयोरौपाधिकं भेदं व्यावर्तयति 'ततस्तु त' मित्यादिना, ध्यातृध्येयभावस्य परमित्यादिना, गन्तृगन्तव्यभावस्य 'यतः सर्वाणि भूतानि' इत्यादिना, नियन्तृनियम्यभावस्य भेदस्य 'तत्त्वमसि' 'अहं ब्रह्माऽस्मी' त्यादिना ऐक्यस्योभयस्य व्यपदेशाद्भेदाऽभेदौ जीवब्रह्मणोरहिकुण्डलवत्। यथा ऽहेः कुण्डलाऽऽकारो नाऽत्यन्तं भिन्नः, पृथगुपलम्भात्। न चाऽत्यन्तमभिन्नः, दण्डायमाने तस्मिन् तथा ऽनुपलम्भात्। एवं जीवोपि ॥ २७ ॥

नन्वेवं जीवस्याऽनित्यत्वं स्यादित्यत आह—

प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २८ ॥

अथ वा प्रकाशाश्रयवदेतत्प्रतिपत्तव्यम्। यथा प्रकाशः सावित्रः तदाश्रयश्च सविता नाऽत्यन्तभिन्नः उभयोरपि तेजस्त्वाऽविशेषात्, अथ च व्यपदेशभाजौ भवत एवमिहापीति ॥ २८ ॥

समाधत्ते—

पूर्ववद्वा ॥ २९ ॥

वाशब्दो न भेदाऽभेद इत्याह, किन्तु यथा पूर्वमुपन्यस्तं प्रकाशादिवद्याऽवैशेष्यमिति तथैतत् ॥ २९ ॥

नन्वेवं भेदश्रुतेरपि निर्वाहे कुतो ऽयमेव पक्ष ? इत्यत आह—

प्रतिषेधाच्च ॥ ३० ॥

'नान्यो ऽतो ऽस्ति द्रष्टे' त्यादिना ब्रह्मणो व्यतिरिक्तस्य प्रतिषेधात्। चकारो भेदश्रुतेरसत्त्वेन भेदाऽभेददुर्भणत्वसमुच्चयार्थः ॥३०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वाधिकरणे प्रतिषेधादन्यस्य ब्रह्मणः श्रुत्योक्तत्वादस्ति ब्रह्मेत्युक्तं, तर्हि ब्रह्मव्यतिरिक्तमप्यस्ति श्रुत्युक्तत्वादित्याक्षिपति—

परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ॥३१॥

परमेश्वरात्परमन्यदस्ति। कुतः? सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः। सेतुव्यपदेशः 'पुरुषो ऽन्तरादित्ये पुरुषो ऽन्तराक्षिणी'ति। तेभ्यः। न हि सर्वसाम्यात्परस्यैते उपदेशा उचिताः॥ ३१॥

सामान्यात्तु ॥ ३२ ॥

तुशब्दो ब्रह्मणः परमन्यद्व्यावर्तयति ॥ ३२ ॥

कथं तर्हि सेतुशब्दो ब्रह्मणि?त्यत आह—

सामान्याद् बुद्ध्यर्थः पादवत् ॥ ३३ ॥

बुद्ध्यर्थः उपसानार्थः। तत्र निदर्शनं पादवत्। यथा पादा मनसो वागादयः। अथ वा कार्षापणस्य पादा व्यवहारार्थं तद्वत्॥ ३३॥

तर्हि सम्बन्धभेदयोः कथं व्यपदेश? इत्यत आह—

स्थानविशेषात् प्रकाशादिवत् ॥ ३४ ॥

स्थानमिव स्थानं तस्य विशेषो बुद्ध्याद्युपाधिराहित्यं सुषुप्ताऽवस्थायां, न तु परिमितत्वेन सत्तापत्तिरतो न सम्बन्धकृतदूषणम्। भेदपक्षे स्थाने आदित्यमण्डलेऽक्षिणीव विशेषस्तस्मात्, न तु स्वरूपभेदोपदेशः। प्रकाशादिवदित्युपमोपादानम्। यथैकस्य प्रकाशस्य सौरस्य यथोपाधियोगादुपजातस्य भेदव्यपदेशो भवति उपाध्युपगमात् सम्बन्धव्यपदेशो भवति। आदिशब्देन यथा सूचीपाशादिषूपाध्यपेक्षयैव तौ व्यपदेशौ भवतस्तद्वत्॥ ३४॥

ननु कस्मात् मुख्यं सम्बन्धं परित्यज्य उपचरितः स्वीक्रियते? इत्यत आह—

उपपत्तेश्च ॥ ३५ ॥

'स्वमपीतो भवती'ति स्वरूपसम्बन्धमेवाऽऽमनन्तीति चाऽऽस्यो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाधिप्रलयमन्तरेण । न च नगरवदस्त्युपपत्तिः । अत उपपत्तेरयमेष सम्बन्धः । भेदो ऽपि नाऽन्यदृश्य इति चकारार्थः ॥ ३५ ॥

उक्तेभ्यो हेतुभ्यः परोक्तनिवृत्तिर्नैतावता स्वपक्षसिद्धिरित्यत आह—

तथा ऽन्यप्रतिषेधात् ॥ ३६ ॥

यथा सेत्वादिव्यपदेशो ऽनवच्छिन्न उपपन्नस्तथा 'स एवाऽधस्ता'दित्यादिना ब्रह्मणो ऽन्यस्य प्रतिषेधात् ॥ ३६ ॥

तथापि ब्रह्मणस्त्रेधा परिच्छेदशून्यत्वाऽभावात् परमन्यदनुमेयमित्यत आह—

अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥३७॥

अनेन सेत्वादिनिराकरणेनाऽन्यप्रतिषेधेन । न च सर्वगतत्वं त्रेधा परिच्छेदशून्यत्वम् । किं तर्कमात्रेण तत्रे?त्याह—आयामशब्दादिभ्यः आयामशब्दो व्याप्तिवचनः शब्दः 'यावानाकाश' इत्यादिः । आदिशब्देन नित्यत्वादिशब्दो ऽर्थो वा तेभ्यः ॥३७॥

पूर्वाधिकरणे निर्गुणमेव ब्रह्म तत्पदार्थलक्ष्यं नाऽतो ऽधिकं किंचिदस्ति, तर्हि निर्गुणस्यापि कर्मफलपारतन्त्र्यात् सेतून्मानादिकमित्याक्षिप्याह—

फलमत उपपत्तेः ॥ ३८ ॥

फलं सुखदुःखादि अतः परमेश्वरात् । कुतः ? चेतनो हि स्वतन्त्रः कृतं शुभाऽशुभं विज्ञाय तदनुसारि फलं प्रयच्छतीत्युपपत्तेः ॥३८॥

किं तर्कमात्र?मित्याशङ्क्याह—

श्रुतत्वाच्च ॥ ३९ ॥

'अन्नादो वसुदान' इत्यादिना । चकार 'ईश्वरप्रेरितो गच्छे'दित्यादिस्मृतिमाह ॥ ३९ ॥

ईश्वरे फलदातृत्वमाक्षिपति—

धर्मं जैमिनिरत एव ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जैमिनिस्त्वाचार्यो धर्मं फलस्य दातारं मन्यते। अत एव श्रुतोपपत्तिभ्यामेव श्रुतं 'ज्योतिष्टोमेने'त्यादिना, उपत्तिरीश्वरश्चेद्दाताऽकृतेपि कर्मणि दद्यात् सुखदुःखादि, कृतेपि न दद्यात्स्वतन्त्रत्वादेव ॥ ४० ॥

समाधत्ते—

पूर्वं तु बादरयणो हेतुव्यपदेशात् ॥ ४१ ॥

तुशब्द ईश्वराऽनधिष्ठितस्य कर्मणः फलदातृत्वं व्यावर्तयति। किं तु यः पूर्वमुक्तस्तमेवेश्वरं फलदातारं बादरायण आचार्यो मन्यते। कुतः ? हेतुव्यपदेशात्। हेतुरीश्वरो धर्माऽधर्मयोः फलस्य च 'एष ह्येवे'त्यादिश्रुत्या 'यो यो यां या'मित्यादिस्मृत्या च व्यपदिश्यते। हेतोः कारणस्य व्यपदेशो हेतुव्यपदेशस्तस्मात् ॥ ४१ ॥

इति ब्रह्मसत्रदीपिकायां तृतीयाऽध्यायस्य द्वितीयः पादः ॥

द्वितीये पादे तत्त्वंपदार्थौ निर्णीतौ, तृतीयपादे पुनरुक्ताऽऽकाङ्क्षितपदार्थोपसंहारेण सगुणनिर्गुणब्रह्मवाक्यानाम् अर्थो ऽवधार्यते। सगुणो विद्याभेदो ऽभेदश्च गुणोपसंहारो ऽनुपसंहारश्चोपासनार्थः। ततः शुद्धान्तःकरणे ज्ञानोत्पादे ब्रह्माप्नोति इति फलम्। निर्गुणे तु विद्याया ऐक्यमेव वाच्याऽऽनन्दादिगुणानामुपसंहाराल्लक्ष्यमाणैकरसवाक्यार्थबोधः फलमित्यत आह—

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥

सर्ववेदान्तप्रत्ययानि विज्ञानानि यस्मिन् तत्सर्ववेदान्तप्रत्ययं प्राणविज्ञानं सर्ववेदान्तप्रत्ययानि विज्ञानानि तस्मिन् तस्मिन्वेदान्ते आत्न्येव तानि भवितुमर्हन्ति। कुतः ? चोदनाद्यविशेषात्। आदिशब्देन संयोगरूपसमाख्यानां ग्रहणम्। 'यो ह वै ज्येष्ठं च श्रेष्ठं च वेदे'ति छन्दोगानां वाजसनेयिनां च चोदनाया अविशेषः। 'ज्येष्ठश्च श्रेष्ठश्च स्वानां भवती'ति प्रयोजनसंयोगो ऽप्यविशिष्टः। रूपमपि ज्येष्ठश्रेष्ठगुणकमेव। समाख्यापि प्राणविद्येति ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भेदान्नेति चेन्नैकस्यामपि ॥ २ ॥

वाजसनेयिनां छन्दोगानां पञ्चाऽग्निभेदान्नैका विद्येति चेत्तन्न । एकस्यामपि विद्यायामयं भेदो न दोषाय, साम्येन पञ्चानामप्यग्नीनां प्रत्यभिज्ञायमानत्वात् । एवमन्यत्रापि ज्येष्ठत्वादिगुणानामेकरूपत्वान्न भेदः ॥ २ ॥

'तेषामेवैता'मित्यादिना शिरोव्रतादिधर्मभेदाद्विद्याभेद इत्यत आह—

स्वाध्यायस्य तथात्वेन हि समाचारे ऽधिकाराच्च सववच्च तन्नियमः ॥ ३ ॥

स्वाध्यायस्यैष धर्मो न विद्यायाः । कथं ? हि यस्मात्तथात्वेन स्वाध्यायधर्मत्वेन समाचारे वेदव्रतोपदेशपरे ग्रन्थे आथर्वणिका इदमपि वेदव्रतत्वेन व्याख्यातमित्यामनन्ति 'नैतदचीर्णव्रतो ऽधीते' इति चाऽधिकृतविषयादेतच्छब्दादध्ययनशब्दाच्च । तदाह—अधिकाराच्च सववच्च तन्नियमः । तस्य शिरो नियमोपि तेषामेव, तत्र निदर्शनं सववत् । यथा सप्त सौर्यादयः शतौदनपर्यन्ताः सवा एकाग्निसम्बद्धास्तेषामिव तद्वत् ॥ ३ ॥

ननु न्यायमात्रेण कथमवाचनिकं स्वीकर्तुं शक्यमित्यत आह—

दर्शयति च ॥ ४ ॥

'सर्वे वेदा यत्पद'मित्यादिना विद्यैकत्वम् । चकारो न्यायमात्रशङ्काया अनुत्थानं दर्शयति ॥ ४ ॥

पूर्वाधिकरणे विद्यैक्यं निरूपितं, तन्निष्प्रयोजनमित्याशङ्क्याह—

उपसंहारो ऽर्थाभेदाद्विधिशेषवत्समाने च ॥ ५ ॥

शाखान्तरोपदिष्टानां गुणानां शाखान्तरविज्ञानमुपसंहारः स्वीकार्यः । कुतः ? अर्थस्य प्रयोजनस्य विशिष्टज्ञानोपकारस्याऽभेदात् । समाने चोभयत्रापि तस्मिन्नेकस्मिन् ज्ञाने स्थिते । अत्र निदर्शनं विधिशेषवत् । विधिशेषाणामग्निहोत्रादिधर्माणां शाखान्तरे श्रुतानां यथा शाखान्तरे उपसंहारस्तद्वत् ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वाधिकरणे चोदनाद्यविशेषात् विद्यैक्यमुक्तम्, अत्रापि प्राणविद्येति सामाख्याया एवैक्यात् विद्यैक्यमिति वदन्तमपवदिति सूत्राऽवयवेन—

अन्यथात्वं शब्दादिति चेन्नाऽविशेषात् ॥६॥

उद्गानस्य कर्तृत्वमुद्गीथरूपत्वं वाजसनेयके छान्दोग्ये च प्रतीयते 'त्वं न उद्गाये'ति, वाजसनेयकेपि 'तमुद्गीथमुमासां चक्रिरे' इति शब्दाऽभेदादिति चेत्तन्न । कुतः ? अविशेषाद् । देवाऽसुरसंग्रामादेर्भूयसः ॥ ६ ॥

उभयत्रापि सिद्धान्तमाह—

न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् ॥७॥

न वा नैव विद्याया ऐक्यम् । कुतः ? छान्दोग्ये 'ओमित्येतदक्षरमुद्गीथ' मित्युपक्रम्योद्गीथाऽवयवस्योद्गीथत्वेनोपासनमभिधाय प्राणस्यापि उद्गीथत्वमाह 'तद्ध्युद्गीथ'मिति । वाजसनेयके तु समग्राया उद्गीथभक्तेः कर्ता 'त्वं न उद्गाये'ति । अतः प्रकरणभेदात्परोवरीयस्त्वादिवदेकस्यां शाखायां निदर्शनं 'स एष परोवरीयानुद्गीथ' इत्याकाशे परोवरीयस्त्वादिधर्मिण्युद्गीथे हिरण्यश्मश्रुत्वादिधर्मिणि च परस्परं न गुणोपसंहारस्तद्वत् ॥ ७ ॥

संज्ञायाश्चेत्तदुक्तमस्ति तु तदपि ॥ ८ ॥

संज्ञायाः प्राणविद्येत्यस्या अभेदाद्विद्याया अप्यभेद इति चेत् चोद्यं तदुक्तं निराकृतं न वा प्रकरणभेदादित्यत्र । तदपि संज्ञाया ऐक्यमपि प्रसिद्धभेदेष्वपि परोवरीयस्त्वादावुद्गीथ इत्यग्निहोत्रदर्शपूर्णमासादौ काठकमिति अस्ति तु अस्त्येव ॥ ८ ॥

पूर्वाधिकरणे 'ओमित्येतदक्षरमुद्गीथ'मिति छन्दोगानामुपक्रमाद्विद्याभेद उक्तः, इदानीं तस्योङ्कारस्योद्गीथो ऽपि विशेषणं न दृष्टविधिर्नाऽपवादो न चैक्यमिति बुद्धिसन्निधितामाह—

व्याप्तेश्च समञ्जसम् ॥ ९ ॥

चशब्दस्त्वर्थः । स ह्यध्यासाऽपवादैक्यानि निराकरोति । व्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ते: सर्ववेदसाधारण्यात् ओङ्कारस्य । स तादृशो मा भूदित्युद्गीथ-शब्दं विशेषणमाह । समञ्जसं चैतद्विशेषणम्, अन्यथा व्याप्तस्यैव ग्रहणं स्यात् ॥ ९ ॥

पूर्वाधिकरणे ओङ्कारस्योद्गीथो विशेषणमित्युक्तं, सर्वप्राणे च व्यावृत्त्यर्थं, तद्वदत्रापि विशिष्टत्वादिगुणा अन्यत्वव्यावृत्त्यर्था इति दृष्टान्तेनाक्षिप्याह—

सर्वाऽभेदादन्यत्रेमे ॥ १० ॥

इमे विशिष्टत्वादयो गुणा यत्र नोक्तास्तत्रासीरन्, कुतः? सर्वाऽभेदात् । सर्वस्य प्राणस्य विज्ञानस्यैकस्याऽभेदात् ॥ १० ॥

पूर्वाधिकरणे प्राणस्य विशेषणत्वेन शाखान्तरगता गुणा वशिष्ठत्वादय उपसंहृताः, न तु ब्रह्मणः सविशेषत्वमिति न शाखान्तरगता आनन्दादय उपसंहर्तव्या इत्याक्षिप्याह—

आनन्दादयः प्रधानस्य ॥ ११ ॥

यत्र शाखान्तरे आनन्दादयो धर्मा नोक्ताः प्रधानस्य ब्रह्मणस्तत्र ते उपसंहर्तव्याः । कुतः ? सर्वाऽभेदादेव ॥ ११ ॥

एवं चेत् प्रियशिरस्त्वादीनामुपसंहारप्राप्तिरित्यत आह—

प्रियशिरस्त्वाद्यप्राप्तिरुपचयाऽपचयौ हि-भेदे ॥ १२ ॥

प्रियशिरस्त्वादेरुपसंहाराऽप्राप्तिः । कुतः ? हि यस्माद् भेदे सत्युपचयाऽपचयौ भवतो, न त्वभेदेऽपि । प्रियशिरस्त्वादयश्च स्वयमपि तारतम्येन वर्तन्ते, भोक्तृभेदाच्च प्रियशिरस्त्वादयः कृत्वाचिन्तयोक्ताः संयद्वामसत्यकामत्वादीनामप्राप्तिं दर्शयितुम् ॥ १२ ॥

यथा प्रियशिरस्त्वादयो नोपसंहार्याः तद्वदानन्दादयोऽपीत्यत आह—

इतरे त्वर्थसामान्यात् ॥ १३ ॥

तुशब्दो ह्यनुपसंहार्यत्वं व्यावर्तयति । इतरे आनन्दादय उपसंह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्तव्याः । कुतः ? अर्थसामान्यात् । अर्थस्य प्रतिपाद्यस्य ब्रह्मणः सामान्यात् एकरूपाऽऽपन्नत्वात् ॥ १३ ॥

पूर्वाधिकरणे ब्रह्मण ऐक्याद्वाक्ये तत्पदार्थे आनन्दादीनामुपसंहार उक्तः शब्दसामर्थ्यात्तर्हि तद्व'दिन्द्रियेभ्यः परा ह्यर्था' इत्यादौ वाच्याऽवगतेरर्थादिन्द्रियादयः स्वतन्त्राः प्रतिपाद्यन्तइति दृष्टान्तेनाक्षिप्याह—

आध्यानाय प्रयोजनाऽभावात् ॥ १४ ॥

'इन्द्रियेभ्यः परा ह्यर्था' इत्यादिना परस्परा पुरुषान्तोक्ता, न सा प्रतिपाद्या । कुतः ? प्रयोजनाऽभावात् । तर्हि पुरुषोपि न प्रतिपाद्य इत्यत आह—आध्यानाय ध्यानपूर्वकाय सम्यग्दर्शनाय पुरुषः प्रतिपाद्यः ॥ १४ ॥

आध्यानं चेन्द्रियादिप्रतिपादनेपि स्यादित्यत आह—

आत्मशब्दाच्च ॥ १५ ॥

'गूढोत्मा न प्रकाशत'इति पुरुषे आत्मशब्दात् तस्यैव गूढत्वात्प्रतिपाद्यप्रतिपत्त्यर्थमेव ,त्वियं परस्परा न स्वतन्त्रा । चकारो नैतेषामन्यतमप्रतिपादने सर्वप्रतिपादेन वा ऽऽध्यानं सिद्ध्यतीत्याह ॥१५॥

पूर्वाधिकरणे संभवत्येकवाक्यत्वे वाक्यभेदो न युक्तस्तर्हि 'आत्मा वा इदमेवे'त्यादौ हिरण्यगर्भः स्वीकरणीयस्तत्र वाक्यभेदाऽभावादिति दृष्टान्तेनाक्षिप्य समाधत्ते । अथ वा 'सदेवे'ति छन्दोगानां 'यो ऽयं विज्ञानमय' इति वाजसनेयकानां वैकवाक्यताऽभावान्न पूर्ववद्विद्यैक्यमित्याक्षिप्य समाधत्ते—

आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥

'आत्मा वा इदमेक एवासी' दित्यत्रात्मनः परमाऽऽत्मनो गृहीतिर्ग्रहणम् । किंवत् ? यथा 'तस्माद्वा एतस्मदात्मन' इत्यत्र सृष्टिप्रसङ्गेन तद्वत् । कुत? इत्यत आह–उत्तरात् । 'स ऐक्षते'त्यादेः ॥१६॥

अन्वयादिति चेत्स्यादवधारणात् ॥ १७ ॥

अम्भःप्रभृतीनां सृष्टेरन्वयादवगतत्वात् न पर आत्मशब्दाऽभि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धेय इति चेत् तन्न स्यात् पर आत्मशब्दाऽभिधेयो भवेत् । कुतः ? 'आत्मा वा इदमेक एवे'त्यवधारणात् । अथ वा 'सदेवे'त्यादिना सच्छब्देनात्मना गृहीतिरितरवद्वाजसनेयके 'कतम आत्मे'ति यथा आत्मशब्देनाऽऽत्मगृहीतिस्तद्वत् । कुतः ? उत्तरात् । 'ऐतदात्म्यमिदं सर्वं'मित्युपसंहारगतैतदात्म्यशब्दात् । 'सदेवे' त्युपक्रमाऽन्वयान्नाऽऽत्मनो ग्रहणमिति चेत् तन्न । 'येनाऽश्रुत'मित्यादिना एकविज्ञानेन सर्वविज्ञानस्य 'सदेवे'त्यनेनोत्पत्तेः प्रागन्याऽसत्त्वस्य चाऽवधारणात् । तस्य चाऽऽत्मग्रहणे उपन्नत्वं नाऽन्यथा ॥ १७ ॥

पूर्वाधिकरणे संदिग्धे सदुपक्रमस्य वाक्यशेषान्निर्णय उक्तः, एवमिहा'ऽश्यशिष्यन्त आचामन्ती'त्यादेर्वर्तमानापदेशत्वेन विधित्वसंदेहे 'अशिष्यन्नाचामेदिति वाक्यशेपादाचमनस्य विधित्वनिश्चय इत्याक्षिप्य समाधत्ते—

कार्याख्यानादपूर्वम् ॥ १८ ॥

'पुरस्ताच्चोपरिष्टाच्चाऽद्भिः परिदधाती'ति छन्दोगाना'मशिष्यन्नाचामेदाशित्वा चाऽऽचामे'दिति वाजसनेयिनां यदाचमयनं न तद्विधेयम् । कुतः ? कार्याख्यानात् । प्रायश्चित्त्यर्थे कार्यत्वेन प्राप्तस्य स्मार्तस्याऽऽख्यानादनुवादात् । किं तर्हि विधेय?मित्यत आह—अपूर्वमेव 'तदेनमनग्नं कुर्वन्तो मन्यन्ते' इति अनग्नताचिन्तनं प्राप्तं विधेयम् ॥१८॥

पूर्वाधिकरणे प्राप्ताऽऽचमनाऽनुवादेनाऽनग्नताचिन्तनं विधेयमित्युक्त,मिह तु वाक्ययोः कस्य विधेयत्वं कस्याऽनुवादत्व?मित्यनिश्चयात् द्वयोरपि विद्याद्वयविधित्वेनाऽन्योन्यं गुणाऽनुपसंहार इत्याक्षिप्य समाधत्ते—

समान एवं चाऽभेदात् ॥ १९ ॥

समानेपि शाखाऽभेदे वाजसनेयके एवं गुणोपसंहारो यथा भिन्नशाखायां कृतः, शाण्डिल्यविद्यायां मनोमयत्वादीनां गुणानां बृहदारण्यके च मनोमयत्वादीनां प्रत्यभिज्ञायमानत्वाद्विद्याया अभेदस्तस्मात् ॥ १९ ॥

पूर्वाधिकरणे एकशाखायामभ्यासाच्छाण्डिल्यविद्याभेदप्रसक्तावपि प्रत्यभिज्ञानाद्विद्यैक्यगुणोपसंहार उक्तस्तर्हि इहापि सत्यस्य ब्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह्मणो मण्डलद्वयवर्तिन ऐक्यात् उपनिषदोरप्युभयत्र चिन्तनमिति दृष्टान्तेनाक्षिपति—

सम्बन्धादेवमन्यत्रापि ॥ २० ॥

'तस्योपनिषदहरिति तस्योपनिषद'मिति यथा शाण्डिल्यविद्यायां बृहदारण्यके गुणोपसंहार एवमन्यत्रापि आदित्ये चक्षुषि चोपनिषदोरविभागेन चिन्तनम् । कुतः ? एकविद्यासम्बन्धात् ॥ २० ॥

सिद्धान्तमाह—

न वा विशेषात् ॥ २१ ॥

त्वदुक्तं नैव । कुतः ? आदित्येहरिति चक्षुष्यहमिति स्थलयोर्विशेषात् उपनिषदोरपि विभागः ॥ ३१ ॥

ननु स्थानभेदाद्धर्मभेदा नाऽन्यत्र नीयन्ते इत्यत आह—

दर्शयति च ॥ २२ ॥

'तस्यैतस्य तदेव रूप'मित्यादिना ऽतिदेशस्थानभेदात् धर्मभेदः । चकारो राजादीनां स्थानभेदाद्धर्मभेदप्रसिद्धिमाह ॥ २३ ॥

पूर्वाधिकरणे आदित्यादिस्थानभेदात् धर्माऽनुपसंहार उक्तः, अत्र तु ब्रह्मणः प्रत्यभिज्ञायमानत्वादुपसंहार इति प्रत्युदाहरणेनाक्षिप्याऽतिदेशेन समाधत्ते—

संभृतिद्युव्याप्त्यपि चाऽतः ॥ २३ ॥

'ब्रह्मज्येष्ठा वीर्या संभृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान'ेति राणायनीयानां खिलेषु आधिदेवसंभृतिद्युव्याप्त्यादयोपि धर्मास्ते नाऽध्यात्मदहरोपकोशलादिविद्यास्वपि उपसंहर्तव्याः । कुतः ? अत एव स्थानभेदादेव ॥ २३ ॥

पूर्वाधिकरणे असाधारणप्रत्यभिज्ञानात्संभृत्यादौ विद्याभेद उक्तः, इह तु असाधारणगुणप्रत्यभिज्ञानाद्विद्यैक्यमिति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ताण्डिनां पैङ्गिनां च रहस्ये पुरुषस्याऽऽयुस्त्रेधा विभज्य तत्सवनत्रयं परिकल्प्याऽशिषादीनि दीक्षात्वेनोच्यन्ते सेयं पुरुषविद्या, तस्यां ये धर्मा 'स्तस्यैवं विदुषो यज्ञस्ये'त्यादिना ये पुरुषो यज्ञे इतरैस्तैत्तिरीयकैर्धर्माः परिकल्पितास्तास्मिंस्ते नोपसंहर्तव्याः । कुतः ? तेषां ताण्डिपैङ्गिवदनाम्नानात् । यतस्ते 'तस्ये'त्यादिना 'आत्मा-यजमानः श्राद्धा पत्नी'त्यादि पठन्ति ॥ २४ ॥

पूर्वाधिकरणे पुरुषयज्ञस्य विद्यासन्निधेर्विद्याङ्गत्वात् 'सर्वं प्रविध्ये'त्यादेरुपनिषत्सन्निधेर्विद्याङ्गत्वमिति दृष्टान्तेनाक्षिप्य स साधत्ते—

वेधाद्यर्थभेदात् ॥ २५ ॥

'सर्वं प्रविध्ये'त्यादिमन्त्रजातं प्रवर्ग्यादिर्वा कर्म वा तत्तच्छाखोपनिषदारम्भे पठ्यमानानि न विद्यासूपसंहर्तव्यानि । कुतः ? तेषां ये हृदयवेधादयो ऽर्थास्तेषां भेदात् ॥ २५ ॥

पूर्वाधिकरणे विद्यासन्निधौ श्रुतस्य मन्त्रादेर्विद्यायामर्थभेदे सामर्थ्यादनुपसंहार उक्तः, तद्वद्धानसन्निधौ श्रुतस्याऽप्युपायनस्य तदन्तरेणापि हानसम्भवात् अनुपसंहार इत्याक्षिप्य समाधत्ते—

हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दःस्तुत्युपगानवत्तदुक्तम् ॥ २६ ॥

'तदा विद्वान् पुण्यपापे विधूये'त्यादौ यद्धानं तस्मिन् उपायनं नास्ति न वक्तव्यमिति तुशब्द आह । हानौ केवलायां श्रूयमाणायाम् अथर्वणादावुपायनं संन्निपतेत् । कुतः ? उपायनशब्दशेषत्वात् तस्याः । तथा हि कौषीतकिरहस्ये 'तत्सुकृतदुष्कृते विधुनुते तस्य प्रिया ज्ञातयः सुकृतमुपयन्ति अप्रिया दुष्कृत'मिति । अथ वा धूञ् कम्पने इति धातोश्चलनार्थोयं विधूतशब्दः उत हानाविति 'अश्व इव रोमाणि विधूये'त्यादौ न कृतसुदुष्कृतयोश्चलनं सम्भवति, किं तु तयोर्हानिः परित्यागः । कुतः? उपायनशब्दशेषत्वात् । तच्च हानौ सत्यां कुशाच्छन्दःस्तुत्युपगानवदित्युपमानं भाल्लविनां 'कुशा वानस्पत्या' इत्यविशेषेण श्रवणात् शाट्यायनिनामौदुम्बरा इति विशेषः कुशा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाम्। यथा वा कचिद्देवाऽसुरच्छन्दसामविशेषे 'देवच्छन्दांसि पूर्वा-णी'ति पैङ्गिनामाम्नाते सूर्य इति विशेषः। यथा वा क चिदृत्विग् इति अविशेषादुपज्ञानात् पूर्वत्वं विशेषः। यथा च षोडशिस्तोत्रे काला-ऽनिश्चये समयाऽध्युषिते प्राप्ते भाल्लविना'मध्वर्युरुपगाये'दिति वि-विशेषमाहुस्तद्वत् कौषीतकिरहस्यादौ उपायनस्य विशेषः। तदुक्तं द्वादशलक्षण्याम्। 'अपि तु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्पस्य विधीनामेकदेशः स्या'दिति। 'एष वै सप्तदश प्रजापतिर्यज्ञमन्वा-यत्त' इति 'नाऽनुयाजेषु यजामहं करोती'ति च विधिप्रतिषेधयोः समावेशे विकल्पे प्राप्ते जैमिनिराह—अपि त्वित्यादि। तुशब्दो विकल्पं वारयति। कुतः? अन्याय्यत्वाद्विकल्पस्याऽष्टदोषग्रस्तत्वेन ततो वि-धीनामेकदेशः स्यात्। अनुयाजवर्जितेषु यजामहः कर्तव्य इति पर्युदासः स्यात्। अस्मिन्नर्थे 'नाऽनुयाजेषु यजामहं करोती'ति वा-क्यशेषो ऽप्यनुकूलः स्यात्। यथा ऽत्र न विकल्पस्तद्वदुपायनेऽपि न विकल्पः। यद्यप्यन्यसुकृतदुष्कृतयोरन्येन नोपादानं तथापि विद्यास्तुतिरिति द्रष्टव्यम्॥ २६॥

पूर्वाधिकरणे विद्यासामर्थ्यात्कर्मणां परित्याग उक्तः, नैतद्वि-द्यासामर्थ्यम् अर्चिमार्गे परित्यागादिति इदानीमाक्षिप्य समाधत्ते—

साम्पराये तर्तव्याऽभावात्तथा ह्यन्ये ॥२७॥

सम्पराय एव साम्परायः। तस्मिन् देहपरित्यागाऽवसरे एव सुकृतदुष्कृतयोर्हानिः, न स्वर्धमार्गे विरजां तीर्त्वा। कुतः? तर्तव्या-ऽभावात्। उत्पन्नज्ञानस्य सुकृतदुष्कृताभ्यां प्राप्तव्यस्याऽभावात्। तथा ह्यन्ये। हि यस्मात् यथा ऽस्माभिर्व्याख्यातं तथा ताण्डिनः 'अश्व इव रोमाणि विधूये'त्यादिना शाट्यायनिनश्च 'तस्य पुत्रा दा-यमुपयन्ति' इत्यादिना आदावेव परित्यागमामनन्ति॥ २७॥

ननु विरजां नदीं तीर्त्वेत्यर्थतस्त्वाप्रत्ययश्रवणात् तत्रैव कुतो न परित्याग? इत्यत आह—

छन्दत उभयाऽविरोधात्॥ २८॥

छन्दत इच्छातः शरीरे सति ब्रह्मचर्यादिसाधनपरित्यागाऽव-सरे परित्यागः। एवं चोभयस्य निमित्तस्य नैमित्तिकस्य च ताण्ड-शाट्यायनिनोश्चाऽविरोधः॥ २८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वाधिकरणे शरीरपरित्यागाऽवसरे एव सुकृतदुष्कृतयोः परित्यागो निमित्तनैमित्तिकाऽविरोधेनेत्युक्तम्,अत्रापि सगुणनिर्गुणब्रह्मप्रतिपादकवाक्यानां ब्रह्मप्रतिपादकत्वाऽविरोधेन निर्गुणेष्वपि गतेरुपसंहार इति दृष्टान्तेनाक्षिप्य समाधत्ते—

गतेरर्थवत्त्वमुभयथा ऽन्यथा हि विरोधः॥२९॥

गतेर्देवयानस्य पथो ऽर्थवत्त्वं प्रयोजनवत्त्वम् उभयथा सगुणे निर्गुणे च व्यवस्थया । कुतः ? हि यस्मात् अन्यथा निर्गुणे ऽपि चेद् गतिः 'पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैती'त्यादिना विरोधः स्यात् ॥ २६ ॥

किमिदानीं श्रुतिविरोधादनुपपन्नमप्याहर्तव्य?मित्यत आह—

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ ३० ॥

उपपन्नो ऽयं गतेरुभयथाभावः । कुतः ? तल्लक्षणाऽर्थोपलब्धेः । तस्य गतेर्लक्षणभूतः कारणभूतो यो ऽर्थः प्रयोजनं पर्यङ्काऽऽरोहणादि पर्यङ्कविद्यादौ सगुणे उपलभ्यते न तु निर्गुणे । तत्र निदर्शनं लोकवत् । यथा ग्रामादिप्राप्तौ मार्गस्याऽर्थवत्त्वं तद्वत् ॥ ३० ॥

पूर्वाधिकरणे सगुणनिर्गुणविद्यासु व्यवस्था गतेरुक्ता, एवं सगुणास्वपि गतेर्व्यवस्था स्यादिति दृष्टान्तेनाक्षिप्याऽपवदति—

अनियमः सर्वेषामविरोधः शब्दाऽनुमानाभ्याम् ॥ ३१ ॥

सर्वेषां सगुणानामुपश्रुतगतानीमपि गतेरनियमो ऽविशेषः । प्रकरणस्य नियामकस्य विरोधे कुतो ऽनियम ? इत्यत आह—अविरोधः । न विरोधः प्रकरणे । कुतः ? शब्दाऽनुमानाभ्याम् । शब्दः श्रुति'र्ये चेमे ऽरण्ये श्रद्धां तप इत्युपासते' इत्यविशेषेण गतिमाह । अनुमानं स्मृतिः 'शुक्लकृष्णे गती ह्येते जगत' इत्यादिका ॥ ३१ ॥

पूर्वाधिकरणे सगुणविद्यासु गतिः सर्वत्रोक्ता, ततः पूर्वं निर्गुणासु नेत्युक्तं, सो ऽयं नियमो ऽनुपपन्नो, ज्ञानिनामपि व्यासादीनां शरीरैश्वर्यादिदर्शनात्ततो न निर्गुणज्ञानेन विदेहकैवल्यं सगुणेन क्रममुक्तिरित्याक्षिप्य समाधत्ते—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यावदधिकरमवस्थितिराधिकारिकाणाम् ॥३२॥

आधिकारिणां परमेश्वरनियमे वर्तमानानां व्यासादीनामारब्धफलेन कर्मणा कल्पभागेनाऽत्रस्थितिरवस्थानं न तु ब्रह्मज्ञानस्य पाक्षिकफलत्वेनाऽफलत्वेन वा। तर्हि कियन्तं काल?मित्यत आह—यावदधिकारम्। अधिकारकर्म यावत् तावदेव, न तूपरिष्टात् ॥ ३२ ॥

पूर्वाधिकरणे आधिकारिकाणां प्रारब्धकर्मण एव शरीरान्तरसम्भवात् न कर्मान्तरस्य निमित्ततेत्युक्तम्, एवमिहापि तत्प्रकरणपठितनिषेधत एवोपलक्षणतया सर्वत्र प्रपञ्चनिषेधे सिद्धे न शाखान्तरीयनिषेधानां शाखान्तरे ब्रह्मप्रमितिदृष्टान्तेन उपसंहार इत्याक्षिप्य समाधत्ते—

अक्षराधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥ ३२ ॥

अक्षराधियामस्थूलत्वादिबुद्धीनां चाऽन्यत्राऽवरोधः स्वीकारः स्यात्। कुतः? विशेषधर्मनिराकरणस्य सामान्यं, तस्य ब्रह्मणः प्रतिपाद्यस्य एकस्य भावः सत्त्वं च सर्वत्र ताभ्याम्। औपसदवदिति निदर्शनम्। यथा जामदग्न्ये अहीने पुरोडाशिनीपूपसत्सु चोदितासु पुरोडाशप्रदानमन्त्राणा'मग्नेर्वेहोत्रं वेरध्वर'मित्यादीनामुद्गातृवेदोत्पन्नानामध्वर्युभिः सम्बन्धो भवति अध्वर्युकर्तृकत्वात् पुरोडाशप्रदानस्य प्रधानतन्त्रत्वाच्चाऽङ्गाना,मेवमिहाप्यक्षरतन्त्रत्वात् तत्तद्विशेषणानां यत्र क्वचिदुत्पन्नानामक्षरेण सर्वत्राऽभिसम्बन्ध इत्यर्थः। तदुक्तं प्रथमे काण्डे 'गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोग' इत्यत्र शाबरमुदाहरणं वारवन्तीयादिसाम्नां यजुर्वेदविनियोगस्य श्रवणात् 'उच्चैः साम्ने'त्युत्पत्तिविधेर्गुणत्वा'दुपांशु यजुषे'ति विनियोगविधेर्मुख्यत्वात्तयोर्व्यतिक्रमे विरोधस्य तदर्थत्वात् विनियोगविध्यर्थत्वादुत्पत्तिविधेर्मुख्येन यजुष उपांशुस्वरेण वेदस्य च वारवन्तीयादिसाम्नः संयोग इत्यत्र सम्बन्ध इति योज्यम्। पूर्वं शाबरमुदाहरण,मतिरोहितं तु तत् ॥ ३३ ॥

पूर्वाधिकरणे प्रतिपाद्यब्रह्मैक्यप्रत्याभिज्ञानात् विद्यैक्ये ऽक्षराधि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

याद्युपसंहार उक्तः, इह प्रतिपाद्यभेदाद्विद्याभेद इति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

इयदामननात् ॥ ३४ ॥

'द्वा सुपर्णे'त्यत्र 'ऋतं पिबन्ता'वित्यत्र च विद्याया ऐक्यम् । कुतः? इयत्तापरिच्छिन्नस्य द्वित्वसंख्योपदेशस्योभयत्रामननात् ॥ ३४ ॥

पूर्वाधिकरणं 'पिबन्ता'वित्यस्य लाक्षणिकत्वमुपपाद्य मन्त्रद्वयेऽपि भोक्तृपरत्वेनार्थैक्यात् विद्यैक्यमुक्तम्, इहाऽर्थैक्येऽपि न विद्यैक्यमिति रूपाऽभेदमभ्यासेन प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

अन्तरा भूतग्रामवत्स्वात्मनः ॥ ३५ ॥

उषस्तिकहोडब्राह्मणयोर्विद्यैकत्वम् । कुतः? आत्मनो ऽन्तरा सर्वान्तरत्वेनोभयत्र पाठादिति शेषः । भूतग्रामवदिति निदर्शनं व्यतिरेके । यथा भूतग्रामस्य पृथिव्यादेर्न सर्वान्तरत्वं तद्वदात्मन आत्मानि सर्वान्तरत्वं न स्यादेकस्याऽन्वये तु यथा 'एको देव' इत्यादौ सर्वान्तरत्वमेकस्य तद्वत् ॥ ३५ ॥

अन्यथा भेदाऽनुपपत्तिरिति चेन्नोपदेशान्तरवत् ॥ ३६ ॥

अन्यथा विद्यैकत्वे आत्मना भेदाऽनुपपत्तिरिति चेत्तन्न । यथा ताण्डिनां 'तत्त्वमसी'ति नवकृत्व उपदेशभेदो विद्यैक्ये तद्वदत्रापि स्यात् ॥ ३६ ॥

पूर्वाधिकरणे अभ्यास आदरार्थ उक्तः, उत्तरत्रापि तथेत्याक्षिप्य समाधत्ते—

व्यतिहारो विशिंषन्ति हीतरवत् ॥ ३७ ॥

'तद्यो ऽहं सो ऽसौ यो ऽसो सो ऽह'मित्यादावीश्वरबुद्धिवदीश्वरे स्वात्मबुद्धिरिति व्यतिहारेण बुद्धिद्वयं करणीयम् । अनेकबुद्धिकरणे निदर्शनमितरवत् । यथा सर्वात्मादिबुद्धिः क्रियते तद्वत् । कुतः? हि यस्मात् 'त्वं वा ऽहमस्मि अहं वै त्वमसी'ति विशेषयन्त्याम्नातारः ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वाधिकरणे जीवब्रह्मणोरितरेतरात्मत्वं निर्देशभेदात् द्विरूपामतिः कर्तव्येत्युक्त,मेवमिहापि 'जयतीमांल्लोका'निति 'हन्ति पाप्मान'-मिति च फलभेदनिर्देशाद्विद्याभेद इति दृष्टान्तेनाक्षिप्य समाधत्ते—

सैव हि सत्यादयः ॥ ३८ ॥

'स यो हैतं महद्यक्ष'मित्यादिना 'तद्यत्तत्सत्यमसौ स आदित्य' इत्यादिना 'यश्चाऽयं दक्षिणेऽक्षन्पुरुष' इत्यादिना च योक्ता सा एकैव। हि यस्मात् 'तत्सत्य'मिति प्रकृताकर्षणादयः सत्यादयः सर्वे गुणा उभयत्रोपसंहर्तव्याः ॥ ३८ ॥

पूर्वाधिकरणे 'तत्सत्य'मिति प्रकृताकर्षणेन रूपाऽभेदात् गुणोपसंहार उक्तः, इह तु रूपाऽभेदाद् गुणाऽनुपसंहार इति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

कामादीतरत्र तत्र चाऽऽयतनादिभ्यः ॥ ३९ ॥

कामादि सत्यकामादि दहरविद्यायां श्रूयमाणमितरत्र 'यो ऽयं विज्ञानमय' इत्यादिबृहदारण्यकोक्ते उपसंहर्तव्यं, तत्र च यद्वशित्वादिकं तदपि छान्दोग्योक्ते दहरे उपसंहर्तव्यम्। कुतः ? आयतनादिभ्यः ॥ ३९ ॥

पूर्वाधिकरणे उपासनीयेपि स्तुत्यर्थत्वेन गुणाऽलोप इत्युक्तं, तद्वदिहापि प्राणाऽग्निहोत्रस्य—

आदरादलोपः ॥ ४० ॥

न लोपः, 'पूर्वोऽतिथिभ्यो ऽश्नीया'दित्यादेर्जाबालानामादरादिति पूर्वपक्षः ॥ ४० ॥

राद्धान्तमाह—

उपस्थिते ऽतद्वचनात् ॥ ४१ ॥

'तद्यद्भक्तं प्रथममागच्छे'दित्यत्र भोजने सति भक्तेन प्राणाऽऽहुतीनां विधानात् भोजनाऽलोपे ऽपि प्रत्यगागतमुपस्थितं यद्भक्तं द्रव्यम् अतो ऽस्माद्भक्तद्रव्यात् प्राणाऽग्निहोत्रस्य निष्पत्तिः, न त्वः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यस्मात्कस्माच्चित्, 'तद्यद्भक्त'मित्यनेन तस्याऽग्निहोत्रद्रव्यवचनत्वात् । अतो भोजनलोपे ऽपि न लोपो ऽग्निहोत्रस्य ॥ ४१ ॥

पूर्वाधिकरणे नित्यभोजनाश्रितप्राणाऽग्निहोत्रस्य नित्यत्वमुक्त,मेवं च नित्याऽङ्गाऽववद्धोपासनानां नित्यत्वमिति दृष्टान्तेनाक्षिप्य समाधत्ते—

तन्निर्धारणाऽनियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ ४२ ॥

तेषां कर्मगुणयाथात्म्यनिर्धारणानामुद्गीथरसतमत्वादीनां न नित्यवन्नियमः । न सर्वदा कर्मण्यनुष्ठीयमाने ऽनुष्ठानम् । कुतः ? तद्दृष्टेः । तस्याऽनियमस्य 'तेनोभौ कुरुत' इत्यादिदृष्टेरवगमात् । ननूभयोः करणे किमयमेव हेतुरित्यत आह-हि यस्मात् पृथक् फलम् अप्रतिबन्धः अतिशयः 'यदेव विद्यया करोती'त्यादिना श्रूयते, अतः फलभूमाऽर्थिन उपासनानि गोदोहनादिवत्—

पूर्वाधिकरणे फलभेदात् कर्माऽङ्गानां नित्याऽनित्यादिनिरूपणेन प्रयोगप्रभेद उक्तः, इह तु वायुप्राणयोस्तत्त्वाऽभेदात्प्राप्तिलक्षणफलैक्यात् उपासनप्रयोगैक्यमिति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

प्रदानवदेव तदुक्तम् ॥ ४३ ॥

वाजसनेयके 'वदिष्याम्येवाऽह'मित्यादिना वागादिभ्यः प्राणो ऽधिको ऽवधारितो 'ऽध्यात्ममाधिदैवं च ज्वलिष्यास्येवाह'मित्यग्न्यादिभ्यो वायुः, एवं छान्दोग्येपि संवर्गविद्यायां वायुप्राणाववधारितौ विद्याया ऐक्यमपि, तत्रैतौ वायुप्राणौ भिन्नस्वरूपौ न तु विद्याभेदौ यथैकस्मिन्नग्निहोत्रे सायंप्रातः प्रवृत्तिभेद इत्येतस्मिन्नर्थे निदर्शनं प्रदानवत् । यथा त्रिपुरोडाशिन्यामिष्टौ 'इन्द्राय राजे इन्द्रायाऽधिराजाय इन्द्राय स्वाराजे' इत्यत्र राजादिरूपभेदात् पृथक् प्रदानं तद्वद्वायुप्राणयोरपि भेदः । तदुक्तं पूर्वमीमांसायां 'सङ्कर्षो ऽनन्ता वा देवता पृथग्ज्ञानात्' । सङ्कर्षः सर्वेषामभिगमयन्नवद्यतीत्यस्मादेकहेलया परित्यागः प्राप्तस्तं परित्यागं वाशब्दो वारयति । पृथग्ज्ञानात् राजादिगुणानाम् ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वाधिकरणे एकप्रयोगसम्भवाद्वायुप्राणौ भेदेन ज्ञेयावित्युक्त, इह तु मनश्चिदादीनां कर्माङ्गत्वं नैकप्रयोगाऽङ्गत्वमिति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ ४४ ॥

वाजसनेयके ऽग्निरहस्ये मनो ऽधिकृत्य 'षट्त्रिंशत्सहस्राण्यपश्यदात्मनो ऽग्नीनिमान्मनोमयान्मनश्चित' इत्यादिना आम्नाता अग्नयः स्वतन्त्रा न क्रियाऽनुप्रवेशिनः । कुतः ? 'तद्यत्किं चे'त्यादेर्लिङ्गस्य भूयस्त्वादधिकत्वात् । सन्ति लिङ्गानि तथाप्यग्नेः प्रकरणात् कर्माऽनुप्रवेशिन इत्यत आह—तद्धि बलीयः । हि यस्मात् लिङ्गं प्रकरणाद् बलीयः । तदप्युक्तं पूर्वस्मिन्काण्डे 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षा'दिति । एकद्वित्रिचतुःपञ्चक्षणविलम्बात् परस्य परस्य दौर्बल्यं पूर्वस्य प्राबल्यमिति ॥ ४४ ॥

आक्षिपति पूर्ववादी पूर्वाधिकरणे—

पूर्वविकल्पः प्रकरणात् स्यात् क्रिया मानसवत् ॥ ४५ ॥

मनश्चिदादयः क्रियैव स्यात् कथं ? पूर्वस्मिन् क्रियामये ऽग्नौ विकल्पः सङ्कल्पविशेषो ऽभिधीयते यतः । तदपि कुतः ? क्रियामयस्याऽग्नेः प्रकरणात् । विरूपस्य तत्प्रकरणात् क्रियारूपत्वं क दृष्टमित्यत आह—मानसवत् । यथा दशरात्रस्य दशमे ऽहन्यविवाक्ये पृथिव्याः पात्रे समुद्रस्य सोमस्य प्रजापतिदेवतायै गृह्यमाणस्य ग्रहणाऽऽसादनहरणोपह्वानभक्षणानि मानसान्येवाऽऽम्नायन्ते, स च मानसो ऽपि ग्रहविकल्पः क्रियाप्रकरणात्क्रियाशेषः एवमस्यग्निविकल्प इत्यर्थः ॥ ४५ ॥

केवलप्रकरणं कथं लिङ्गं बाधते? इत्यत आह—

अतिदेशाच्च ॥ ४६ ॥

'तेषामेकैक एतावान् यावानसौ पूर्व' इत्यतिदेशस्तस्मादपि॥४६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परिहरति सिद्धान्ती—

विद्यैव तु निर्द्धारणात् ॥४७॥

तुशब्दो ऽग्नीनां क्रियारूपत्वं वारयति । किं तर्हि? विद्यैव । कुतः? विद्या चित एवेति निर्धारणात् ॥ ४७ ॥

नन्वसहकृतं निर्धारणं न बाधकं प्रकरणस्येत्यत आह—

दर्शनाच्च ॥ ४८ ॥

लिङ्गानामिति शेषः । चकारः सहकारिणो ऽनपेक्षामप्याह । लिङ्गानि चोक्तानि लिङ्गसूत्रे ॥ ४८ ॥

लिङ्गमपि क्वचिद्बाधकं न प्रकरणस्येत्यत आह—

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥४९॥

न बाधः प्रकरणेन लिङ्गबाधात् स्वातन्त्र्यं मनश्चिदादीनाम् । कुतः? श्रुत्यादीनां बलीयस्त्वात् । सन्ति चाऽत्र तानि । श्रुतिस्ताव'द्विद्याचित'एवेति । लिङ्गं 'सर्वदा सर्वमायानि भूतानि' । वाक्यं तु 'विद्याया हैवैते' । एवंविधाश्चितो भवन्ति ॥ ३९ ॥

ननु त्वयापि प्रसिद्धेनाऽग्निना ऽतिदेशात्क्रियाऽनुप्रवेशिनस्ते इत्यत आह—

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद् दृष्टश्च तदुक्तम् ॥ ५० ॥

अनुबध्यन्तएव तेषु मनश्चिदादिषु क्रियाऽवयवा आधानादयः 'मनसैवाऽधीयन्ते' इत्यादिनोक्ता येन सो ऽय मनुबन्धः, आधानादिसंपादनमिति यावत् । आदिशब्देनाऽतिदेशादयः । न हि क्रियाऽनुप्रवेशिष्वग्निषु इदं समञ्जसम् । तेभ्य एते स्वतन्त्राः । प्रज्ञान्तरपृथक्त्ववदिति निदर्शनम् । यथा प्रज्ञान्तराणां शाण्डिल्यादिविद्यानां परस्परं कर्मभ्यश्च पृथक्त्वं, तद्वत् । ननु प्रकरणादुत्कर्षो ऽदृष्टचरः कथमिव स्वीकरणीय ? इत्यत आह-दृष्टश्च । अवेष्टेः राजसूयप्रकरणपठितायाः प्रकरणादुत्कर्षः । वर्णत्रयाऽनुबन्धात्तस्या राजसूयवत्त्वाभ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राजसूयत्वम्। तदुक्तं प्रथमे काण्डे 'क्रत्वर्थैयमिति चेन्न वर्णसंयोगा'-दिति। 'आग्नेयो ऽष्टाकपालो हिरण्यं दक्षिणा' इत्याद्यवेष्टिः क्रतोः राजसूयस्य प्रकरणे पठिता, अतस्तदर्थेयामिति चेन्न। कुतः? 'यदि वा ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाऽऽहुतीनामाहुतीर्हुत्वा तमभिघारयेद्यदि वैश्यो वैश्वदेवं, यदि राजन्य ऐन्द्र'मिति वर्णैः सह संयोगः सम्बन्धः। न च राजसूयस्य 'राजा स्वाराज्यकामो राजसूयेन यजेते'ति श्रुतेः। तस्मात्तस्य राजसूयप्रकरणादुत्कर्षः॥५०॥

ननु मानसवत्क्रियाङ्गं भविष्यतीत्युक्तमित्यत आह—

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः॥ ५१॥

न सामान्यादपि क्रियाङ्गत्वं मनश्चिदादीनाम्। कुतः? केनाप्यंशेन कस्य चित्सामान्यस्योपलब्धेरित्यत आह—मृत्युवत्। 'स च एष मृत्यु'रित्यादित्यपुरुषस्या'ऽग्निर्वै मृत्यु'रित्यग्नेर्मृत्युत्वं च तयोरैक्यं तद्वत्। हि यस्मा'दसौ वै लोको ऽग्नि'रिति लोकस्याऽग्निभावाऽऽपत्तिस्तद्वत्। अत्यन्तवैलक्षण्ये लोकदृष्टान्तः॥ ५१॥

ननु 'श्रद्धां जुह्वति' इति परेण लोकस्याऽग्नित्वं प्रतीयते, न चाऽन्यत्र तादृग्वाक्यामित्यत आह—

परेण च शब्दस्य ताविद्विध्यं भूयस्त्वात्त्वनुबन्धः॥ ५२॥

परेण 'चाऽयं वाव लोक एषोऽग्नि श्चि'दित्यस्मिन्नुत्तरे ब्राह्मणे ताविद्विध्यं केवलविद्याविधित्वं शब्दस्य प्रयोजनं लक्ष्यते न शुद्धं कर्माऽङ्गविधित्वम्। यत आह 'विद्यया तदारोहन्ती'त्यादि। तथा पुरस्तादपि 'यदेतन्मण्डल' मित्युपक्रम्याऽऽह 'सो ऽमृतो भवती'त्यादि। तत्सामान्यादिहापि तत्त्वम्। नन्वनुबन्धः कथं तर्हि?त्यत आह-भूयस्त्वात्त्वनुबन्धः। तुकारः कर्माङ्गतां व्यावर्तयति॥ ५२॥

आधानादीनामप्यग्न्यवयवानां संपाद्यानां भूयस्त्वाद्बहुत्वादनुकरणे मनश्चिदादीना पुरुषार्थत्वमुक्तं, सम्प्रति पुरुषस्यैवाऽभावादित्याक्षिपति—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एक आत्मनः शरीरे भावात् ॥ ५३ ॥

एके लौकायतिका देहव्यतिरिक्तस्यात्मनो ऽसत्त्वमाहुः । ज्ञानादीनामात्मधर्मत्वेनाऽभिमतानां शरीरे सति भावात् असति चाऽभावात् शरीरस्यैव ज्ञानादयो धर्माः ॥ ५३ ॥

सिद्धान्तमाह—

व्यतिरेकस्तद्भावाऽभावित्वान्न तूपलब्धिवत् ॥ ५४ ॥

देहाऽऽत्मनोर्व्यतिरेकः । कुतः ? तद्भावाऽभावित्वात् । तस्य देहस्य भावे ऽपि ज्ञानचेष्टादीनामभावित्वादसत्त्वात् । अतस्ते न देहधर्माः । तत्र निदर्शनमुपलब्धिवत् । यथा भूतभौतिकानामनुभवनमुपलब्धिर्विषयत्वेन न विषयधर्मो बलादापतति तद्वत् प्राणचेष्टादयो ऽपि न देहधर्माः ॥ ५४ ॥

पूर्वाधिकरणे शरीरात्मनोर्भेदादात्मधर्माणामसम्भवः शरीरइत्युक्तम्, एवमेकशाखान्तोद्गीथधर्माणां प्राणादिदृष्टीनां न हि शाखान्तरीयोद्गीथादिषु प्राप्तिरिति दृष्टान्तेनाक्षिप्य समाधत्ते—

अङ्गाऽवबद्धास्तु न शाखासु हि प्रतिवेदम्॥५५॥

'ओमित्येतदक्षरं लोकेषु पञ्चविध'मित्येवमाद्याः प्रतिवेदमुपासना न शाखास्वेव । उद्गीथादिश्रुत्यविशेषात् । तुशब्दो व्यवस्थानियमभेदार्थः ॥ ५५ ॥

नन्वन्यवेदपठितानां कथमन्यत्र परिग्रह ? इत्यत आह—

मन्त्रादिवद्वा ऽविरोधः ॥ ५६ ॥

वाशब्दः शङ्कानिराकरणार्थः । यथा 'कुरूरसी'ति येषां मन्त्रो न पठितस्तेषामपि तेन मन्त्रेणाऽश्मादानमेवमेवाऽग्नेरित्येवमादिमन्त्राणां यज्ञस्य दानम् । आदिशब्देन प्रयाजादीनां ग्रहणं तद्वत् शाखान्तरीयाणामप्युद्गीथादिधर्माणां ग्रहणे ऽविरोधः ॥ ५६ ॥

पूर्वाधिकरणे उद्गीथादिश्रुत्या सन्निधिं बाधित्वा उद्गीथाद्युपासनानां सर्वशाखासूपयोग उक्तः, एवमन्यत्र व्यस्तोपासनस्य विधिश्रुतेः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

फलश्रुतेश्च समस्तोपासनस्य संनिधानात् प्राप्तं श्रुत्यर्थत्वं बाधित्वा विधेयमिति दृष्टान्तेनाक्षिप्य समाधत्ते—

भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॥ ५७ ॥

भूम्नः प्राचीनशालादिभिरुपास्यस्य समस्तवैश्वानरस्य ज्यायस्त्वं विवक्षितम् । क्रतुवदिति निदर्शनम् । यथा क्रतोर्दर्शपूर्णमासादेः साङ्गस्याऽनुष्ठेयत्वम् । तथा हि दर्शयति । हि यस्मात् यथोक्तमस्माभिस्तथा श्रुतिर्दर्शयति 'मूर्धा त्वेष' इत्यादि ॥ ५६ ॥

पूर्वाधिकरणे सत्यामपि सुतेजस्त्वादिगुणविशिष्टद्युलोकादिवैश्वानरोपासनानां फलभेदश्रुतावुपास्यैक्यमुक्तं तद्वदन्यासामपि ब्रह्मोपासनानामैक्यं स्यादिति दृष्टान्तेनाक्षिप्य समाधत्ते—

नाना शब्दादिभेदात् ॥ ५८ ॥

शाण्डिल्यदहरोपकोशलादिविद्या नाना भिन्ना एव । कुतः ? शब्दादिभेदात् । 'वेदोपासीते'त्यादिशब्दः । आदिशब्देन रूपाऽऽख्यादिभेदस्तस्मात् ॥ ५८ ॥

पूर्वाधिकरणे शब्दान्तरादिप्रमाणादुपास्तीनां भेद उक्त,स्तद्वदिहापि विकल्पसमुच्चयनियमयोः प्रमाणाऽभावात् याथाकाम्यमिति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

विकल्पोऽविशिष्टफलत्वात् ॥ ५९ ॥

साक्षात्कारफलहेतुभूतानां विद्यानां विकल्पः । कुतः ? अविशिष्टफलत्वात् । एकस्य साक्षात्कारफलस्य प्रत्येकं तासां दर्शितत्वात् एकस्मिन् कृते ऽन्यस्य वैयर्थ्यमिति भावः ॥ ५९ ॥

पूर्वाधिकरणे ऽहंग्रहोपासनानामुपास्यसाक्षात्कारपर्यन्तत्वात् विकल्पनियम इत्युक्तम् । तद्वत् प्रतीकोपासनानामपि तस्याऽऽर्थत्वाद् विकल्प इति दृष्टान्तेनाक्षिप्य समाधत्ते—

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुशब्दः काम्यानां विकल्पं व्यावर्तयति। काम्या विद्या यथाकामं काममनतिक्रम्य वर्तनमेव कामाऽनतिक्रममिह समुच्चीयेरन्न वेति तासां समुच्चयो विकल्पो वा इच्छया न पूर्वहेत्वभावात्। पूर्वहेतोः फलैक्यस्य कामस्याऽभावात्। अतः फलभूमार्थिसमुच्चयो नाऽन्यस्य ताश्च 'स य एतमेव वायु'मित्याद्याः ॥ ६० ॥

पूर्वाधिकरणे प्रतीकोपासनानां भिन्नफलत्वाद्यथाकामत्वमुक्तं, फलप्राप्त्यङ्गाश्रितोपासनेषु समुच्चयाऽनियमेन फलभेदस्याऽनैकान्तिकत्वादित्याक्षिपति—

अङ्गेषु यथाश्रयभावः ॥ ६१ ॥

कर्माऽङ्गेषु उद्गीथादिषु यथाश्रयभावः। यथैषामाश्रयाः स्तोत्रादयः संभूय भवन्ति एवं प्रत्यया अपि ॥ ३१ ॥

शिष्टेश्च ॥ ६२ ॥

यथा चाऽऽश्रयाः स्तोत्रादयः त्रिषु वेदेषु शिष्यन्ते एवमाश्रिता अपि प्रत्ययाः ॥ ६२ ॥

समाहारात् ॥ ६३ ॥

'होतुः सदनाद्धैवापि दु(?)रुद्गीथमनुसमाहरती'ति हौत्रात्कर्मण उद्गातुः स्वकर्मणस्तस्य समाहारः समाधानं तस्माल्लिङ्गात् समुच्चयः ॥६३॥

गुणसाधारण्यश्रुतेश्च ॥ ६४ ॥

विद्यागुणं च विद्याश्रयं सन्तमोङ्कारं वेदत्रयसाधारणं श्रावयति 'तेनेयं त्रयी'त्यादिना। अथ वा कर्मगुणानामुद्गीथादीनां सर्वप्रयोगसाधारण्यश्रुतेरपि तदाश्रितानां समुच्चयः ॥ ६४ ॥

समाधत्ते—

न वा तत्सहभावाऽश्रुतेः ॥ ६५ ॥

न वेति समुच्चयाऽनियमव्यावर्तनम्। कुतः? तत्सहभावाऽश्रुतेः। तासामुपासनानां सहभावस्य समुच्चयस्याऽश्रुतेरश्रवणात् ॥ ६५ ॥

नन्वसमुच्चयोऽपि न श्रूयते इत्यत आह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दर्शनाच्च ॥ ६६ ॥

दर्शयत्यपि श्रुतिरसहभाव'मेवं विद्ध वै ब्रह्मे'त्यादिना ॥ ६६ ॥

इति श्रीब्रह्मसूत्रदीपिकायां तृतीया-ऽध्यायस्य तृतीयः पादः ॥

—०*०—

एवं तावत्पूर्वपादे पराऽपरब्रह्मविद्यानां गुणोपसंहारनिरूपणेन परिमाणमवधारितम्, इदानीं तासां कर्मनिरपेक्षाणामेव पुरुषार्थसाधनत्वं निरूप्यते। तत्र ब्रह्मविद्यायाः केवलायाः पुरुषार्थत्वमाह—

पुरुषार्थो ऽतः शब्दादिति बादरायणः ॥१॥

अतो वेदान्तविहितात् ज्ञानात् पुरुषार्थो भवतीति बादरायण आचार्यो मन्यते। कुतः? शब्दात्। 'तरति शोकमात्मवि'दिति श्रुतेः ॥१॥

शेषत्वात्पुषार्थवादो यथान्येष्विति जैमिनिः॥२॥

कर्तृत्वेनात्मनः कर्मशेषत्वात् तद्विज्ञाने कर्माणि वारयति विद्यास्तुतये। कर्माऽनुज्ञानमेतत् व्रीहिप्रोक्षणादिवद्विषयद्वारेण कर्मसम्बन्ध एवेति एतस्मिन्नवगतप्रयोजने या फलश्रुतिः सा ऽर्थवाद इति जैमिनिराचार्यो मन्यते ॥ २ ॥

यथा ऽन्येषु द्रव्यसंस्कारकर्मसु 'यस्य पर्णमयी'त्यादिषु फलश्रुतिरर्थवादस्तद्वत् आत्मविज्ञानस्य कर्माङ्गत्वे न लिङ्ग मित्यत आह—

आचारदर्शनात् ॥ ३ ॥

आचारो जनकादीनां ब्रह्मविदां 'जनको हे'त्यादिना तस्य दर्शनात् ॥ ३ ॥

नन्वयमाचारः श्रुतेरभावे ऽप्रयोजक इत्यत आह—

तच्छ्रुतेः ॥ ४ ॥

तस्या विद्यायाः कर्माङ्गत्वं 'यदेव विद्यये'त्यादिश्रुतेः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्मफले विद्याजन्याऽतिशयाऽभावे न फलोपकार्यङ्गमित्यत आह—

समन्वारम्भणात् ॥ ५ ॥

'तं विद्याकर्मणी समन्वारभेते' इत्यस्मात् ॥ ५ ॥

तथापि कर्मसु प्रवृत्तस्य नाऽऽत्मज्ञानाऽवसर इत्यत आह—

तद्वतो विधानात् ॥ ६ ॥

तद्वतो ज्ञानवत 'एककुटुम्ब' इत्यादिना विधानात् ॥ ६ ॥

तथापि कर्मणां पाक्षिकत्वान्न नित्यवदेव ज्ञानाऽङ्गत्वमित्यत आह—

नियमाच्च ॥ ७ ॥

'कुर्वन्नेवे'त्यादि । चकारो नियमाऽभावेऽपि ज्ञानस्याऽपुरुषार्थत्वमाह ॥ ७ ॥

सूत्रोक्तं राद्धान्तमाह—

अधिकोपदेशात्तु बादरयाणस्यैव तद्दर्शनात् ॥ ८ ॥

तुशब्दो जैमिनीयं मतं व्यावर्तयति । कुतः ? अधिकोपदेशात् । संसारिणो निरुपाधिकस्य परमात्मनः सर्वेषु वेदान्तेषूपदेशात् । यन्मतं बादरायणस्यैवं तत्तथैव स्थितं तद्दर्शनात् । 'यः सर्वज्ञ' इत्यादिभ्यः ॥ ८ ॥

ननूक्तमाचारादित्यत आह—

तुल्यं तु दर्शनात् ॥ ९ ॥

तुशब्दः पूर्वस्याऽऽचारस्य विद्यान्तरविषयत्वमाह ॥ ९ ॥

तुल्यं समाचारस्य दर्शनम् 'एतद्ध स्मे'त्यादिना 'यदेवे'त्यादिश्रुतेरुक्तमित्यत आह—

न सार्वत्रिकी ॥ १० ॥

न सर्वविद्याविषयेयं श्रुतिः, किन्तु प्रकृतोद्गीथविद्याविषयैव ॥१०॥

'तं विद्ये'त्यादिना फले समुच्चय उक्त इत्यत आह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विभागः शतवत् ॥ ११ ॥

विभागो ऽयं न समुच्चयः। विद्यया ऽन्यस्याऽऽरम्भणं, कर्मणा ऽन्यस्य। शतवत्। यथा शतमाभ्यां दीयतामित्यत्र विभागस्तद्वत् ॥१७॥

ननूक्तं तद्वतो विधानादित्यत आह—

अध्ययनमात्रवतः ॥ १२ ॥

न ज्ञानवतः ॥ १२ ॥

यदप्युक्तं नियमाच्चेत्यत आह—

नाऽविशेषात् ॥ १३ ॥

त्वदुक्तं न। 'कुर्वन्नेवे'त्यत्र विदुष इति विशेषस्याऽश्रवणात्॥१३॥

प्रकरणसामर्थ्याद्विद्वानेव सम्बध्यतइत्यत आह—

स्तुतये ऽनुमतिर्वा ॥ १४ ॥

वाशब्दो विदुषः स्तुत्या तेषामवश्याऽनुष्ठेयत्वमाह ॥ १४ ॥

ननु कर्मश्रुतेर्विद्यास्तावकत्वमित्यत्रापि किं नियामकमित्यत आह—

कामकारेण चैके ॥ १५ ॥

अवगतपरमार्थाः प्रजां न कामयन्ते कामकारेणेति श्रुत्यर्थनिर्देशः। चकारो विद्वदनुभवं दर्शयति ॥ १५ ॥

ननु ब्राह्मणादिशरीरे कथं कर्माऽभाव? इत्यत आह—

उपमर्दं च ॥ १६ ॥

क्रियाकारकादेरामनन्ति 'यत्र त्वस्ये'त्यादिना। चकारस्तादृक् प्रत्यक्षं समुच्चिनोति ॥ १६ ॥

तथापि कथं गृहस्थस्य कर्माऽभाव? इत्यत आह—

ऊर्ध्वरेतस्सु च शब्दे हि ॥ १७ ॥

ऊर्ध्वरेतस्सु आश्रमेषु विद्या श्रूयते न तत्र कर्माणि। चकारः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्मिणां विद्याऽनधिकारमाह । अत एव न सन्तीत्यत आह—शब्दे हि । हि यस्मात् 'त्रयो धर्मस्कन्धा' इत्येतस्मिन् शब्दे ऽवगम्यते॥१७॥

पूर्वाधिकरणे उर्ध्वरेतःस्वाश्रमेषु विद्यायाः कर्मनिरपेक्षता उक्ता, इदानीं तएवाऽऽश्रमा न सन्तीत्याक्षिपति । अथ वा पुरुषार्थेऽधिकरणे ज्ञानस्याऽसहायस्य मोक्षफलत्वमुक्तं, तन्न सम्भवति, गृहस्थादीनामपि ब्रह्मनिर्देष्टृत्वस्य संस्थानस्याऽभिधानात् तदनुष्ठितकर्मणा च ज्ञानसहकारित्वप्रतीतेरित्याक्षिप्यते—

परामर्शं जैमिनिरचोदना चाऽपवदति हि॥१८॥

जैमिनिराचार्य'स्त्रयो धर्मस्कन्धा' इत्यादिशब्दनिर्दिष्टफलानामाश्रमाणां परामर्शमात्रं मन्यते । कुतः ? अचोदना । यतः विधायकशब्दाऽभाव इत्यर्थः । ननु विधिः कल्पनीय इत्यत आह-अपवदति हि । यस्माँ'दहरहर्वा' इत्यादिना अपवदति अतो न कल्प्यो विधिः । चकारो गृहस्थस्य प्रसिद्धिविरोधमाह ॥ १८ ॥

परिहरति—

अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥

अनुष्ठेयमाश्रमान्तरं बादरायण आचार्यो मन्यते, वेदे श्रवणात् । न चाऽन्धपङ्ग्वादिविषयत्वम् । तत्कुतः ? साम्यश्रुतेः । गार्हस्थ्येन 'त्रयो धर्मस्कन्धा' इत्यादिना ॥ १९ ॥

ननु तावतापि विधिर्न सिद्ध्येदित्यत आह—

विधिर्वा धारणवत् ॥ २० ॥

वाशब्दो विध्यभावं निराकरोति । विधिरेवाऽयमपूर्वार्थत्वात् धारणवत् । 'उपरि हि देवेभ्यो धारयती'त्यत्र तद्वत् । सति चाऽऽश्रमान्तरे ब्रह्मसंस्थत्वं न कर्मिणामित्यभिप्रायः ॥ २० ॥

एवं तावदनुष्ठेयमान्तरं गार्हस्थ्येन साम्यश्रुतेरित्युक्तं, तर्हि रसतमत्वादीनामङ्गाश्रितत्वेन 'स्वर्गं लोकमाहवनीय' इत्यादिस्तुतिसाम्यात् स्तुत्यर्थत्वमिति प्रत्युदाहरणेन सूत्राऽवयवेनाक्षिप्याऽवयवान्तरेण समाधत्ते—

स्तुतिमात्रमुपादानादिति चेन्नाऽपूर्वत्वात्॥२१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'स एष रसाना रसतम' इत्यादि स्तुतिमात्रं न विधिः। उद्गीथादिकर्माऽङ्गानां स्तावकत्वेनोपादानादिति चेत्तन्न । कुतः ? अपूर्वत्वात् । रसतमाद्यर्थस्य ॥ २१ ॥

ननु विधिकल्पनमेव दोष इत्यत आह—

भावशब्दाच्च ॥२२ ॥

भावशब्दो विधिशब्दः 'उपासीते'त्यादि । चकारो ऽपूर्वाधिगमे कल्पनं न दोष इत्याह ॥ २२

एवं तावत् उद्गीथादेः स्तुत्यर्थत्वात्तावकाशादुपास्यविषयसमर्पकत्वं रसतमत्वादेर्ज्यायः इत्युक्तं, तर्ह्याख्यानानामपि विद्यास्तुत्यर्थत्वात्सावकाशात्पारिप्लवशेषत्वे ज्यायो ऽनुष्ठानपर्यवसानत्वं सम्भवतीति दृष्टान्तेन सूत्राऽवयेवनाक्षिप्य समाधत्ते—

पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥२३॥

'अथ ह याज्ञवल्क्यस्ये'त्याद्याख्यानश्रुतयः पारिप्लवार्था इति चेत् तन्न । कुतः ? 'पारिप्लमाचक्षीते'त्युपक्रस्य 'मनुर्वैवस्वत' इत्यादिना विशेषितत्वात् ॥ २३ ॥

ननूपलक्षणार्थं तद्विशेषणं स्यादित्यत आह—

तथा चैकवाक्यतोपबन्धात् ॥ २४ ॥

चकार उपलक्षणार्थत्वं वारयति । तथा आख्यानानां पारिप्लवार्थत्वे सति सन्निहितविद्योपयोगो न्याय्यस्तद्गतोपाख्यानानाम् । कुतः ? एकवाक्येनोपबन्धनात्, तत्र तत्राऽऽख्यानानां विद्याभिः सम्बन्धस्योपलम्भात् ॥ २४ ॥

पूर्वाधिकरणे आख्यानानां विद्यासन्निधेर्विद्याशेषत्वमुक्तं, तर्हि विद्याप्रकरणे 'यज्ञेने'त्यादिवाक्येन यज्ञादीनां विद्यायां विनियोगात् तेषां विद्याशेषत्वमिति दृष्टान्तेनाक्षिप्य समाधत्ते—

अत एव चाऽग्नीन्धनाद्यनपेक्षा ॥ २५ ॥

चकारः कारणान्तरं व्यावर्तयति । यतो ज्ञानात्पुरुषार्थः अत एव विद्यायाः स्वफले ऽग्नीन्धनादिकर्मणामनपेक्षा ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्मिणां विद्याऽनधिकारमाह । अत एव न सन्तीत्यत आह—शब्दे हि । हि यस्मात् 'त्रयो धर्मस्कन्धा' इत्येतस्मिन् शब्दे ऽवगम्यते॥१७॥

पूर्वाधिकरणे ऊर्ध्वरेतःस्वाश्रमेषु विद्यायाः कर्मनिरपेक्षता उक्ता, इदानीं तएवाऽऽश्रमा न सन्तीत्याक्षिपति । अथ वा पुरुषार्थेऽधिकरणे ज्ञानस्याऽसहायस्य मोक्षफलत्वमुक्तं, तन्न सम्भवति, गृहस्थादीनामपि ब्रह्मनिर्देष्टृत्वस्य संस्थानस्याऽभिधानात् तदनुष्ठितकर्मणा च ज्ञानसहकारित्वप्रतीतेरित्याक्षिप्यते—

परामर्शं जैमिनिरचोदना चाऽपवदति हि॥१८॥

जैमिनिराचार्य'स्त्रयो धर्मस्कन्धा' इत्यादिशब्दनिर्दिष्टफलानामाश्रमाणां परामर्शमात्रं मन्यते । कुतः ? अचोदना । यतः विधायकशब्दाऽभाव इत्यर्थः । ननु विधिः कल्पनीय इत्यत आह–अपवदति हि । यस्माँ'दहरहर्वा' इत्यादिना अपवदति अतो न कल्प्यो विधिः । चकारो गृहस्थस्य प्रसिद्धिविरोधमाह ॥ १८ ॥

परिहरति—

अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥

अनुष्ठेयमाश्रमान्तरं बादरायण आचार्यो मन्यते, वेदे श्रवणात् । न चाऽन्धपङ्ग्वादिविषयत्वम् । तत्कुतः ? साम्यश्रुतेः । गार्हस्थ्येन 'त्रयो धर्मस्कन्धा' इत्यादिना ॥ १९ ॥

ननु तावतापि विधिर्न सिद्ध्येदित्यत आह—

विधिर्वा धारणवत् ॥ २० ॥

वाशब्दो विध्यभावं निराकरोति । विधिरेवाऽयमपूर्वार्थत्वात् धारणवत् । 'उपरि हि देवेभ्यो धारयती'त्यत्र तद्वत् । सति चाऽऽश्रमान्तरे ब्रह्मसंस्थत्वं न कर्मिणामित्यभिप्रायः ॥ २० ॥

एवं तावदनुष्ठेयमान्तरं गार्हस्थ्येन साम्यश्रुतेरित्युक्तं,'तर्हि रसतमत्वादीनामङ्गाश्रितत्वेन 'स्वर्गं लोकमाहवनीय' इत्यादिस्तुतिसाम्यात् स्तुत्यर्थत्वमिति प्रत्युदाहरणेन सूत्राऽवयवेनाक्षिप्याऽवयवान्तरेण समाधत्ते—

स्तुतिमात्रमुपादानादिति चेन्नाऽपूर्वत्वात्॥२१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'स एष रसानां रसतम' इत्यादि स्तुतिमात्रं न विधिः । उद्गीथादिकर्माऽङ्गानां स्तावकत्वेनोपादानादिति चेत्तन्न । कुतः ? अपूर्वत्वात् । रसतमाद्यर्थस्य ॥ २१ ॥

ननु विधिकल्पनमेव दोष इत्यत आह—

भावशब्दाच्च ॥२२ ॥

भावशब्दो विधिशब्दः 'उपासीते'त्यादि । चकारो ऽपूर्वाधिगमे कल्पनं न दोष इत्याह ॥ २२

एवं तावत् उद्गीथादेः स्तुत्यर्थत्वात्सावकाशात्तु उपास्यविषयसमर्पकत्वं रसतमत्वादेर्ज्यायः इत्युक्तं, तर्ह्याख्यानानामपि विद्यास्तुत्यर्थत्वात्सावकाशात्पारिप्लवशेषत्वे ज्यायो ऽनुष्ठानपर्यवसानत्वं सम्भवतीति दृष्टान्तेन सूत्राऽवयेवनाक्षिप्य समाधत्ते—

पारिप्लवार्था इति चेन्न विशेषितत्वात्॥२३॥

'अथ ह याज्ञवल्क्यस्ये'त्याद्याख्यानश्रुतयः पारिप्लवार्था इति चेत् तन्न । कुतः ? 'पारिप्लमाचक्षीते'त्युपक्रम्य 'मनुर्वैवस्वत' इत्यादिना विशेषितत्वात् ॥ २३ ॥

ननूपलक्षणार्थं तद्विशेषणं स्यादित्यत आह—

तथा चैकवाक्यतोपबन्धात् ॥ २४ ॥

चकार उपलक्षणार्थत्वं वारयति । तथा आख्यानानां पारिप्लवार्थत्वे सति सन्निहितविद्योपयोगो न्याय्यस्तद्वतोपाख्यानानाम् । कुतः ? एकवाक्येनोपबन्धनात्, तत्र तत्राऽऽख्यानानां विद्याभिः सम्बन्धस्योपलम्भात् ॥ २४ ॥

पूर्वाधिकरणे आख्यानानां विद्यासन्निधेर्विद्याशेषत्वमुक्तं, तर्हि विद्याप्रकरणे 'यज्ञेने'त्यादिवाक्येन यज्ञादीनां विद्यायां विनियोगात् तेषां विद्याशेषत्वमिति दृष्टान्तेनाक्षिप्य समाधत्ते—

अत एव चाऽग्नीन्धनाद्यनपेक्षा ॥ २५ ॥

चकारः कारणान्तरं व्यावर्तयति । यतो ज्ञानात्पुरुषार्थः अत एव विद्यायाः स्वफले ऽग्नीन्धनादिकर्मणामनपेक्षा ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वाधिकरणे विद्याफले कर्माऽनपेक्षा उक्ता, यथा फले तद्वदुत्पत्तावपि इति दृष्टान्तेनाक्षिप्य समाधत्ते—

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २६ ॥

चकाराद्विद्याया उत्पत्तावनपेक्षत्वं वारयति । सर्वापेक्षा सर्वस्याऽऽश्रमादिकर्मजातस्य विद्याया उत्पत्तावपेक्षा । कुतः ? यज्ञादिश्रुतेः । 'विविदिषन्ती'त्यादिना इच्छायाः । अश्ववदिति योग्यतायां निदर्शनम् । अश्वो रथस्य वहने ऽपेक्षितो न लाङ्गलस्यैवं विद्याया उत्पत्तौ कर्मापेक्षा न ज्ञानफले ॥ २६ ॥

तर्हि कर्माण्येव सन्तु, न ज्ञानोत्पत्तावन्यदनुष्ठेयमित्यत आह—

शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामवश्याऽनुष्ठेयत्वात् ॥ २७ ॥

तुशब्दः शङ्कानिराकरणार्थः । कुतः ? तद्विधेः । तेषां शमादीनाम् इत्याद्युपक्रम्य 'पश्ये'दिति विधेः । स विधिः स्वतन्त्र इत्यत आह—तदङ्गतया । तस्या विद्याया अङ्गत्वेन विधिर्यस्ततो विद्यार्थिनां तेषामवश्याऽनुष्ठेयत्वादन्तरङ्गसाधनत्वं तेषाम् ॥ २७ ॥

पूर्वाधिकरणे विविदिषन्तीति पञ्चमलकाराऽश्रयणेन विधिरुक्तः, एवं चा'ऽन्नं भवती'ति विधिरिति दृष्टान्तेनाक्षिप्य समाधत्ते—

सर्वान्नाऽनुमतिश्च प्राणात्यये तद्दर्शनात् ॥२८॥

'न ह वा एवंविदी'त्यादिना सर्वाऽन्नानुमतिरनुज्ञाता, सापि प्राणात्यये परस्यामापदि । कुतः ? तद्दर्शनात् । तस्य प्राणाऽत्यये सर्वान्नभक्षणस्य 'मटचीहतेष्वि'त्यादिना दर्शनात् ॥ ३८ ॥

ननु श्रुतस्य कस्मात्सङ्कोचः क्रियते ? इत्यत आह—

अबाधाच्च ॥ २९ ॥

'आहारशुद्धौ सत्त्वशुद्धि'रित्यादेः शास्त्रस्य । चशब्दाच्छिष्टाऽऽचारस्य च ॥ २६ ॥

ननु शास्त्रद्वयं विद्वदविद्वद्विषयं भवत्वित्यत आह—

अपि च स्मर्यते ॥ ३० ॥

'जीवितात्ययमापन्नो यो ऽन्नमत्ति यतस्ततः' इत्यादिना साधारण्यमपिशब्दो दृश्यते ऽपीत्याह ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ननु निषेधाऽभावे नेदं बुद्धिसामर्थ्यात्कल्पयितुं शक्यमित्यत आह—

शब्दश्चातो ऽकामकारे ॥ ३१ ॥

अकामकारः कामकारनिवृत्तिप्रयोजनः कठानां 'तस्माद् ब्राह्मणः सुरां न पिबेदि'ति सर्वान्ननिषेधकशब्दः । अतो ऽस्माद्विधेरभावात्सो ऽप्युपपन्नः । चकारो लौकिकं प्रतिषेधमाह ॥ ३१ ॥

पूर्वाधिकरणे यथा शास्त्रान्तराविरोधात् सर्वत्र वचनं विद्यायाः स्तावकमुक्तं तद्वद्विविदिषावचनमपि विद्यायाः स्तावकमिति । अन्यथा कर्मणामनेकत्वाऽभावात् मुमुक्षोरेवाऽनुष्ठेयत्वमिति दृष्टान्तेनाक्षिप्य समाधत्ते—

विहितत्वाच्चाऽऽश्रमकर्मापि ॥ ३२ ॥

चकारस्त्वर्थे । स हि मुमुक्षोरेव नाऽनुष्ठेयत्वं कर्मणां वारयति, किं त्वनुष्ठेयं मुमुक्षूणामप्याश्रमकर्माऽग्निहोत्रादिकम् । कुतः ? विहितत्वात् । 'यावज्जीवमग्निहोत्र'मित्यादिना । एवं चेद्विद्यासाधनानि न स्युरित्यत आह—

सहकारित्वेन च ॥ ३३ ॥

सहकारित्वं साधनत्वं 'यज्ञेने'त्यादिना विद्यासाधनत्वेनापि विहितत्वादित्यर्थः ॥ ३३ ॥

ननु तर्हि दर्शपौर्णमासादीनां विद्यासहकारित्वपक्षे कर्मभेदो ऽत आह—

सर्वथापि तएवोभयलिङ्गात् ॥ ३४ ॥

ते एवाऽग्निहोत्रादयो धर्मा अनुष्ठेयाः । कुतः ? उभयलिङ्गात् । श्रुतिस्मृतिलिङ्गात् । 'विविदिषन्ती'त्यादिश्रुतिः । 'अनाश्रितः कर्मफल'मित्यादिका स्मृतिः । अत एव हि प्रसिद्धवदुत्पन्नानां कर्मणां विनियोगं कुर्वन्ति । अथ वा वेदकत्वं लिङ्गं तस्मात् ॥ ३४ ॥

ननु साधनसम्पन्नस्य यदि विद्यायां कश्चनाऽतिशयः श्रुतो वा स्यात् तदा यज्ञादीनां सहकारित्वं कल्प्यमानमुचितं स्यादित्यत आह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनभिभवं च दर्शयति ॥ ३५ ॥

'एष ह्यात्मा न नश्यति यं ब्रह्मचर्येणे'त्यादिना । अत्र प्रत्यक्षमप्याह ॥ ३५ ॥

पूर्वाधिकरणे नित्यानां यज्ञादीनां विद्यायाः पृथग्विनियोगात् न नित्याऽनित्यसंयोगविरोध इत्युक्तं, मा भूत् गृहस्थाऽऽश्रमकर्मणि विरोधः, विधुरादिके तु स्यादित्याक्षिप्य समाधत्ते—

अन्तरा चापि तु तद्दृष्टेः ॥ ३६ ॥

अन्तरा विधुरादीनामन्तरालवर्तिनां विद्यायामधिकारः । कुतः ? तद्दृष्टेस्तस्याऽधिकारस्य रैक्वादिषु दृष्टेः । तुकारस्त्वन्तरालवर्तिनामनधिकारं व्यावर्तयति । चकारो ऽन्येषामप्यधिकारं समुच्चिनोति ॥ ३६ ॥

नन्विदं दर्शनमस्मार्तमित्यत आह—

अपि च स्मर्यते ॥ ३७ ॥

संवर्तप्रभृतीनामन्तरालवर्तिनां महायोगित्वं पुराणादौ ॥ ३७ ॥

ननु कर्महीनानामशुद्धाऽन्तःकरणानां कथं विद्यायामधिकारः ? इत्यत आह—

विशेषाऽनुग्रहश्च ॥ ३८ ॥

तेषामपि जपोपवासादि कर्मविशेषैरनुग्रहः । चकाराज्जन्मान्तरकृतैरपि ॥ ३८ ॥

एवं चेदाश्रमकर्मणामनुष्ठानं व्यर्थमित्यत आह—

अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३९ ॥

तुशब्द आश्रमकर्मणामनुष्ठानस्याऽवैयर्थ्यमाह । अतो ऽन्तरालवर्तित्वादितरदाश्रमवर्तित्वं ज्यायः श्रेष्ठं विद्यासाधनम् । कुतः ? श्रुतिस्मृतिलिङ्गाच्च । श्रुतिर्लिङ्ग'मनाश्रमी न तिष्ठे'दित्यादि तस्मात् । चकारस्ताभ्यां विहितत्वमप्याह ॥ ३९ ॥

पूर्वाधिकरणे ऽनाश्रमकर्मिणामपि विद्यासाधनत्वमुक्तम्, 'एवं चेदाश्रमभ्रष्टानामपि तद्वदेवाऽनाश्रमिकत्वेन विद्यासाधनत्वमिति दृष्टान्तेनाक्षिप्य समाधत्ते—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद्भूतस्य तु नाऽतद्भावो जैमिनेरपि नियमाऽतद्रूपाऽभावेभ्यः ॥ ४० ॥

तुशब्द उत्तमाऽऽश्रमाऽधिरूढस्याऽऽमरणं तस्मिन्नेवाऽवस्थानमाह। तद्भूतस्य संन्यासाश्रमाऽऽश्रमिणां ऽतद्भावः अतदाश्रमाऽवस्थितिस्तत्परित्यागमात्रं वा नेति जैमिनेराचार्यस्य मतं, किमु बादरायणस्य। कुतः ? नियमाऽतद्रूपाऽभावेभ्यः। नियम'स्ततो न पुनरिया'दिति। अतद्रूपं यथा ब्रह्मचर्यादाश्रयत्रयगमनं तद्रूप्यते शब्देनैव संन्यासादिभ्य आश्रमान्तरम्। अभावश्च शिष्टाचारस्य संन्यासादीनां गार्हस्थ्यस्वीकारस्तेभ्यः ॥ ४० ॥

पूर्वाधिकरणं शास्त्राऽभावान्न तत्प्रत्यवरोहित्वमित्युक्तं, तद्वदेव शास्त्राऽभावान्न तेषां प्रायश्चित्तमपीत्याक्षिपति—

न चाऽऽधिकारिकमपि पतनाऽनुमानात् तदयोगात् ॥ ४१ ॥

अधिकारलक्षणे षष्ठाऽध्याये उक्तमाधिकारिकम्, अब्रह्मचारी पशुश्च तद्वदाधानस्याऽप्राप्तकालत्वादिति अवकीर्णी 'अथ यो ब्रह्मचारी स्त्रियमुपेयात्स गर्दभं पशुमालभेते'ति ब्रह्मचारिणः स्त्रीगमने गर्दभः पशुः। सोपि तद्वदुपनयनहोमवत्। यथोपनयनहोमो लौकिकाग्नौ तद्वत् अयमपि पशुर्लौकिक एव। कुतः ? आधानस्य दारसंग्रहपुरःसरस्य ब्रह्मचारिणो ऽप्राप्तत्वादिति यदुक्तं तदपि न नैष्ठिकब्रह्मचारिण एवं प्रायश्चित्तम्। कुतः ? 'आरूढो नैष्ठिकं धर्म'मित्यादिना अप्रतिसन्धेयस्य पतनस्याऽनुमानात् स्मरणात् छिन्नशिरस इव प्रतिक्रियाऽभावान्नैष्ठिकस्य प्रायश्चित्ताऽयोगादिति पूर्वपक्षः ॥ ४१ ॥

राद्धान्तमाह—

उपपूर्वमपि त्वेके भावमशनवत्तदुक्तम् ॥४२॥

तुशब्दः प्रायश्चित्ताऽभावं व्यावर्तयति। एके आचार्या गुरुदारादिभ्यो ऽन्यत्र ब्रह्मचर्यच्यवनमुपपूर्वमपि उपपातकमप्याहुः, कि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुत प्रायश्चित्तस्य सत्त्वम् । अतः प्रायश्चित्तस्य भावं मन्यामहे । अशनवत् । यथा मधुमांसादिभक्षणे उपकुर्वाणस्य पुनःसंस्कारः प्रायश्चित्तं तद्वत् । तदुक्तं प्रमाणलक्षणे 'समा विप्रतिपत्तिः स्यात्' यववराहादिकारणपूर्वपक्षे आर्यम्लेच्छयोर्यववराहादिषु 'समा विप्रतिपत्तिः स्यात्' इति सूत्रं सिद्धान्तितम् । तेन यववराहादिशब्दानामार्यप्रसिद्धानामेव स्वीकार इत्येतदर्थं सूत्रं 'शास्त्रस्था वा तन्निमित्तत्वा'दिति । वाशब्दो म्लेच्छप्रसिद्धिं व्यावर्तयति । शास्त्रस्थैवार्यप्रसिद्धिः स्वीकरणीया । कुतः ? तस्य शास्त्रस्य यत्रा'ऽन्या ओषधयो म्लायन्ते' इत्यादेर्निमित्तत्वात् नियामकत्वात् । अथ वा तस्याऽर्थस्य प्रसिद्धेः शब्दार्थसंगतिग्रहणे निमित्तत्त्वात् ॥ ४२ ॥

पूर्वाधिकरणे आरूढपतितानामपि प्रायश्चित्तमस्तीत्युक्तं, प्रायश्चित्तवद्व्यवहारोऽपि तेषां स्यादिति दृष्टान्तेनाक्षिप्य समाधत्ते—

बहिस्तूभयथा ऽपि स्मृतेराचाराच्च ॥ ४३ ॥

तुशब्दः कृतप्रायश्चित्ते व्यवहाराऽभाव माह । यद्यवकीर्णित्वमुपपातकं यदि वा महापातकम् उभयथापि शिष्टैस्ते कृतप्रायश्चित्ता अपि बहिष्कार्याः । कुतः? स्मृतेराचाराच्च । स्मृति'रारूढपतित'मित्याद्या । आचारः शिष्टानाम् । चकारात्प्रायश्चित्ताभिधानादपि ॥४३॥

पूर्वाधिकरणे वचनादव्यवहार्यत्वमुक्तं तद्व'द्वर्षति हे'ति वचनादङ्गावबद्धमुपासनं स्वामिन इति दृष्टान्तेनाक्षिप्य समाधत्ते—

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४४ ॥

अङ्गावबद्धान्युपासनानीति स्वामिनो यजमानस्य कर्माणीत्यात्रेय आचार्यो मन्यते । हेतुमाह–फलश्रुतेरिति । 'वर्षति हास्मै'त्यादेरिति पूर्वपक्षः ॥ ४४ ॥

राद्धान्तस्तु—

आर्त्विज्यमित्यौडुलौमिस्तस्मै हि परिक्रीयते ॥ ४५ ॥

आर्त्विज्यमित्यौडुलोमिराचार्यो मन्यते । हि यस्मात् तस्मै साङ्गकर्मसिद्ध्यर्थं यजमानेनर्त्विक् परिक्रीयते ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वाधिकरणे 'बको दाल्भ्य' इति वाक्यशेषादङ्गोपासनश्रुतिवत्क्रमेत्युक्तम्, एवमिहापि विधिरहितवाक्यशेषा'दथ मुनि'रिति दृष्टान्तेनाक्षिप्य समाधत्ते—

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४६ ॥

सहकार्यन्तरस्य मौनस्य बाल्यपाण्डित्यवद्विधिरेवाश्रयणीयः। यदत्रोक्तं तन्मौनमित्यत आह—तृतीयं बाल्यं पाण्डित्यं चोक्तम्। कस्यैत?दित्यत आह—तद्वत 'आत्मानं विदित्वे'त्यादिनोक्तो यः संन्यासी तद्वान् विद्यावान् तस्य चेद्यर्थं विधानमित्यत आह—पक्षेणेति। भेददर्शनस्य प्राबल्यं तस्मिन्पक्षे इत्यर्थः। सहकारिविधाने निदर्शनं विध्यादिवत्। यथा पौर्णमासादावाधानादिकं तद्वत् ॥४६॥

विद्यावांश्चेत् संन्यस्यति तर्हि कस्मात् छान्दोग्ये 'कुटुम्ब' इत्यादिना गृहस्थेनोपसंहार इत्यत आह—

कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ४७ ॥

तुशब्दो विशेषणार्थः। कृत्स्नभावोऽस्य विशेष्यते बहुलाऽऽयासानि हि बहून्याश्रमकर्माणि यज्ञादीनि तं प्रति कर्तव्यतयोपदिष्टानि। आश्रमान्तरकर्माणि च यथासम्भवमहिंसेन्द्रियसंयमादीनि तस्यापि विद्यन्ते। तस्मात् गृहमेधिनोपसंहारो न विरुध्यते ॥ ४७ ॥

ननु यथा ब्रह्मचारिवानप्रस्थयोरश्रौतत्वं तद्दृष्टान्तेनेतरस्याप्यस्त्वश्रौतत्वमित्यत आह—

मौनवदितरेषामप्युपदेशात् ॥ ४८ ॥

इतरेषां ब्रह्मचारिवानप्रस्थाश्रमवृत्तीनामप्युपदेशात् 'त्रयो धर्मस्कन्धा' इत्यादिना। किंवत्? मौनवत्। संन्यासिमात्रोपलक्षणमेतत् गृहस्थस्यापि संन्यासिवत् गृहस्थवत् ब्रह्मचारिवानप्रस्थयोरपि श्रौतत्वमेव स्यादित्यर्थः ॥ ४८ ॥

पूर्वाधिकरणे मौनशब्दस्य ज्ञानाऽतिशये प्रसिद्धत्वात् मौनविधिराश्रितः, एवं बालशब्दस्यापि कामचारादिकारिणि प्रसिद्धत्वात् अत्रापि स एवार्थ इति दृष्टान्तेनाक्षिप्य समाधत्ते—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनाविष्कुर्वन्नन्वयात् ॥ ४९ ॥

'बाल्येन तिष्ठासे'दित्यत्र बाल्येनाऽवस्थानं नाम एतत् यद्रागद्वेषादि अनाविष्कुर्वन् न तु कामचारादि । कुतः ? रागादिराहित्ये विद्योपकारस्याऽन्वयात् ॥ ४६ ॥

पूर्वाधिकरणे विद्योपयोगान्न रागादिकं बालशब्दार्थः सम्भवादित्युक्तम् अत्रापि युक्तं, विद्यानां फलस्येह लोके एव सम्भवात् ऐहिकफला विद्येति दृष्टान्तेनाक्षिप्य समासत्ते—

ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५० ॥

कर्मान्तरेणाऽसति प्रतिबन्धे ऐहिकमस्मिन्नेव जन्मनि विद्याफलं कर्मान्तरेण सति प्रतिबन्धे जन्मान्तरे ऽपि विद्या जायते । कुतः ? गर्भस्थ एव वामदेवः प्रतिबुबुधे ब्रह्माऽहमभवामिति वदन्तो जन्मान्तरे संचितात्तु साधनाज्जन्मान्तरे विद्योत्पत्तिं दर्शयन्ति ॥ ५० ॥

पूर्वाधिकरणे विद्याया ऐकरूप्येपि यज्ञादीनां साधनानामनेकरूपता इह वा स्यादित्युक्तं, तर्हि अनियतसाधनत्वान्मोक्षोप्यनियत एव स्यात् कर्मफलवदिति दृष्टान्तेनाक्षिप्य समाधत्ते—

एवं मुक्तिफलाऽनियमस्तदवस्थाऽवधृते-
स्तदवस्थाऽवधृतेः ॥ ५१ ॥

यथा विद्यासाधनानां विद्याफले विशेष इह परत्र चेति नैवं मुक्तिलक्षणे फले । कुतः ? तदवस्थाऽवधृतेः । मोक्षाऽवस्थायां ब्रह्मरूपाया एकरूपत्वेना 'ऽस्थूलमन'ण्वित्यादिना ऽवधृतेरवधारणात् । पदाभ्यासो ऽध्यायपरिसमाप्त्यर्थः ॥ ५१ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याऽऽनन्दात्मपूज्यपादशिष्यस्य श्रीशङ्करानन्दभगवतः कृतौ ब्रह्मसूत्रदीपिकायां तृतीयाऽध्यायस्य चतुर्थः पादः ॥

संपूर्णश्च तृतीयो ऽध्यायः ।

———:o:———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृतीये ऽध्याये साधनचिन्ता वृत्ता। चतुर्थे फलचिन्ता प्रवर्तते। तत्रापि प्रथमेन पादेन जीवन्मुक्तिः प्रतिपाद्यते। तत्राप्यात्मेत्याद्यधिकरणचतुष्टयं प्रासङ्गिकम्, अन्यत्तु साधनाध्यायशेषमपि प्रमाणफलत्वेनाऽत्र फलाध्याये सङ्गतं, तत्राहंग्रहोपासनानां श्रवणादीनां चाऽर्थसिद्धा ऽऽवृत्तिरित्याह—

आवृत्तिरसकृदुपदेशात् ॥ १ ॥

प्रत्ययानामावृत्तिः करणीया। कुतः? 'श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इत्यादिना ऽसकृदुपदेशात् ॥ १ ॥

ननु श्रवणादीनां प्रत्येकं सकृत् श्रवणे प्रत्ययावृत्तिः कथं सिद्ध्यती?त्यत आह—

लिङ्गाच्च ॥ २ ॥

'रश्मींस्त्वं पर्यावर्तयता'दित्यादेः। चकाराद्दर्शनसामर्थ्यादपि॥२॥

पूर्वाधिकरणे आत्मज्ञानाऽऽवृत्तिः करणीयेत्युक्तं, तत्र जीवो नित्यप्रत्यक्षः, नित्याऽपरोक्ष एवाऽऽत्मा कस्य ज्ञानस्यार्थनियमावृत्ति?रित्याक्षिप्य समाधत्ते—

आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥

तुशब्दो ऽन्यत्र त्वंग्रहं व्यावर्तयति। 'यो ऽयं परमात्मेति त्वं वा अहमस्मी'त्यादिना च उपगच्छन्ति गृह्णन्ति च ग्राहयन्त्यपि च। 'एष त आत्मे'त्यादिना ॥ ३ ॥

पूर्वाधिकरणे जीवपरमात्मनोरभेदग्रह उक्तः 'एष त आत्मे'त्यादिश्रुत्या, तद्वदात्मनो ब्रह्मेत्यादावपि प्रतीकेष्वभेदग्रह इति दृष्टान्तेनाक्षिप्य समाधत्ते—

न प्रतीके न हि सः ॥ ४ ॥

प्रतीकोपासने 'मनो ब्रह्मे'त्यादौ नात्मेति ग्रहीतव्यम्। हि यस्मात् स उपासको नात्मत्वेन प्रतीकानि ग्रहीतुं शक्तः ॥ ४ ॥

पूर्वाधिकरणे 'मनो ब्रह्मे'त्यादौ नैका दृष्टिरित्युक्तम्। एवं चेन्नियामकाऽभावात् ब्रह्मणि मनआदिदृष्टिः करणीयेति बुद्धिसान्निध्यादाक्षिप्य समाधत्ते—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥

मनआदौ ब्रह्मदृष्टिः कार्या ब्रह्मण उत्कर्षात् । उत्कृष्टदृष्टौ निकृष्टे कृतायां निकृष्टस्योत्कृष्टता भवति ॥ ५ ॥

आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥

उद्गीथाद्यङ्गेऽषु आदित्यादिमतयः कर्त्तव्याः। कुतः ? उपपत्तेः । एवं ह्युद्गीथादीनामादित्यादिमतिसंस्कारे कर्मण्यतिशयः स्यात् । चकारो नादित्यादिषु उद्गीथादिमतय इत्याह । एतच्चतुष्टयं प्रासङ्गिकम् ॥ ६ ॥

पूर्वाधिकरणे आदित्यादिमतय उद्गीथादिसंस्कारत्वेन करणीया इत्युक्तं, तासु यथा कामपरतन्त्रत्वात् नाऽऽसननियम एवमन्यास्वपि विद्यासु अविशेषादिति बुद्धिस्थत्वेन दृष्टान्तेनाक्षिप्य समाधत्ते—

आसीनः सम्भवात् ॥ ७ ॥

प्रतीकाद्युपासनेष्वासीन एवोपासनां कुर्यात् । कुतः ? सम्भवात् । प्रत्ययावृत्तेरुपविष्टस्य ॥ ७ ॥

ननूपासनस्य निर्गुणब्रह्मज्ञानवदानियतिरासनस्य कुतो न स्यादित्यत आह—

ध्यानाच्च ॥ ८ ॥

ध्यायत्यर्थ एष यत्समानप्रत्ययप्रवाहकरणं, ध्यायतिश्च प्रशिथिलाङ्गचेष्टेषु प्रतिष्ठितदृष्टिष्वेकविषयाक्षिप्तचित्तेषु बकादिषु दृष्टः । चकार आसीनस्य नियममाह ॥ ८ ॥

ननु गच्छतामपि ध्यायत्यर्थः सम्भवी इत्यत आह—

अचलत्वञ्चापेक्ष्य ॥ ९ ॥

'ध्यायतीव' पृथिवीत्याद्युक्तं, चकारो गमनध्यानयोरितरेतरव्याहतिरित्याह ॥ ९ ॥

ननु किमिदं यौक्तिकमेवेत्याशङ्क्य नेत्याह—

स्मरन्ति च ॥ १० ॥

'शुचौ देशे' इत्यादिना चकारात्पठन्त्यपि 'त्रिरुन्नत'मित्यादिना ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वाधिकरणे आसीनेन समानप्रत्ययप्रवाहः करणीयः, सम्भवादित्युक्तं, अत्रापि वैदिकत्वेन दिग्देशादिनियमः सम्भावित इति दृष्टान्तेनाक्षिप्य समाधत्ते—

यत्रैकाग्रता तत्राऽविशेषात् ॥ ११ ॥

दिग्देशकालेषु न नियमः। यत्र यस्यां दिशि यस्मिन्काले वा मनःस्वास्थ्यं तत्रैवोपासनम्। कुतः ? अविशेषात्। विशेषाऽनुपालम्भात् ॥ ११ ॥

पूर्वाधिकरणे दिग्देशाद्यनियम उक्तश्चित्तप्रसादाऽविशेषेण हेतुना, तथा कास्यानामपि यावदिच्छं चिन्तनीयमिति दृष्टान्तेनाक्षिप्य समाधत्ते—

आ प्रायणात्तत्रापि हि दृष्टम् ॥ १२ ॥

अभ्युदयफलानां प्रत्ययानामा प्रायणात् आ मरणाद्वृत्तिः। हि यस्मात् तत्रापि मरणे ऽपि 'यच्चित्त' इत्यादिश्रुतिभ्यः 'यं यं वापी'-त्यादिस्मृतिभ्यश्च प्रत्ययावर्तनं दृष्टम्। अपिशब्दात्पूर्वमपि सातत्ये 'सदा तद्भावभावित' इत्यादिस्मृतिभ्यः ॥ १२ ॥

पूर्वाधिकरणे 'सदा तद्भावभावित' इत्यादिस्मृत्या आ प्रायणादभ्युदयप्रत्ययानामावृत्तिरुक्ता, तद्वदत्रापि 'प्रकृतिस्त्वां नियोक्ष्यति' 'नाऽभुक्तं क्षीयते कर्मे'त्यादिस्मृतिभ्यो विदुषो ब्रह्मज्ञानान्नोत्तराऽघाश्लेषः, न च पूर्वस्य विनाश इति दृष्टान्तेनाक्षिप्य समाधत्ते—

तदधिगम उत्तरपूर्वाऽघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ १३ ॥

तस्य ब्रह्मणो ऽधिगमे उत्तराऽघस्याऽश्लेषः पूर्वाऽघस्य विनाशः। कुतः ? तद्व्यपदेशात्। तयोरश्लेषविनाशयोर्व्यपदेशः अश्लेषस्य 'तद्यथा पुष्करपलाशे' इत्यादिना विनाशस्य 'तद्यथेषीकातूल' इत्यादि, तस्मात् ॥ १३ ॥

पूर्वाधिकरणेष्वघाऽश्लेषविनाशावुक्तौ भवेतां, मास्तु सुकृतस्याऽभुक्तस्येत्याक्षिप्य समाधत्ते—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥

इतरस्य सुकृतस्यापि यथा दुष्कृतस्यैवमघाऽसंश्लेषः। एतदुपलक्षणं विनाशस्यापि 'उभे उ हैवैष तरती'त्यादिश्रुतेः। तुशब्दोऽवधारणार्थः। पाते शरीरस्य पतने यत इदं सिद्धं शरीरस्य पाते विदुषो मुक्तिर्भवत्येव ॥ १४ ॥

पूर्वाधिकरणे सुकृतस्यापि क्षय उक्तः, तथा च सद्यः शरीरपातः स्यादित्याक्षिप्य समाधत्ते—

अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ १५ ॥

तुशब्द आरब्धकार्ययोः क्षयं व्यावर्तयति। द्वे पूर्वसुकृतदुष्कृते ते अनारब्धकार्ये। तयोरपि इतरयोरिव क्षयं व्यावर्तयति एवकारः। कुतोऽयं नियम? इत्याह—तदवधेः। तस्य शरीरपातस्याऽवधेः कारणात् 'तस्य तावदेव चिर'मित्यादिवाक्येन ॥ १५ ॥

पूर्वाधिकरणत्रयेण सगुणविद्यायां निर्गुणविद्यायां चाऽनारब्धकार्ययोः सुकृतदुष्कृतयोः क्षय उक्तः, तत्र यथा निर्गुणविद्यायामुत्पन्नायामग्निहोत्राद्यनुपयोगः एवं सगुणायामपीति दृष्टान्तेनाक्षिप्य समाधत्ते। अथ वा पूर्वाधिकरणे काम्यस्य सुकृतस्य क्षय उक्तः, काम्यवन्नित्यस्यापि विद्यया क्षयसम्भवात् न विद्याया हेतुत्वमित्याक्षिप्य समाधत्ते—

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ १६ ॥

तुशब्दो नित्यस्याऽग्निहोत्रादेः कर्मणः क्षयं व्यावर्तयति। नित्यमग्निहोत्रादि तत्तस्या विद्यायाः कार्यायैव मोक्षायैव परम्परया ऽऽहुतेस्तद्दर्शनात् तस्याऽग्निहोत्रादेर्विद्याकार्यत्वस्य 'तमेत'मित्यादेर्दर्शनात्। किंविषयं पुनरिदमश्लेषविनाशवचनं किंविषयं वाऽऽदौ विनियोगवचनम् एकेषां शाखिनां 'तस्यपुत्रा दायमुपयन्ती'त्यादि? अत उत्तरं पठति—

अतोन्याऽपि ह्येकेषामुभयोः ॥ १७ ॥

अतोऽग्निहोत्रादेर्नित्यात्कर्मणोऽन्यापि ह्यस्ति साधुकृत्या फलमभिसंधाय क्रियते तस्या विनियोग एवमुक्तः। एकेषां शाखिनां 'सु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदः साधुकृत्या' मिति, तस्या एवेदं संश्लेषविनाशनिरूपणमितरस्याप्येवमित्यादिना। तथैकजातीयस्य काम्यस्य कर्मणो विद्यां प्रत्युपकारकत्वे संमतिरुभयोरपि जैमिनिबादरायणयोराचार्ययोः॥१८॥

पूर्वाधिकरणे विद्याऽङ्गत्वेन कर्माऽनुष्ठेयमित्युक्तं, तद्वदङ्गाऽवबद्धेष्वप्युपासनेषु नित्यकर्माऽनुष्ठानं तत्सहितमेवेति दृष्टान्तेनाक्षिप्य समाधत्ते—

यदेव विद्ययेति हि ॥ १७ ॥

विद्यासहितं तद्रहितं च कर्म विद्याङ्गम्। हि यस्मात् 'यदेव विद्यये'ति वाक्यान्तरात् कर्मणो विद्यायोगे ऽति शयमाह, न तु कर्मणो ऽफलत्वे वचनमिदं सार्थकम् ॥ १८ ॥

पूर्वाधिकरणे ऽङ्गावबद्धोपासनासहितस्य कर्मणः फलाधिक्यं तस्य केवलस्य ब्रह्मविद्यासाधनत्वं सामर्थ्यादित्युक्तम्, एवमत्रापि सामर्थ्यादारब्धकार्ययोरपि प्रकारान्तरेण क्षयाऽभावात् ब्रह्मज्ञानादेवोपक्षय इति दृष्टान्तेनाक्षिप्य समाधत्ते—

भोगेन त्वितरे क्षपयित्वा संपद्यते ॥ १९ ॥

भोगेन भोगेनैव इतरे सुकृतदुष्कृते आरब्धकार्ये क्षपयित्वा ऽनन्तरं सम्पद्यते ब्रह्म 'तस्य तावदेव चिर'मित्यादिश्रुतेः ॥१९॥

इति श्रीब्रह्मसूत्रदीपिकाया चतुर्थाऽध्यायस्य प्रथमः पादः।

———;o:———

प्रथमपादे सगुणनिर्गुणविद्याविदो ऽनारब्धकार्ययोः क्षयः प्रारब्धकार्ययोर्यावदवस्थानं तावन्न मुक्तिः तत्क्षये च विदेहकैवल्यमिति स्थितं, द्वितीये तयोर्न सगुणविदः करणानां लये नाऽविद्वदुत्क्रान्तौ कश्चन विशेष इत्युच्यते। ततश्च तमेव क्रममाश्रित्य वाचो वृत्तेर्लयमाह—

वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥

'अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवताया'मित्यत्रात्र वृत्तिर्मनसि संपद्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

-कस्मात्? दर्शनात्। मरणादेव वाचः प्रथमोपसंहारस्य वृत्तिवृत्ति-मतोरभेदेन वाङ्मनसि शब्दात्। च कारो ऽप्रकृतत्वमाह ॥ १ ॥

अत एव च सर्वाण्यनु ॥ २ ॥

'इन्द्रियैर्मनसि संपद्यमानै'रित्यत्र सर्वाणीन्द्रियाणि वृत्तिभिर्म-नो ऽनुवर्त्तन्ते अत एव दर्शनात् शब्दाच्चेति। चकारो ऽत्रापि पूर्ववत् ॥ १ ॥

पूर्वाधिकरणे मनसो वाचः कारणत्वाऽभावात् तत्र तस्याः सर्वा-त्मना न लय इत्युक्तम्, अत्र तु मनसः परम्परया विकारत्वादभूते प्राणे लयः स्यादिति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

तन्मनः प्राणउत्तरात् ॥ ३ ॥

उक्तं मनो वृत्त्या प्राणे विलयिते। कुतः? 'मनः प्राणे' इत्युत्त-राद् वाक्यात् ॥ ३ ॥

पूर्वाधिकरणे प्राणस्याऽविकारत्वात् विकारे विकाराणां न सर्वा-त्मना लय इत्युक्तं न्यायेन, अत्र तु न्यायाऽभावात् 'प्राणस्तेजसी'ति श्रुतेस्तेजस्येव तस्य लय इति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

सो ऽध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥

स प्राणस्तदध्यक्षे जीवे वृत्त्या प्रलीयते तस्मिन्नध्यक्षे प्रविलय-स्या'ऽऽत्मानमन्तकाले सर्वे प्राणा अभिसमायन्ती'त्यादिना ऽभ्यु-पगमादविशेषेण। आदिशब्देन 'तमुत्क्रामन्तं सर्वे प्राणा' इत्यादि-विशेषादपि ॥ ४ ॥

कथं तर्हि 'प्राणस्ते जसी'ति श्रुति?रित्यत आह—

भूतेषु तच्छ्रुतेः॥ ५ ॥

स प्राणसंवृत्तो ऽध्यक्षस्तेजःसहचरितेषु भूतेषु देहवीजभूतेषु सूक्ष्मेषु व्यवतिष्ठतइत्यवगन्तव्यं 'प्राणस्तेजसी'ति श्रुतेः ॥ ५ ॥

एककस्मिंस्तेजसि श्रुतेः कथं तेजःसहचारितेषु भूतेषु? इत्यत आह—

नैकस्मिन् दर्शयतो हि ॥ ६ ॥

नैकस्मिन्नेव तेजसि शरीरान्तरप्राप्तिवेलायां जीवो ऽवतिष्ठते। कुतः? हि यस्मात् दर्शयतः श्रुतिस्मृती 'पृथवीमय' इत्याद्या श्रुतिः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मृति 'रयं व्योममात्रा' इत्याद्या। प्रश्नप्रति वचने च 'आपः पुरुषवचस' इति ॥ ६ ॥

पूर्वाधिकरणे प्राणस्यात्मद्वारा तेजसि वृत्तिलय उक्तः, स विदुष एवेत्याक्षिप्य समाधत्ते—

समाना चासृत्युपक्रमादमृतत्वं चाऽनुपोष्य ॥ ७ ॥

समाना चैवोत्क्रान्ति'र्वाङ् मनसी'त्याद्या विद्वदविदुषोरासृत्युप्रक्रमात् आ उत्तरमार्गोपक्रमात्। ननु विदुषो ऽमृतत्वं प्राप्तस्य कुतो गमन?मित्यत आह–अमृतत्वं चाऽनुपोष्य अदग्धाऽविद्यादिक्लेशबीजानि। इदममृतत्वमपि ॥ ७ ॥

पूर्वाधिकरणे ब्रह्मविदो ।विदुषश्च समानोत्क्रान्तिरुक्ता, सैवाऽनुपपन्ना, तेजःकार्यस्य ब्रह्मणि कारणे सर्वात्मना लयोपपत्तेरित्याक्षिप्य समाधत्ते—

तदापीतेः संसारव्यपदेशात् ॥ ८ ॥

तत्तेजआदि भूतसूक्ष्मं श्रोत्रादिकरणाश्रयभूतम् आ पीतेरा संसारादा मोक्षादवतिष्ठते 'योनिमन्ये प्रपद्यन्ते' इत्यादिना संसारव्यपदेशात् ॥ ८ ॥

कुतस्तर्ह्युत्क्रमे तेजो न दृश्यते ? इत्यत आह—

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥

चकारस्त्वर्थस्तेजसो दर्शनं व्यावर्तयति। तत्तेजः सूक्ष्मं स्वरूपतः परिणामतश्च। तदाह–प्रमाणतश्च। कुतः ? नाडीनिष्क्रमणादिश्यस्तथा सूक्ष्मस्योपलब्धेः ॥ ९ ॥

ननु सूक्ष्मशरीरस्य स्थूलशरीरान्तरत्वात् तन्नाशे नाश इत्यत आह—

नोपमर्देनाऽतः ॥ १० ॥

अत एव सूक्ष्मत्वात् स्थूलशरीरस्योपमर्देन सूक्ष्मशरीरं नोपमर्द्यते ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नन्वस्मिन् एव शरीरे ऊष्मण उपलभ्यमानत्वात्ततो ऽतिरिक्तं तेजः कल्पनीयमित्यत आह—

अस्यैव चोपपत्तेरेष ऊष्मा ॥ ११ ॥

अस्यैव सूक्ष्मशरीरस्यैवोष्मा सूक्ष्मशरीरे सत्युपलब्धेरसत्यनुपलब्धेरित्युपपत्तेः। चकारः श्रुतिमप्याह 'ऊष्मैवेष'इत्यादिकाम् ॥११॥

पूर्वाधिकरणे संसारव्यपदेशेन तेजसो वृत्तिलय उक्तः। अत्रापि मरणव्यपदेशाद्देहपादानोत्क्रान्तिप्रतिषेध इति सिद्धान्तोपक्रमेण सूत्रेणाक्षिपति—

प्रतिषेधादिति चेन्न शारीरात् ॥ १२ ॥

सूत्राऽवयवेन सिद्धान्तमाह—'न तस्य प्राणा उत्क्रामन्ती'त्यस्मात्प्रतिषेधाद्विद्यावतो न गमनमिति चेत्तन्न। कुतः? शारीरात्। जीवादयं गमनप्रतिषेधो न शरीरात् ॥ १२ ॥

एवं शङ्किते पुना राद्धान्तमाह—

स्पष्टो ह्येकेषाम् ॥ १३ ॥

शरीरादात्मनः प्राणानां गमनम्। कुतः? हि यस्मात् एकेषां शाखिनां शरीरस्यैव स्पष्टो ऽपादानभावः श्रूयते 'स उच्छ्रयती'त्यादिना देहस्यैवापाऽदानतयोपलम्भात् ॥ २३ ॥

स्मर्यते च ॥ १४ ॥

स्मर्यते ऽपि महाभारते गत्युत्क्रान्त्योरभावः 'सर्वभूतात्मे'त्यादिना ॥ १४ ॥

पूर्वाधिकरणे 'उच्छ्रयती'त्यादिना देहस्य प्रकृतत्वात्तदपादानोत्क्रान्तिप्रतिषेधः कृत,स्तद्वदत्रापि 'गताः कलाः पञ्चदश प्रतिष्ठा' इति वचनादिन्द्रियाणां भूतेषु लय इत्याक्षिप्य समाधत्ते—

तानि परे तथा ह्याह ॥ १५ ॥

तानीन्द्रियाणि भूतानि च निर्गुणविद्यावतः परे परमात्मनि प्रलीयन्ते कुतः? हि यस्मात् तथाह श्रुतिः 'पुरुषं प्राप्याऽस्तं गच्छन्ती'ति ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वाधिकरणे विदुष इन्द्रियाणां परस्मिन् प्रविलय उक्तः, स त्वनुपपन्नः, वृत्त्या ऽत्राप्युपपत्तेरित्याक्षिप्य समाधत्ते—

अविभागो वचनात् ॥ १६ ॥

इन्द्रियाणां भूतानां च ब्रह्मणि प्रविलये ब्रह्मणा ऽविभाग ऐक्यं निर्गुणविद्यावतो वृत्तिमतामेषां प्रविलय इत्यर्थः। कुतः ? वचनात् 'भिद्यते चैषां नाम रूपे' इत्यादेः ॥ १६ ॥

व्यवहिताधिकरणे आसृत्युपक्रमाद्विदुषो ऽविदुषश्च समाना गतिरुक्ता, सा ऽनुपपन्ना, विदुषोप्यनियतनाडीगमनादित्याक्षिप्य समाधत्ते। अथ वा पूर्वाधिकारणे निर्गुणविद्यावतो ऽविभागेन परस्मिन्नन्द्रियप्रलय इत्युक्तः, तद्वत्सगुणविद्यावतो ऽपि स स्यादिति दृष्टान्तेनाक्षिप्य समाधत्ते—

तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दाऽनुगृहीतः शताधिकया ॥ १७ ॥

तस्य विज्ञानात्मन ओक आयतनं हृदयं हृदयस्याऽग्रस्य ज्वलनेन प्रकाशितानि द्वाराणि यस्य सोयं तत्प्रकाशितद्वारः। सर्वोपि जन्तुश्चक्षुरादिभ्यः स्थानेभ्य उत्क्रामति, विद्वांस्तु हार्देन ब्रह्मणा ऽनुगृहीतः शताऽधिकमूर्धन्यया नाड्या। कुतः ? विद्यासामर्थ्याद्वुपासनासामर्थ्यात्। तत्सामर्थ्यादप्यनयैव गच्छतीति को नियम? इत्यत आह—तच्छेषगत्यनुस्मृतियोगाच्च। तस्या विद्यायाः शेषभूता मूर्धन्यनाडीगतिरुत्तरमार्ग इति यावत्। तस्या अनुस्मृतिरनुस्मरणं तस्य योगस्तस्मादपि। चकारः सामर्थ्यमनाक्षिप्याह ॥ १७ ॥

पूर्वाधिकरणे मूर्धन्यनाड्या सगुणविद्याविदुत्क्रामतीत्युक्तं, तद्दिवसे मृतस्यैव न रात्रौ, तत्र रश्मीनामभावादित्याक्षिप्य समाधत्ते—

रश्म्यनुसारी ॥ १८ ॥

'अथैतैरेव रश्मिभिरूर्ध्वमाक्रमते' एव दिवसे रात्रौ च रश्म्यनुसारी याति ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निशि नेति चेन्न संवन्धस्य यावद्देहभावित्वा-द्दर्शयति च ॥ १९ ॥

निशि रात्रौ रश्म्यनुसारी न यातीति चेत्तन्न, रश्मिसंवन्धस्य यावद्देहभावित्वात्। 'अमुष्मा' दित्यादिना दर्शयति। चकारो दिनाद्ध निशासु रश्मीनां स्पर्शोपलम्भमाह ॥ १९ ॥

पूर्वाधिकरणे रात्रौ रश्मीनां सद्भावेनोत्तरमार्गगमनमुक्तं, तद्दक्षिणायने मृतस्याऽनुपपन्नमित्याक्षिप्य समाधत्ते—

अतश्चाऽयने ऽपि दक्षिणे ॥ २० ॥

अतश्चाऽत एव तस्याऽनियतकालत्वात् अयने दक्षिणे ऽपि विद्वान् विद्याफलमाप्नोत्येव ॥ २० ॥

'यत्र काले' इत्यादिना दक्षिणायने मृतानां पुनरावृत्तिः स्मर्यत-इत्यत आह—

योगिनः प्रति च स्मर्यते स्मार्ते चैते ॥२१॥

योगिनः स्मार्तयोगविदस्तान् प्रति स्मर्यते कालविनियोगः स्मार्ते चैते योगसांख्ये। आद्यश्चकारो ब्रह्मविदः प्रत्यस्मरणमाह। द्वितीयस्तयोरश्रौतत्वमाह। आतिवाहिकाऽङ्गीकारेण कृत्वा चिन्तेयम् ॥ २१ ॥

इति श्रीब्रह्मसूत्रदीपिकायां चतुर्थाऽध्यायस्य
द्वितीयः पादः।

——:o:——

पूर्वपादे उत्क्रान्तिर्निरूपिता, इदानीमुत्क्रान्तस्य विदुषो ऽर्चिरादिका निरूप्यते—

अर्चिरादिना तत्प्रथितेः ॥ १ ॥

सर्वो ब्रह्म प्रेप्सुरर्चिरादिनैव मार्गेण रंहति। कुतः? तत्प्रथितेः। तस्य मार्गस्य विदुषां प्रथितेः प्रसिद्धेः 'ये चेमे ऽरण्ये' इत्यादिना ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वाधिकरणे विदुषो ऽर्चिरादिमार्गेण गमनमुक्तं, स मार्गो न नियतः, वायोरेतस्मिन्नश्रवणादित्याक्षिप्य समाधत्ते—

वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥

वायुमब्दात्संवत्सराद्देवलोकं प्राप्येति शेषः। कुतः ? अविशेषविशेषाभ्यां 'स वायुलक्षक'मित्यविशेषः, 'स वायुमागच्छती'त्युक्त्यनन्तरं तद्धत्तेन मार्गेण स आगच्छतीति विशेषमाह, ताभ्याम् ॥ २ ॥

पूर्वाधिकरणे वायोरब्दानन्तर्यमुक्तं, तथापि लोकादीनामर्चिरादितन्निवेशानुपपत्तिस्तदवस्था, नियामकाऽभावादिति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

तड़ितो ऽधिवरुणः सम्बन्धात् ॥ ३ ॥

तड़ितो विद्युल्लोकादधि अनन्तरं वरुणलोकः वरुणस्य विद्युतः सम्बन्धादिन्द्रप्रजापतिलोकयोर्वरुणादधि 'आगन्तुकानामन्ते निवेशः' इति न्यायेन सन्निवेशः ॥ ३ ॥

पूर्वाधिकरणे ऽर्चिरादिमार्गे वरुणादीनां तडितो ऽधिसम्बन्ध उक्तः सूचितमार्गो ऽवस्थितस्तथापि तस्मिन्मार्गे ऽर्चिरादिभोगभूमिषु गन्तुं विद्वानेकाकी प्रभुस्ततो न नियतमार्गो ऽयमित्याक्षिप्य समाधत्ते—

आतिवाहिकस्तल्लिङ्गात् ॥ ४ ॥

अतिवहन्तीत्यातिवाहिकाश्चेतना देवा अर्चिरादयः । कुतः ? तल्लिङ्गात्। तेषां चेतनानां 'तत्पुरुषो ऽमानव' इति एकीकरणेन लिङ्गात् ॥ ४ ॥

नन्वत्रैवाऽयं पुमान्नेता ऽस्त्वित्यत आह—

उभयव्यामोहात्तत्सिद्धेः ॥ ५ ॥

उभयस्य नेतॄणां संपिण्डितकरणत्वेन स्थानानां स्वयमेव व्यामोहो ऽचेतनत्वं, तस्मान्नेतॄणां चेतनानां सिद्धिः। तस्मान्नात्रैव नेता इति शेषः ॥ ५ ॥

वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वरुणादिलोके तेषां नेतृणामभावात् पूर्वमपि चेतना न स्युरित्यत आह–वैद्युतेनैवाऽमानवेनैव तत्तस्मात् विद्युल्लोकादूर्ध्वं नीयते । कुतः? तच्छ्रुतेः । तस्याऽमानवस्य पुरुषस्य नेतृत्वस्य 'तान् वैद्युता'दित्यादिश्रुतेः ॥ ६ ॥

पूर्वाधिकरणे आतिवाहिकैः सगुणविद्याविदो नीयन्ते इत्युक्तं, तदनुपपन्नं, एतस्य प्राप्यस्य ब्रह्मणः परत्वेन निर्गुणविद्याविदप्यत्रैव गच्छतीत्याक्षिप्य समाधत्ते—

कार्यं बादरिरस्य गत्युपपत्तेः ॥ ७ ॥

यदर्चिरादिना गच्छन्तीति, ब्रह्म तत्कार्यं बादरिराचार्यो मन्यते । कुतः ? अस्य कार्यस्य गतेरर्चिरादिगमनस्य तत्रोपपत्तिः सम्भवो गत्युपपत्तिः । तस्याः ॥ ७ ॥

ननु नाऽयं तर्कगम्यो ऽर्थ इत्यत आह—

विशेषितत्वाच्च ॥ ८ ॥

'ब्रह्मलोका'नित्यादिना । चकारस्तर्कस्य श्रुतिमूलस्य कर्तव्यतामाह ॥ ८ ॥

ननु कार्यस्यापि ब्रह्मशब्दो नोपपद्यते इत्यत आह—

सामीप्यात्तु तद्व्यपदेशः ॥ ९ ॥

तुशब्दस्तत्र ब्रह्मशब्दाऽनुपपत्तिं वारयति । का तर्ह्यत्रोपपत्ति?-रित्यत आह सामीप्यात् । कार्यस्य ब्रह्मणः परेण ब्रह्मणा । अतस्तस्य ब्रह्मशब्दस्य व्यपदेशात् ॥ ९ ॥

ननु कार्यप्राप्तावनावृत्तिर्नोपपद्यतइत्यत आह—

कार्याऽत्यये तदध्यक्षेण सहाऽतः परमभिधानात् ॥ १० ॥

कार्यस्य ब्रह्मलोकस्याऽत्यये विनाशे तस्य ब्रह्मलोकस्याऽध्यक्षेण परमेष्ठिना सहाऽतः परमेष्ठिनः परं ब्रह्म भवति । कुतः ? अनावृत्त्याद्यभिधानात् ॥ १० ॥

न त्विदं विश्वास्यमेवेत्यत आह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मृतेश्च ॥ ११ ॥

ब्रह्मणा सहेत्यादद्यायाः। चशब्दाच्छ्रुतेरपि 'ते ब्रह्मलोके' इत्याद्यायाः ॥ ११ ॥

पूर्वपक्षमाह—

परं जैमिनिर्मुख्यत्वात् ॥ १२ ॥

ब्रह्मशब्दस्य परब्रह्मणि मुख्यत्वात् यद्‌ गम्यमर्चिरादिना तत्परमेवेति जैमिनिराचार्य आह ॥ १२ ॥

नन्वनुपपत्तेर्मुख्यार्थपरित्याग इत्यत आह—

दर्शनाच्च ॥ १३ ॥

'तयोर्ध्वमायन्नमृतत्वमेती'त्यमृतत्वप्राप्तेः। चकारो मुख्यार्थाऽनुपपत्तेरभावमाह ॥ १३ ॥

'प्रजापतेः सभावेश्मे' त्यादिना स्पष्टं कार्यब्रह्माऽवगम्यते इत्यत आह—

न च कार्ये प्रतिपत्त्यभिसन्धिः ॥ १४ ॥

'वेश्म प्रपद्यते' इति प्रतिपत्तेरभिसन्धिः कार्ये ब्रह्मणि न च, नैव। नामरूपनिर्वाहकस्य ब्रह्मणः प्रकृतत्वात् ॥ १४ ॥

पूर्वाधिकरणे ऽर्चिरादिप्राप्यस्य ब्रह्मणः कार्यत्वमुक्तम्, एवं चेत्प्रतीकोपासकैरपि तद्‌ गम्यमित्याक्षिप्य समाधत्ते—

अप्रतीकावलम्बनान्नयतीति बादरायण उभयथा ऽदोषात्तत्क्रतुश्च ॥ १५ ॥

प्रतीकाऽवलम्बना ये न भवन्ति ते ऽप्रतीकाऽवलम्बनाः तान् प्रतीकव्यतिरिक्तानमानवपुरुषो नयतीति बादरायण आचार्यो मन्यते। न च नयने न्यायविरोध इत्यत आह-उभयथा ऽदोषात्। उभयथा प्रतीकालम्बनानां नयने ऽन्येषां नयने न्यायस्य प्रतीकावलम्बनव्यतिरिक्तविषयत्वेनाऽदोषात्। अत्र को हेतु?रित्यत आह-तत्क्रतुश्च। तस्य ब्रह्मणः क्रतुः संकल्पः तत्क्रतुर्ब्रह्मप्राप्तौ हेतुः। चशब्दस्तद्भावप्राप्तौ ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ननु प्रतीकोपासनानां फलाऽभावात् ब्रह्मलोक एव फलं फल्प्य-मित्यत आह—

विशेषं च दर्शयति ॥ १६ ॥

'यावन्नाम्नो गत'मित्यादिना प्रतीकोपासनेषु फलस्य । चकारो ऽश्रुतफलेषु ब्रह्मलोकः फलं कल्प्यमिति कल्पनाऽभावमाह ॥ १६ ॥

इति ब्रह्मसूत्रदीपिकायां चतुर्थाऽध्यायस्य तृतीयः पादः ।

———o———

पूर्वपादे सगुणविद्याविदो ऽर्चिरादिगतिः कार्यब्रह्मप्राप्तिश्च फल-मुक्त,मिदानीं निर्गुणविद्याविदस्तत्संपत्तिरुच्यते—

संपद्याविर्भावः स्वेन शब्दात् ॥ १ ॥

परं ज्योतिरुपसंपद्य स्वेन केवलेनैवात्मना ऽऽविर्भवति । कुतः ? 'स्वेन रूपेणाऽभिनिष्पद्यते' इति स्वशब्दात् । कः पुनर्विशेषः पूर्वो-त्तरयोः स्वरूपयो?रित्यत आह—

मुक्तः प्रतिज्ञानात् ॥ २ ॥

यो ऽत्राऽभिनिष्पद्यतइत्युक्तः स सर्वसम्बन्धविनिर्मुक्तः । कुतः ? 'य आत्मे' त्यादिना तादृशस्यैव प्रतिज्ञानात् ॥ २ ॥

'परं ज्योतिरुपसंपद्ये'ति ज्योतिषि सम्पत्तेः कथमात्मरूपेणाऽऽवि-र्भाव? इत्यत आह—

आत्मा प्रकरणात् ॥ ३ ॥

ज्योतिःशब्देनाऽऽत्मा ऽभिधीयते । कुतः ? प्रकरणात् । 'य आ-त्मे'त्यादेः ॥ ३ ॥

पूर्वाधिकरणे स्वेन सता संपत्तिरुक्ता, सा सुषुप्तिवत्स्यादित्या-क्षिप्य समाधत्ते—

अविभागेन दृष्टत्वात् ॥ ४ ॥

परं ज्योतिरुपसंपद्य स्वेन रूपेणाऽभिनिष्पद्यते यः स त्वविभा-गेन । कुतः ? 'तत्त्वमसी'त्यादेर्दृष्टत्वात् ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वाधिकरणे अविभागेन ब्रह्मसंपत्तिरुक्ता, तद्ब्रह्म स्वभावेन सविशेषमित्याक्षिपति—

ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५ ॥

ब्राह्मेण स्वेन रूपेणाऽपहतपाप्मत्वादिना सर्वज्ञत्वादिना च निष्पद्यते इति जैमिनिराचार्यो मन्यते। कुतः? उपन्यासादिभ्यः। उपन्यासो 'ऽयमात्मे' त्यादिशब्देन 'स तत्र पर्येती'त्यैश्वर्यादिभ्यः ॥ ५ ॥

चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥ ६ ॥

चिन्मात्रेण चैतन्यमेवाऽऽत्मनो रूपमतश्चैतन्यमात्रेणैवाऽभिनिष्पद्यते। तदेव कुत? इत्यत आह-'एवं वा अरे' इत्यादिना तदात्मकत्वात् चैतन्यमात्रात्मकत्वात्। आत्मनो वस्तुतः सत्यसङ्कल्पत्वादीनामुपाधिधर्मत्वादित्यौडुलोमिराचार्यो मन्यते ॥ ६ ॥

एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॥ ७ ॥

एवमपि पारमार्थिकचैतन्यरूपेण स्वरूपाऽभ्युपगमे ऽपि पूर्वस्याऽप्युपन्यासादिभ्यो ऽवगतस्य ब्राह्मस्यैश्वर्यरूपस्य भावाद्व्याख्यानादप्यविरोधं बादरायण आचार्यो मन्यते, बादरायणमतं सिद्धान्तः ॥ ७ ॥

पूर्वाधिकरणे ब्रह्मणि विशेषाऽसम्भवात्सविशेषप्रकृतावपि सविशेषत्वश्रुतिरौपाधिकविशेषे व्यवस्थापिता, नैवं योगी सङ्कल्पाऽतिरिक्तसाधनवानिति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

संकल्पादेव तच्छ्रुतेः ॥ ८ ॥

पित्रादयः सङ्कल्पादेव समुत्तिष्ठन्ति न तु निमित्तान्तरात्। कुतः? तस्य 'सङ्कल्पादेवाऽस्य पितरः समुत्तिष्ठन्ती'ति ताहशस्य समुत्थानस्य श्रुतेः ॥ ८ ॥

अत एव चाऽनन्याधिपतिः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत एव सत्यसङ्कल्पत्वादेवाऽनन्याऽधिपतिश्च। अस्य नाऽन्योऽधिपतिरपि ॥ ९ ॥

पूर्वाधिकरणे संकल्पाऽतिरिक्तसाधनानां सगुणविद्याविदो योगिनोऽसाधनत्वमुक्तं तच्छ्रुतेः। नैवमत्र श्रुतिरस्ति, अतोऽपि मनोऽतिरिक्तानां साधनानामसत्त्वमेवेति प्रत्युदाहरणेनाक्षिप्य पक्षान्तर माह—

अभावं बादरिराह ह्येवम् ॥ १० ॥

मनोऽतिरिक्तानां शरीरेन्द्रियादीनामभावं बादरिराचार्यो मन्यते। कुतः? हि यस्मात् एवमाह श्रुतिः 'स एवैतानी'त्यादिना ॥ १० ॥

भावं जैमिनिर्विकल्पाऽऽमननात् ॥ ११ ॥

जैमिनिराचार्यो मनोवच्छरीरस्यापि सेन्द्रियस्य भावं मुक्तं प्रति मन्यते। कुतः? 'स एकधा भवती'त्यादिना विकल्पस्याऽऽमननात् ॥ ११ ॥

द्वादशाहवदुभयविधं बादरायणोऽतः ॥१२॥

बादरायणो मुनिराचार्योऽत एव लिङ्गदर्शनादुभयविधं मन्यते भावमभावं द्वादशाहवत्। यथा द्वादशाहः सत्रमहीनश्च तद्वत्। अतः सिद्धान्तः ॥ १२ ॥

ननु शरीराऽभावे सुषुप्तिवन्न विषयोपलम्भ इत्यत आह—

तन्वभावे सन्ध्यवदुपपत्तेः ॥ १३ ॥

शरीराऽभावे सन्ध्ये यथोपलब्धिमात्राः पित्रादिकामा भवन्ति एवं मोक्षेऽपि स्युः, तथा सत्युपपत्तेः ॥ १३ ॥

भावे जाग्रद्वत् ॥ १४ ॥

पूर्वाधिकरणे 'स एकधा भवति त्रिधा भवती'ति वाक्योदाहरणेनाऽनेकशरीरग्रहणमुक्तं, तत् क्रमेण न युगपदित्याक्षिप्य समाधत्ते—

प्रदीपवदावेशस्तथा हि दर्शयति ॥ १५ ॥

शरीरान्तराणां स्वीकारे शरीरान्तरात् शरीरान्तरेष्वावेशः प्रदीपवत्। यथैकस्य प्रदीपस्य प्रदीपसहस्रेषु आवेशः तद्वत्। कुतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतत्? हि यस्मात् तथा दर्शयति श्रुतिः 'स एकधा भवती'त्यादिना ॥ १५ ॥

स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ १६ ॥

स्वाप्ययः सुषुप्तिः संपत्तिस्तयोरन्यतरापेक्षं 'यत्र त्वस्ये'त्यादि प्रतिषेधवचनम् । कुतः? हि यस्मात् सुषुप्तौ मुक्तौ वा इदमाविष्कृतमुदाहृतम् ॥ १६ ॥

पूर्वाधिकरणे शरीरेन्द्रियाणां कर्तृत्वमुक्तं योगिनः, तद्वज्जगद्व्यापारकर्तृत्वमपीति दृष्टान्तेनाक्षिप्य समाधत्ते—

जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥ १७ ॥

योगिनां भौतिकेष्वेव स्वातन्त्र्यं न भूतेष्वित्याह-जगद्व्यापारवर्जम् । कुतः? प्रकरणात् । सर्वभूतसृष्टिवाक्येषु परमात्मनः प्रकृतत्वात् । न च तेऽपि परमात्मवत् प्रकृता इत्याह—असन्निहितत्वाद्योगिनाम् । च कारो महाभूतसृष्टौ योगिनामशक्यत्वमप्याह ॥ १७ ॥

प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥ १८ ॥

प्रत्यक्षोपदेशात् 'आप्नोति स्वाराज्य'मित्यादेर्योगिनां जगद्व्यापारस्वातन्त्र्यमिति चेन्न । कुतः? आधिकारिको य आदित्यमण्डलस्थस्तस्योक्तेः ॥ १८ ॥

ननूपाधिव्यतिरिक्तस्य ब्रह्मणोऽसत्त्वे कुतोऽयं विभाग? इत्यत आह—

विकारावर्ति च तथा हि स्थितिमाह ॥ १९ ॥

विकारावर्त्यपि नित्यमुक्तं परमेश्वरं न केवलविकारमात्रगोचरं सावित्रमण्डलाद्याधिष्ठानम् । तथा हि यस्मात् स्थितिमाह आम्नायः 'एतावानस्य महिमे'त्यादिना ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नन्वत्र पादत्रयमुपलभ्यते न त्वन्यत्किञ्चिदित्यत आह—

दर्शयतश्चैवं प्रत्यक्षाऽनुमाने॥ २१ ॥

एवं विकारावर्ति रूपं श्रुतिस्मृती दर्शयतः। श्रुति'र्न तत्र सूर्य' इत्याद्या। स्मृति'र्न जायते, इत्याद्या। चकारो मुक्तेरपि सत्त्वमाह॥२०॥

ननु परमेश्वरस्य जगत्कर्तृत्वमुक्तं, तत्समानशीलाश्च योगिन इत्यत आह—

भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

अनादिसिद्धेन परमेश्वरेण भोगमात्रं समानं योगिनां यथैतदेवलिङ्गं योगिनां जगद्व्यापाराऽभावे। चकारादनेकेश्वरादिदोषश्च ॥२१

नन्वेवं सति साऽतिशयत्वात् अन्तवत्त्वमैश्वर्यस्य स्यात्ततश्चैवमावृत्तिरिति चेत्—

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥२२॥

ब्रह्मलोकप्राप्तानां तेषां न पुनरावृत्तिः। कुतः? 'न स पुनरावर्तते' इत्यादेः शब्दात्। सूत्राऽभ्यासः शास्त्रसमाप्तिं द्योतयति ॥ २२ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याऽऽनन्दात्मपूज्यपाद-
शिष्यस्य परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करानन्द-
भगवतः कृतौ ब्रह्मसूत्रदीपिकाया चतुर्था-
ऽध्यायस्य चतुर्थः पादः ॥
संपूर्णश्च चतुर्थो ऽध्यायः ।
समाप्तश्चायं ग्रन्थः ॥

शुभम्।

——:o:——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२०५२७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाल्मीकि विद्यापीठ पुस्तकालयः

प्रत्यावर्तनतिथिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९६५०५

AUTHOR शङ्करानन्द

TITLE ब्रह्मसूत्रदीपिका

R65.5
SHA
1904

९६५०५

सरस्वती नः सुभगा मयस्करत्
महेन्द्र संस्कृत विश्वविद्यालयः
MAHENDRA SANSKRIT UNIVERSITY 1986 AD

महेन्द्र संस्कृत विश्वविद्यालय
वाल्मीकि विद्यापीठ
पुस्तकालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu